# परीक्षा-सारथी

## कक्षा १० (सम्प्रेषणात्मक संस्कृत)

### सी. बी. एस. ई. के नवीनतम पाठ्यक्रम पर आधारित
### दस आदर्श अभ्यास-प्रश्नपत्र

सफलता की ओर आपका मार्गदर्शक


लेखिका -

इन्द्रा बहादुर



BlueRose ONE .com
Stories Matter
NewDelhi • London

**BLUEROSE PUBLISHERS**
India | U.K.

Copyright © Indra Bahadur 2026

All rights reserved by author. No part of this publication may be reproduced, stored in a retrieval system or transmitted in any form or by any means, electronic, mechanical, photocopying, recording or otherwise, without the prior permission of the author. Although every precaution has been taken to verify the accuracy of the information contained herein, the publisher assumes no responsibility for any errors or omissions. No liability is assumed for damages that may result from the use of information contained within.

BlueRose Publishers takes no responsibility for any damages, losses, or liabilities that may arise from the use or misuse of the information, products, or services provided in this publication.

BlueRoseONE.com
Stories Matter
NewDelhi • London

For permissions requests or inquiries regarding this publication,
please contact:

BLUEROSE PUBLISHERS
www.BlueRoseONE.com
info@bluerosepublishers.com
+91 8882 898 898
+4407342408967

ISBN: 978-93-7825-767-4

Cover Design: Deepak Katheria
Typesetting: Manisha Rawat

First Edition: July 2026

# समर्पण

प्रस्तुत पुस्तक मैं  अपने सभी प्रिय विद्यार्थियों को समर्पित करना चाहती हूँ जिनके प्रति मेरे हृदय में अपार स्नेह है तथा जिनके उज्ज्वल भविष्य की मैं सतत कामना करती हूँ।

मेरी अभिलाषा है कि मेरा यह प्रयास उन्हें अपने लक्ष्य तक पहुँचाने में उनका सहायक सिद्ध हो।

**इन्द्रा बहादुर**

(हस्ताक्षर)



# प्राक्कथन

प्रिय विद्यार्थियों एवं संस्कृत प्रेमियों! संस्कृत भाषा मात्र प्राचीन धरोहर नहीं, अपितु जीवन की सरिता है, जो हमें देववाणी के मधुर स्वरों से सींचती है। लेखिका **इन्द्रा** बहादुर जी एक समर्पित संस्कृत शिक्षिका हैं, जिन्होंने वर्षों से कक्षा 9 एवं 10 के CBSE पाठ्यक्रम में संप्रेषणात्मक संस्कृत का अध्यापन किया है। विद्यालय स्तर पर अपने दीर्घ अनुभव के कारण उन्होंने विद्यार्थियों के चेहरों पर परीक्षा की आशंका के बादल देखे थे तभी उनके मन में इस भय को दूर करने का विचार उत्पन्न हुआ । उनका विश्वास है कि संस्कृत भय का विषय नहीं, अपितु आनंद का स्रोत है।

उनके अनुभव ने स्पष्ट किया कि एक विद्यार्थी की कठिनाइयाँ न केवल व्याकरण की जटिलताओं में, अपितु आत्मविश्वास की कमी में निहित हैं। इसलिए, यह अध्ययन सामग्री उन्होंने सरलता, रुचिकरता एवं व्यावहारिकता के सूत्रों पर बुनी है।

इस पुस्तक द्वारा अभ्यास, विद्यार्थियों के ज्ञान को तो सुदृढ़ करेगा ही ,साथ ही उनमें बोर्ड परीक्षा के लिए आत्मविश्वास भी उत्पन्न करेगा । । उनकी यह कोशिश संस्कृत पढ़ने वाले विद्यार्थियों के मन से संस्कृत का भय दूर करे, आत्मविश्वास जगाए और परीक्षा में उत्तम अंक दिलाए—यही प्रार्थना है।

निधि कोल्हे

संस्कृत -शिक्षिका

ऐमिटी इंटरनैशनल स्कूल

# अनुक्रमाणिका


संस्कृतम् (संप्रेषणात्मक) विषय-कोड्-सङ्ख्या – 119 कक्षा- दशमी (2025-26) ....................................1

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119) आदर्श-प्रश्नपत्रम् कक्षा दशमी (2025-26) ......................8

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119) अभ्यास-प्रश्नपत्रम् -1 (हल सहित) कक्षा - दशमी ............22

उत्तरमाला-1 अभ्यास प्रश्न-पत्र-1 संस्कृतम् (सम्प्रेषणात्मकम्) (कोड सङ्ख्या-119) ................................35

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119) अभ्यास-प्रश्नपत्रम् -2 (हल सहित) कक्षा - दशमी ............42

उत्तरमाला-2 अभ्यास प्रश्न-पत्र-2 संस्कृतम् (सम्प्रेषणात्मकम्) (कोड सङ्ख्या-119) ................................55

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119) अभ्यास-प्रश्नपत्रम् -3 (हल सहित) कक्षा - दशमी ............62

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119) अभ्यास-प्रश्नपत्रम् -4 (हल रहित) कक्षा - दशमी .............76

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119) अभ्यास-प्रश्नपत्रम् -5 (हल रहित) कक्षा - दशमी .............89

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119) अभ्यास-प्रश्नपत्रम् -6 (हल रहित) कक्षा - दशमी ...........103

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119) अभ्यास-प्रश्नपत्रम् -7 (हल रहित) कक्षा - दशमी ...........116

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119) अभ्यास-प्रश्नपत्रम् -8 (हल रहित) कक्षा - दशमी ...........129

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119) अभ्यास-प्रश्नपत्रम् -9 (हल रहित) कक्षा - दशमी ...........142

संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119) अभ्यास-प्रश्नपत्रम् -10 (हल रहित) कक्षा - दशमी .........155

# संस्कृतम् (संप्रेषणात्मक)
# विषय-कोड्-सङ्ख्या – 119
# कक्षा- दशमी (2026-27)

आहत्य अड्.का: - 80+20

वार्षिकमूल्याड्.कनाय निर्मिते प्रश्नपत्रे चत्वार: भागा: भविष्यन्ति –

| | | |
|---|---|---|
| ‘क’ भागः अपठितावबोधनम् | | 10 अड्.का: |
| ‘ख’ भागः रचनात्मककार्यम् | | 15 अड्.का: |
| ‘ग’ भागः अनुप्रयुक्तव्याकरणम् | | 25 अड्.का: |
| ‘घ’ भागः पठितावबोधनम् | | 30 अड्.का: |

**भागानुसारं विषया: अड्.कविभाजनं च** **80 अड्.का:**

| क्र. सं. | विषया: | प्रश्नप्रकारा: | मूल्यभारः |
|---|---|---|---|
| **‘क’ भाग: अपठितावबोधनम् 10अड्.का:** | | | |
| 1. | एकः गद्यांश: (80-100 शब्दपरिमित:) | अति अतिलघूत्तरात्मकौ<br>पूर्णवाक्यात्मकौ<br>शीर्षकम् (लघूत्तरात्मक:)<br>भाषिककार्यम् (बहुविकल्पात्मक:) | 2×1=2<br>2×2=4<br>1×1=1<br>3×1=3 |
| | | पूर्णभारः | 10 अड्.का: |
| **‘ख’ भाग: रचनात्मककार्यम् 15 अड्.का:** | | | |
| 2. | औपचारिकम् अथवा अनौपचारिकं पत्रम्<br>(मंजूषाया: सहायतया रिक्तस्थानपूर्तिमाध्यमेन पूर्णं पत्रं लेखनीयम्) | निबंधात्मक: | 10×½=5 |

| | | | |
|---|---|---|---|
| 3. | चित्रवर्णनम् अथवा अनुच्छेदलेखनम् | पूर्णवाक्यात्मक: | 5×1=5 |
| 4. | कथापूर्ति:/ संवादपूर्ति:<br>(मंजूषाया: सहायतया रिक्तस्थानपूर्तिमाध्यमेन पूर्ण: संवादः लेखनीयः / पूर्णा कथा लेखनीया) | निबंधात्मक: | 10×½=5 |
| | | पूर्ण: भारः | 15 अङ्.का: |
| | **ग' भाग:**<br>**अनुप्रयुक्तव्याकरणम् 25 अङ्.का:** | | |
| 5. | संधि: | लघूत्तरात्मक: | 4×1=4 |
| 6. | समासाः | बहुविकल्पात्मक: | 4×1=4 |
| 7. | प्रत्यया: | बहुविकल्पात्मक: | 4×1=4 |
| 8. | वाच्यपरिवर्तनम् | लघूत्तरात्मक: | 3×1=3 |
| 9. | समयः | लघूत्तरात्मक: | 3×1=3 |
| 10. | अव्ययानि | लघूत्तरात्मक: | 4×1=4 |
| 11. | अशुद्धिसंशोधनम् | बहुविकल्पात्मक: | 3×1=3 |
| | | पूर्ण: भारः | 25 अङ्.का: |
| | **'घ' भागः**<br>**पठितावबोधनम् 30 अङ्.का** | | |
| 12. | गद्यांश: | अतिलघूत्तरात्मक:<br>पूर्णवाक्यौ ( लघूत्तरात्मकौ)<br>(भाषिककार्यम्) | 2×½=1<br>2×1=2<br>2×1=2 |
| 13. | पद्यांश:, | अतिलघूत्तरात्मक:<br>पूर्णवाक्यौ ( लघूत्तरात्मकौ)<br>(भाषिककार्यम्) | 2×½=1<br>2×1=2<br>2×1=2 |
| 14. | नाट्यांशः | अतिलघूत्तरात्मक:<br>पूर्णवाक्यौ ( लघूत्तरात्मकौ) | 2×½=1<br>2×1=2 |

| | | | |
|---|---|---|---|
| | | (भाषिककार्यम्) | 2×1=2 |
| 15. | प्रश्ननिर्माणम् | पूर्णवाक्यात्मका: | 5×1=5 |
| 16. | अन्वय: अथवा भावार्थ: ( रिक्तस्थानपूर्तिमाध्यमेन) | निबंधात्मक: | 4×½=2 |
| 17. | प्रसंगानुसारम् अर्थचयनम् | बहुविकल्पात्मका: | 4×1=4 |
| 18. | पाठाधारित-कथापूर्ति:<br>(मंजूषाया: सहायतया रिक्तस्थानपूर्तिमाध्यमेन) | निबंधात्मका: | 8×½=4 |
| | | पूर्णभारः | 30 अड्.का: |
| | | संपूर्णभार: | 80 अड्.का: |

**संस्कृतपाठ्यक्रम:(सम्प्रेषणात्मकम्)**

**(कोड संख्या . 119)**

**कक्षा- दशमी (2026-27)**

**वार्षिकम् मूल्याड्.कनम्**

**80 अड्.का:**

**'क' भाग:**

**अपठितावबोधनम् 10 अड्.का:**

**1. एक: अपठित: गद्यांश: (10)**

सरलकथा

एकपदेन पूर्णवाक्येन च अवबोधनात्मकं कार्यम् (2+4)

शीर्षकलेखनम् (1)

गद्यांशाधारितं भाषिक कार्यम्-(3)

**भाषिककार्याय तत्त्वानि -**

- वाक्ये कर्तृ-क्रियापदचयनम्
- विशेषण-विशेष्यचयनम्
- पर्याय-विलोमपद-चयनम्

**'ख' भागः**

**रचनात्मककार्यम्  (15अङ्.काः)**

**2. सङ्केताधारितम् औपचारिकम् अथवा अनौपचारिकं पत्रलेखनम् (5)**

(मञ्जूषायाः सहायतया रिक्तस्थानपूर्तिमाध्यमेन पूर्ण पत्रं लेखनीयम्)

**3. चित्राधारितं वर्णनम् अथवा अनुच्छेदलेखनम् (5)**

(मञ्जूषायाः सहायतया चित्रवर्णनम् अनुच्छेदलेखनं वा करणीयम्)

**4. संवादपूर्तिः / कथापूर्तिः (कथा छात्रस्तरानुगुणम् एव भवेत्।) (5)**

(मञ्जूषायाः सहायतया रिक्तस्थानपूर्तिमाध्यमेन पूर्णः संवादः /
कथा लेखनीया)

**'ग' भागः**

**अनुप्रयुक्तव्याकरणम्  (25 अङ्.काः)**

**5. सन्धिकार्यम्  (4)**

- स्वरसन्धिः- वृद्धिः, यण, अयादिः, पूर्वरूपम् (1) अङ्कः)
- व्यञ्जनसन्धिः- परसवर्णः (अनुस्वारस्थाने पञ्चमवर्णस्य प्रयोगः) , तुगागमः, वर्गीयप्रथमवर्णस्य तृतीयवर्णे परिवर्तनम्। (1 अङ्कः)
- विसर्गसन्धिः - उत्वम्, रत्वम्, विसर्गलोपः, विसर्गस्य स्थाने स्, श्, ष् (2 अङ्कौ)

**6. समासः (वाक्येषु समस्तपदानां विग्रहः विग्रहपदानां च समासः) (4)**

- तत्पुरुषः- विभक्तिः, नञ्, उपपदः (2 अङ्.कौ)
- द्वन्द्वः (1 अङ्कः)
- अव्ययीभावः- (अनु, उप, सह, निर्, प्रति, यथा) (1) अङ्कः)

**7. प्रत्ययाः  (4)**

- कृत्प्रत्ययौ- तव्यत् ,अनीयर्(1अङकः)
- तद्धिताः - मतुप्, ठक्, त्व, तल् (2 अङ्कौ)

- स्त्रीप्रत्ययौ- टाप्, डीप् (1 अङ्कः)

**8. वाच्यपरिवर्तनम् - केवलं लट्लकारे (कर्तृ-कर्म-क्रिया) (3)**

**9. समयः -अङ्.कानां स्थाने शब्देषु समयलेखनम्। (3)**

(सामान्य-सपाद-सार्ध-पादोन)

**10. अव्ययानि (4)**

इव, उच्चैः, एव, नूनम्, इतस्ततः, विना, सहसा, वृथा, शनैः, इति, मा, यत्, सम्प्रति, इदानीम्, अधुना, यावत्, बहिः, कदापि, च, अपि, पुरा, अत्र-तत्र, यथा-तथा, कदा, अद्य, श्वः, परश्वः, ह्यः, परह्यः, किमर्थम्, कुत्र, यदि-तर्हि, तु , तावत् , अथ, अत:

**11. अशुद्धि-संशोधनम् (वचन-लिङ्ग-पुरुष-लकार-दृष्ट्या संशोधनम्) (3)**

**'घ' खण्डः**

**पठितावबोधनम् 30 अङ्.का:**

**12. गद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम् (5)**

प्रश्नप्रकाराः- एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि

भाषिककार्यम् –

- वाक्ये कर्तृ-क्रिया-पदचयनम्
- विशेषण-विशेष्य-चयनम्
- पर्याय-विलोमपद-चयनम्

**13. पद्यम् (श्लोकम् / श्लोकौ) अधिकृत्य अवबोधनात्मकं कार्यम् (5)**

प्रश्नप्रकाराः - एकपदेन पूर्णवाक्येन च प्रश्नोत्तरा:

भाषिककार्यम् –

- वाक्ये कर्तृ-क्रिया-पदचयनम्
- विशेषण-विशेष्य-चयनम्
- पर्याय-विलोमपद-चयनम्

**14. नाट्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम् (5)**

प्रश्नप्रकाराः - एकपदेन पूर्णवाक्येन च प्रश्नोत्तराणि

भाषिककार्यम् -

- वाक्ये कर्तृ-क्रिया-पदचयनम्
- विशेषण-विशेष्य-चयनम्
- पर्याय-विलोमपद-चयनम्

**15. वाक्येषु रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणम् (5)**

**16. एकस्य श्लोकस्य अन्वयः अथवा भावार्थः (2)**

(मञ्जूषायाः सहायतया रिक्तस्थानपूर्तिमाध्यमेन पूर्णः अन्वयः भावार्थः वा लेखनीयः)

**17. प्रसङ्गानुसारम् अर्थचयनम् (पाठान् आधृत्य बहुविकल्पात्मकाः प्रश्नाः) (4)**

**18. पाठाधारित-कथापूर्तिः (मञ्जूषापदसहायतया रिक्तस्थानपूर्तिः(4)**

**आहत्याङ्काः-80**

**परीक्षायै निर्धारिताः पाठाः**

| पाठसंख्या | पाठनाम |
|---|---|
| प्रथमः पाठः | वाङ्मयं तपः |
| द्वितीयः पाठः | नास्ति त्यागसमं सुखम् |
| तृतीय : पाठः | रमणीया हि सृष्टिः एषा |
| चतुर्थःपाठः | आज्ञा गुरूणां हि अविचारणीया |
| पञ्चमःपाठः | अभ्यासवशगं मनः |
| षष्ठः पाठः | राष्ट्रं संरक्ष्यमेव हि |
| सप्तमः पाठः | साधुवृत्तिं समाचरेत् |
| अष्टमः पाठः | तिरुक्कुरल् -सूक्ति-सौरभम् |
| नवमः पाठः | सुस्वागतं भो! अरुणाचलेऽस्मिन् |
| दशमः पाठः | कालोऽहम् ((केवलम् आन्तरिकमूल्याङ्कनाय) |
| एकादशः पाठः | किं किम् उपादेयम् (केवलम् आन्तरिकमूल्याङ्कनाय) |

**अवधेयम् -**

* परीक्षायै अनुप्रयुक्तव्याकरणस्य अंशानां चयनं यथासम्भवं 'मणिका-द्वितीयो भागः इति' पाठ्यपुस्तकात् करणीयम्। यदि ततः न सम्भवति तर्हि 'मणिका-अभ्यासपुस्तकम् द्वितीयो भागः' इत्यस्मात् कर्तुं शक्यम्।

# संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)
# आदर्श-प्रश्नपत्रम्
# कक्षा दशमी (2025-26)

**अवधिः होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 12 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

| | | |
|---|---|---|
| **'क' भागः.** | **अपठितावबोधनम्** | **10 अङ्काः** |
| **'ख' भागः** | **रचनात्मककार्यम्** | **15 अङ्काः** |
| **'ग' भागः** | **अनुप्रयुक्तव्याकरणम्** | **25 अङ्काः** |
| **'घ' भागः** | **पठितावबोधनम्** | **30 अङ्काः** |

4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| **'क' भागः<br>अपठितावबोधनम् (10 अङ्काः)** | | |
|---|---|---|
| 1 | अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –<br>अयं संसारः जनानां कर्मभूमिः अस्ति। अस्मिन् संसारे यावन्तः जनाः जन्म गृह्णन्ति, तेषां पृथक् पृथक् कर्तव्यानि भवन्ति । एतानि कर्तव्यानि अनेकविधानि भवन्ति। कानिचिद् व्यक्तिगतानि कानिचित् पारिवारिकाणि, कानिचित् सामाजिकानि। कानिचित् नित्यानि भवन्ति कानिचित् च नैमित्तिकानि। एतेषां सर्वेषां कर्तव्यानां पालनं | 10 |

| | | |
|---|---|---|
| | मनुष्यस्य व्यक्तिगतहिताय देशहिताय च परमावश्यकं भवति। परमद्य जनेषु कर्तव्यपालनं प्रति न कापि निष्ठा। कोऽपि श्रमेण सत्यतया निष्ठया च कार्यं कर्तुं न वाञ्छति। अल्पेन एव प्रयासेन ते कार्यसिद्धिम् इच्छन्ति। ते केवलं स्वार्थपूर्तिं कर्तुम् इच्छन्ति। अधिकाराय तु सर्वे प्रयतन्ते परं कर्तव्यं प्रति कोऽपि ध्यानं न ददाति। सत्यमेतद् यावद् वयं परिश्रमपूर्वकं श्रद्धापूर्वकं च स्वकर्तव्यानि न पालयामः तावद् देशस्य समाजस्य च उन्नतिः भवितुं न अर्हति। कर्तव्यपालनम् एव आत्मन: देशस्य च उन्नतेः मूलमन्त्रोऽस्ति । | |
| | **अ. एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्) .** | **(2x1=2)** |
| | (i) अयं संसारः केषां कर्मभूमिः अस्ति? | |
| | (ii) उन्नतेः मूलमन्त्रं किम् अस्ति? | |
| | (iii)जनाः किं विहाय केवलम् अधिकाराय प्रयतन्ते? | |
| | **आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) ।** | **(2x2=4)** |
| | (i) देशस्य उन्नतिः कदा भवितुम् अर्हति? | |
| | (ii) कर्तव्यपालनं किमर्थम् आवश्यकम्? | |
| | (iii)अद्यत्वे जनाः कथं कार्यसिद्धिम् इच्छन्ति? | |
| | **इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** | **(1)** |
| | **ई. यथानिर्देशम् उत्तरत-** | **(3x1=3)** |
| | (i) 'अयं संसारः कर्मभूमिः अस्ति।' अस्मिन् वाक्ये क्रियापदं किम्? | |
| | (क) अयम्  (ख) संसारः | |
| | (ग) कर्मभूमिः  (घ) अस्ति | |
| | (ii) 'प्रयत्नं कुर्वन्ति' एतदर्थं किं क्रियापदं गद्यांशे प्रयुक्तम्? | |
| | (क) प्रयतन्ते  (ख) अर्हति | |
| | (ग) इच्छन्  (घ) भवन्ति | |
| | (iii) 'प्रयासेन' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम्? | |
| | (क) निष्ठा  (ख) अल्पेन | |
| | (ग) सत्यता  (घ) श्रमेण | |

| 'ख' भागः<br>रचनात्मकं कार्यम्     (15 अङ्काः) | | |
|---|---|---|
| 2 | भवत्याः नाम शर्वाणी। भवत्याः सखी प्रज्ज्वला संस्कृतं पठितुं भवत्याः परामर्शं वाञ्छति। तां प्रेरयितुं लिखितं पत्रं मञ्जूषाप्रदत्तपदानां सहायतया पूरयित्वा पत्रम् उत्तरपुस्तिकायां लिखतु –<br>डी-401, जनकपुरी<br><br>(i) ——————-<br>दिनाङ्क:————————<br><br>प्रिय (ii) ——————<br>सस्नेहं नमस्ते।<br><br>अत्र कुशलं तत्रास्तु। आशासे त्वम् अपि कुशलिनी स्यात्। भवत्याः पत्र प्राप्तम्। भवती संस्कृतभाषां पठितुम् इच्छति (iii) ——————- पठित्वा मम प्रसन्नतायाः सीमा नास्ति। एषा भाषा सर्वाधिका (iv) —————-अस्ति। संस्कृतम् अस्माकं देशस्य प्रतिष्ठा वर्तते। वेदाः, उपनिषदः,रामायण, महाभारतं, पुराणानि, महाकाव्यानि, कथासाहित्यम् इत्यादिकं सर्वं (v) ———————-अत्यन्तं मार्गदर्शकं, ज्ञानवर्धकं प्रेरणाप्रदं च अस्ति। यथा पुष्पेभ्यः सुगन्धः पृथक् कर्तुं न शक्यते तथैव भारतीयसंस्कृतेः संस्कृतभाषां पृथक् (vi) —————न शक्यते। संस्कृतेन सम्भाषणम् अस्माकं हृदयेषु (vii) ————- वर्धयति हीनभावनां च नाशयति। अतः त्वम् अवश्यं————— (viii) पठ, पठित्वा च अस्याः भाषायाः (ix) —————-कुरु। एवं वयं भारतमातुः सेवां कृत्वा धन्याः भवामः।<br>सर्वेभ्यः अग्रजेभ्यः मम प्रणामाः अनुजेभ्यः च आशीर्वादाः ।<br>भवत्याः सखी,<br>(x) ———————<br><br>**मञ्जूषा**<br><br>वैज्ञानिकी, प्रचारम्, वाड्.मयम्, प्रज्ज्वले, कर्तुम्, शर्वाणी,<br>इति, गौरवम्, संस्कृतम्, नवदिल्लीतः | **(10x1/2=5)** |

| | | |
|---|---|---|
| 3.अ | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषाप्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत** | **(5x1-5)** |



**मञ्जूषा**

| |
|---|
| निर्वाचनम्, मतदानकेन्द्रम्, पङ्क्तिबद्धाः, महिलाः, ग्रामीणाः, हस्तेषु परिचयपत्राणि, अधिकारः, जनप्रतिनिधिः, वृक्षाः, प्रतीक्षां कुर्वन्ति। |

**अथवा**

आ. मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -

**"बालश्रमः"**

| |
|---|
| भोजनालयेषु, उद्योगेषु, बालकाः, शिक्षातः, क्रीडनात्, वञ्चिताः, जनाः, ग्रामेभ्यः, आगच्छन्ति, अपि, धनप्राप्त्यर्थम्, कुर्वन्ति, संविधानम्, नियमः। |

| | | |
|---|---|---|
| 4.अ | **मञ्जूषाप्रदत्तपदैःरिक्तस्थानानि** पूरयित्वा अधोलिखितसंवादं पुनः लिखत- | **5x1=5** |

छात्राः— (i) ——————————————————————।

आचार्यः —स्वस्ति, यशस्विनः भवत।

आरुषः —-मया श्रुतं यत् श्वः आरभ्य सद्यस्कमाध्यमेन (ऑनलाइन) कक्षा भविष्यति, किमर्थम्?

आचार्यः - (ii) ——————————————————।

मोहितः—— अस्माकं कक्षाध्यापिका चर्चायां सामान्यरूपेण अकथयत् यत् कदाचित् श्वः आरभ्यः गृहात् एव कक्षा स्वीकरणीया भवेत् इति।

आचार्यः ——भवतां कक्षाध्यापिका सम्यक् सूचितवती। ह्यः वायुगुणवत्ता-सूचकाङ्कः महतीं वृद्धि प्राप्नोत् तस्मात् सर्वकारः जनानां स्वास्थ्यरक्षणाय सद्यस्कमाध्यमेन गृहात् एवं पठितुं कार्यं कर्तुं च निर्देशम् अयच्छत्।

नव्या (iii) ————————————————————————।

आचार्यः —- सत्यं कथयति, वयं शिक्षकाः अपि साक्षात् कक्षायाम् आगत्य पाठयितुम् इच्छामः ।

भूमिका (iv) ————————————————————————।

आचार्यः -इदानीं तु ईश्वरः एव जानीयात्। यदा प्रदूषणस्य निवारणाय प्रकृतेः च संरक्षणाय वयं जागरुकाः भविष्यामः तदा एव अग्रे एतादृशी विकटा स्थितिः नैव आगमिष्यति।

छात्राः —वयं प्रणं कुर्मः यत् वयं पर्यावरण रक्षणाय निरन्तरं प्रयासरताः भविष्यामः।

आचार्यः (v) ————————————————————————।

**मञ्जूषा**

1. महोदय! गृहे मनः न रमते, अत्रैव वयं पठने आनन्दम् अनुभवामः ।
2. सत्यं, तदैव इयं वसुन्धरा सुरक्षिता भविष्यति।
3. भवन्तं कः असूचयत्?
4. आचार्य ! प्रणमामः ।
5. पुनः कदा विद्यालये एव कक्षा भविष्यति ?

**अथवा**

**आ.** **मञ्जूषायाः सहायतया अधोलिखितां कथां पूरयित्वा पुनः लिखत-** **(10x½-5)**

एकः मृत्तिका-घटः आसीत्। (i) ——उपरि स्थितः शरावः यः घटस्य मुखम् आच्छादयति,सः एकदा घटम् अपृच्छत्- मित्र घट! मम (ii) ——- एकः प्रश्नः अस्ति। इदानीं(iii) ———-अस्ति। यत् किमपि पात्रं यदा भवतः समीपम् आगच्छति तदा भवान् तत्पात्रे(iv) ———जलेन परिपूरयति। तानि सर्वाणि पात्राणि जले स्वीकृत्य तृप्तानि भवन्ति। भवन्तम्एकाकिनं विहाय दूरं गच्छन्ति। (v) ——— स्वार्थपरायणानि सन्ति, तथापि भवान् तेभ्यःशीतलं जलं प्रदाय तेषु (vi) ——— करोति। अहं सर्वदा भवता सह एव तिष्ठामि कदापि भवन्तं (vii) ———-कुत्रापि न

| | | |
|---|---|---|
| | गच्छामि परन्तु भवान् मह्यं कदापि बिन्दुमितम् अपि जलं न यच्छति, किमर्थम्? तदा स्मितं कुर्वन्घटः (viii) ———अवदत् -एतस्य कारणं भवतः प्रकृतिःअस्ति। तानि सर्वाणि पात्राणि शिरः अवनम्य जलं याचन्ते अहञ्च तेषाम् इच्छां पूरयामि परं भवान् तु सर्वदा मम (ix) ——— - एव तिष्ठति तर्हि कथम् अहं भवते जलं दद्याम्? भवान् अपि शिरः अवनम्य (x) ——— याचनां करोतु, अहं भवन्तम् अपि निराशं न करिष्यामि।<br><br>त्यक्त्वा, घर्मकालः, शिरसि, शीतलेन, मनसि,<br>अनुग्रहम्, घटस्य, मन्दस्वरेण, तानि, जलार्थम् | |
| | | |
| | **'ग' भागः**<br>**अनुप्रयुक्तव्याकरणम् (25अङ्.काः)** | |
| | | |
| 5. अ | **अधोलिखितवाक्येषु रेखाङि.कतपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>(i) स्वाध्यायाभ्यसनं चैव वाङ्मय **तपः+ उच्यते।**<br>(ii) राज्ञः स्वस्य **गात्रेष्वपि** निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।<br>(iii)मधुमासे कोकिलः **पं+चम**- स्वरेण गायति।<br>(iv)विषयान् ध्यायतः पुंसः **सङ्गस्तेषु** उपजायते।<br>**अथवा**<br>**अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>(i) तेषु **केचित् + दग्धाः** केचिद् अर्धदग्धाः केचन च पञ्चत्वं गताः ।<br>(ii) अये कथं श्रीकृष्णार्जुनौ **युधिष्ठिरश्च?**<br>(iii)मनसः निग्रहम् अहं **वायोः+ इव** सुदुष्करं मन्ये ।<br>(iv)सुस्वागतं भोः **अरुणाचलेऽस्मिन्** । | (4×1=4) |
| आ | | |
| | | |
| 6 | **अधोलिखितवाक्येषु रेखाक्तिपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत-**<br>(i) पञ्चशतानां बौद्धभिक्षूणां **निवासयोग्या** स्थली इयम् ।<br>(क) निवासं योग्या। (ख) निवासस्य योग्या<br>(ग) निवासेन योग्या। (घ) निवासाय योग्या<br>(ii) कलशपातशब्देन प्रबुद्धौ तौ **जाया च पतिः च** आश्चर्यचकितौ आस्ताम्। | (4x1=4) |

| | | |
|---|---|---|
| | (क) जायापती (ख) जायापति:<br>(ग) दम्पती। (घ) दमपति:<br>(iii) प्रकृतिमाता **सस्नेहं** सर्वान् बोधयति ।<br>(क) स्नेहम् अनतिक्रम्य। (ख) स्नेहेन सहितम्<br>(ग) स्नेहस्य अभावः। (घ) स्नेहस्य योग्यम्<br>(iv) पितुः उपदेशेन **न सन्तुष्टः** सः एकदा द्वारिकापुरीम् आगच्छत् ।<br>(क) असन्तुष्टः (ख) अनुसन्तुष्टः<br>(ग) सन्तोषसहितः (घ) नसन्तुष्टः | |
| | | |
| 7. | **अधोलिखितवाक्येषु रेखाङ्.कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत -**<br>(i) भवतः **दानवीर + तल्** आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि।<br>(क) दानवीरताम्। (ख) दानवीरता<br>(ग) दानवीरत्वम्। (घ) दानवीरा<br>(ii) कथं **मन्दभाग्या** अहं धैर्यं धारयामि।<br>(क) मन्दभाग्य+तल् (ख) मन्दभाग्य+त्व<br>(ग) मन्दभाग्य+ टाप् (घ) मन्दभाग्य+ठक्<br>(iii)अत्र अनेकानि **दर्शनीयानि** स्थलानि सन्ति।<br>(क) दृश्+ तव्यत्। (ख) दृश्+अनीयर्<br>(ग) दृश्+ मतुप्। (घ) दृश्+ठक्<br>(iv)एकदा **भगवान्** बोधिसत्त्व: शिवीनां राजा अभवत्।<br>(क) भग + टाप् (ख) भग+ठक्<br>(ग) भग+ तल्। (घ) भग +मतुप् | **(4x1=4)** |
| | | |

| | | |
|---|---|---|
| 8.अ | **वाच्यानुसार मञ्जूषाया:उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -**<br>माहिका- भूमिके! (i) ————किं लिखसि?<br>भूमिका— माहिके! मया श्लोकाः लिख्यन्ते।<br>माहिका—- त्वं कान् (ii) ———- लिखसि ?<br>भूमिका - मया नीतिश्लोकाः लिख्यन्ते। त्वया अधुना किं (iii) ———— ?<br>माहिका—- अहं संस्कृतकथां पठामि।<br>**मञ्जूषा**<br>श्लोकान्, क्रियते, त्वम्<br>**अथवा** | (3x1=3) |
| आ. | **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत-**<br>(i) पिता पुत्राय क्रीडनकं (दा) ———- ।<br>(ii) शताक्ष्या—————-(गीत) श्रूयन्ते।<br>(iii) (अध्यापक) छात्राः पाठ्यन्ते। | |
| | | |
| 9. | **कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत-**<br>(i) सुखदः—————-(5:30) वादने धावनाय बहिः गच्छति।<br>(ii) नव्या रात्रौ———-(12:15) वादनपर्यन्तं गृहपाठम् अकरोत्।<br>(iii)रुचिरा सायं————(6:45) वादने मन्दिरं गच्छति। | (3x1=3) |
| | | |
| 10. | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत –**<br>(i) ———— मधुरभाषिणी वाणी पुरुषं प्रह्लादयति तथा चन्दनरसः न प्रह्लादयति।<br>(ii) चञ्चलं मनः अभ्यासेन वैराग्येण ————गृह्यते।<br>(iii)आचारः प्रथमो धर्मः ————एतत् विदुषां वचः।<br>(iv)अहं ———-वनं गच्छामि। | (4x1=4) |

| | | |
|---|---|---|
| | **मन्जूषा**<br>इति, तु, च, यथा | |
| | | |
| 11. | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत-**<br>(i) अस्मिन् प्रदेशे पञ्चाशदधिकाः नद्यः **प्रवहति।**<br>(क) प्रवहसि (ख) प्रवहत:<br>(ग) प्रवहन्ति (घ) प्रवहामि<br>(ii) इन्द्रस्य प्रभावेण राज्ञः सत्यपुण्यबलेन एकं चक्षुः **प्रतिष्ठितः** अभवत्।<br>(क) प्रतिष्ठिता (ख) प्रतिष्ठितम्<br>(ग) प्रतिष्ठिताः (घ) प्रतिष्ठितानि<br>(iii) तर्हि न जानासि **भवान्** तस्य मनोवृत्तिम्।<br>(क) त्वम् (ख) भवन्तः<br>(ग) युवाम् (घ) भवन्तौ | **(3x1=3)** |
| | | |
| | **'घ' भागः**<br>**पठितावबोधनम्। (30 अङ्काः)** | |
| 12. | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>अस्ति कर्मपुरनाम्नि नगरे प्रच्छन्नभाग्य-नामधेयः कश्चित् कुमारः। बाल्ये वयसि विद्यापराङ्गमुख: स केनचित् दुष्टबुद्धिनाम्ना चौर्येण सह चौर्यकर्मणि निरतः सञ्जातः। एकदा स दुष्टबुद्धिना सार्धं कस्यचित् श्रेष्ठिनः गेहे धनहरणार्थं ग्रामान्तरं प्रस्थितः।<br>अथ व्रजन्तौ तौ गर्तसङ्कुले मार्गे क्रीडतः कांश्चित् बालकान् प्रेक्ष्य अवदताम् - भो भो बालकाः! कथमत्र नतोन्नते विषमे मार्गे क्रीडथ ? यदि कश्चित् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्। तच्छ्रुत्वा तेषु कश्चित् उद्दण्डः बालकः उवाच —अयि भो ! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ ? अपि इदं श्रेयस्करम् ?<br>**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) कुत्र प्रच्छन्नभाग्य-नामधेयः कश्चित् कुमारः आसीत्?<br>(ii) प्रच्छन्नभाग्यः केन सार्धं धनहरणार्थं ग्रामान्तरं प्रस्थितः ? | **5**<br><br>**(2x1/2=1)** |

| | | |
|---|---|---|
| | (iii) कीदृशः बालकः उवाच ?<br>**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) उद्दण्डः बालकः किम् अकथयत्?<br>(ii) अथ व्रजन्तौ तौ मार्गे क्रीडतः बालकान् दृष्ट्वा किम् अवदताम्?<br>(iii) प्रच्छन्नभाग्यः कदा केन सह च चौर्यकर्मणि निरतः सञ्जातः?<br>**III. (ब) निर्देशानुसारम् उत्तरत -**<br>(i) 'उद्दण्ड: बालकः उवाच' अत्र किं कर्तृपदम् अस्ति?<br>(ii) "स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्।' अत्र क्रियापदं किम्?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत-**<br>(i) 'त्यक्त्वा' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?<br>(ii) 'विषमे' इत्यस्य विशेष्यपदं गद्यांशात् चित्वा लिखत। | **(2x1=2)**<br><br><br><br><br>**(2x1=2)** |
| | | |
| **13.** | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>अवकता यथा चित्ते तथा वाचि भवेद् यदि।<br>तदेवाहुः महात्मानः समत्वमिति तथ्यत: ॥<br>आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः ।<br>तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥<br>**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ।**<br>(i) चित्ते तथा वाचि किं भवेत्?<br>(ii) कः प्रथमो धर्म: ?<br>(iii) किं प्राणेभ्योऽपि विशेषतः रक्षेत्?<br>**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) विदुषां किं वचः?<br>(ii) समत्वं किं भवति?<br>(iii) सदाचारं कथं रक्षेत्? | **5**<br><br><br><br><br>**(2x1/2=1)**<br><br><br><br>**(2x1=2)** |

| | | |
|---|---|---|
| | **III. (अ) निर्देशानुसारम् उत्तरत -**<br>(i) "तदेवाहुः महात्मानः समत्वमिति तथ्यत:" अत्र वाक्ये क्रियापदं किम्?<br>(ii) 'सरलता' इत्यस्य किं समानार्थकं पदं प्रयुक्तम्?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत-**<br>(i) 'प्रथमो धर्मः' इत्यनयोः विशेषणपदं चित्वा लिखत।<br>(ii) 'वाण्याम्' इत्यस्य पर्यायपदं लिखत। | **(2x1=2)** |
| | | |
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>[स्थानम् - सरस्तीरम्। समयः प्रभातवेला। तत्र राजहंसः हंसी च विहरतः। नेपथ्ये काकध्वनिः श्रूयते।]<br>**राजहंसः** -अये! किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का का' शब्दैः वातावरणम् आकुलीक्रियते ?<br>**राजहंसी-** भर्तः! काकात् अन्यः को भवितुमर्हति ? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्।मेध्यम् अमेध्यम् सर्वमेव भक्षयति। कर्णकटुशब्दैः<br>**काकः**—- (प्रविश्य सक्रोधम्) आः किम् उक्तवती भवती? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः ? श्रीवासुदेवस्य वर्णः कीदृशः ? मुग्धे अहं तु अतीव कर्तव्यपरायणः।प्रभाते 'का का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि।<br>**राजहंसः**- हुं! किमनेन? एतत् कार्यं तु कुक्कुटोऽपि करोति।<br>**काकः**— (विहस्य) कुक्कुटः ! अरे अद्य कुतः कुक्कुटाः नगरेषु। अहमेव सर्वत्र सुलभः।<br>**1. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)।**<br>(i) कर्तव्यपरायणः कः अस्ति?<br>(ii) काकस्य वर्णः कीदृशः अस्ति?<br>(iii) काकध्वनिः कुत्र श्रूयते?<br>**II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)।**<br>(i) राजहंसः राजहंसीं किं पृच्छति?<br>(ii) काकः सक्रोधं किं वदति?<br>(iv)राजहंसी भर्तारं किम् उत्तरति? | **5**<br><br><br><br><br><br><br><br><br><br><br><br><br><br>**(2x1/2=1)**<br><br><br><br>**(2x1=2)** |

| | | |
|---|---|---|
| | **III. (अ) निर्देशानुसारम् उत्तरत-**<br>(i) 'पवित्रम्' इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम्?<br>(ii) 'करोति' इति क्रियापदस्य कर्तृपदं किम् अत्र प्रयुक्तम्?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत-**<br>(i) 'वर्णः कृष्णः' इत्यनयोः पदयोः विशेष्यपदं चित्वा लिखत।<br>(ii) 'एतत् कार्यं तु कुक्कुटोऽपि करोति' अस्मिन् वाक्ये क्रियापदं किम् ? | **(2x1=2)** |
| | | |
| **15.** | **रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत-**<br>(i) **अनुद्वेगकरं** वाक्यं वाङ्मयं तपः उच्यते ।<br>(ii) कामः एव **अस्माकं** शत्रुः ।<br>(iii)गगनात् सहस्रशः **उल्काः** भूमौ पतन्ति।<br>(iv)अरुणाचलप्रदेशे अनेके **उत्सवाः** मान्यन्ते ।<br>(v) **दानशालासु** विचरन् राजा अचिन्तयत्। | **(5x1=5)** |
| | | |
| **16.अ.**<br><br><br><br><br><br><br><br><br><br>**आ.** | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत -**<br>**शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।**<br>**ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥**<br>अन्वयः —-शुश्रूषा (i) ——च एव, ग्रहणम् तथा (ii) ————- ऊह-अपोह-अर्थविज्ञानम्, (iii) ———- च (iv) ————( सन्ति) ।<br>**मञ्जूषा –**<br>तत्त्वज्ञानम्, श्रवणम्, धीगुणाः, धारणम् ।<br>**अथवा**<br>**मञ्जूषाया: साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-**<br>**असंशयं महाबाहो । मनो दुर्निग्रहं चलम् ।**<br>**अभ्यासेन तु कौन्तेय! वैराग्येण च गृह्यते ॥**<br>**भावार्थ:- हे महाबाहो। अत्र संशयः नास्ति यत् एतत् (i) ————-अतीव चञ्चलम् अस्ति।** | **(4x1/2=2)** |

| | | |
|---|---|---|
| | **इदं (ii) ————नियन्त्रितं भवति परन्तु यदि वयं पुनः पुनः (iii) —— ———कुर्मः, विरक्ताःच भवामः तदा निश्चयेन एतत् वशीकर्तुं (iv) ——— ——-।**<br><br>**मञ्जूषा**<br><br>बहुकष्टेन, अभ्यासम्, शक्नुमः, मनः | |
| | | |
| **17.** | **अधोलिखितवाक्येषु रेखाङ्.कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br><br>(i) वनौषधीनां तु अयं <u>स्रोतः</u> एव।<br>(क) प्रवाहः (ख) निर्झरः<br>(ग) उद्गमस्थलम् (घ) प्रकारः<br><br>(ii) पवनः <u>स्तब्धः</u> जातः।<br>(क) स्वच्छः (ख) आरब्धः<br>(ग) प्रदूषितः (घ) स्थगितः<br><br>(iii) शिष्यः आचार्यात् <u>पादम्</u> आदत्ते।<br>(क) श्लोकस्य पङ्क्तिः (ख) चतुर्थांशम्<br>ग) चरणम् (घ) ग्रन्थम्<br><br>(iv) राज्ञः नेत्रदान-निश्चयं ज्ञात्वा अमात्याः <u>विषण्णाः</u> अभवन्।<br>(क) खिन्नाः (ख) विमुखाः<br>(ग) चिन्तिताः (घ) प्रसन्नाः | **(4x1=4)** |
| **18.** | **मञ्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत —**<br><br>कस्मिंञ्चित् नगरे चन्द्रः (i) ———— एकः भूपतिः अवसत्। तस्य पुत्राः वानरक्रीडारता: प्रतिदिनं वानरसमूहं (ii) ——— भोज्यपदार्थैः सन्तुष्टं कुर्वन्ति स्म। तत्रैव राजगृहे बालवाहनयोग्यं मेषयूथम् अपि (iii) ———--। तत्र एकः मेषः जिह्वायाः लोलुपतावशात् अहर्निशं महानसं प्रविश्य तत्र यद् वस्तु पश्यति तदेव (iv) ———स्म। ततः पाचकाः यत्किञ्चित् काष्ठं मृत्तिकापात्रं कांस्यपात्रं ताम्रपात्रं वा पश्यन्ति स्म, तेन एवं तं शीघ्रं ताडयन्ति स्म। मेषस्य सूपकाराणां च (v) ———- | **(8x1/2=4)** |

| | | |
|---|---|---|
| | दृष्ट्वा बुद्धिमान् वानरयूथपतिः अचिन्तयत्- "एतेषां कलहो (vi) ———— हिताय नास्ति।" एवं चिन्तयित्वा स: सर्वान् वानरान् आहूय एकान्ते अवदत्- (vii ) ——- प्रतिदिनं मेषेण सह सूपकाराणाम् अयं कलहः नूनम् अस्माकं विनाशस्य कारणं भविष्यति अतः वयत् एतत् (viii) ———त्यक्त्वा वनं गच्छामः। तस्य इमं परामर्शम् अश्रद्धेयं मत्वा रसनास्वादलुब्धाः वानराः गन्तुं सिद्धाः न अभवन्।<br><br>**मञ्जूषा**<br><br>भोः बान्धवाः!, आसीत्, कलहम्, नामकः, राजभवनम्, विविधैः, वानराणाम्, खादति। | |

# संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)
# अभ्यास-प्रश्नपत्रम् -१ (हल सहित)
# कक्षा - दशमी

**अवधिः होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

| | | |
|---|---|---|
| **'क' भागः** | **अपठितावबोधनम्.** | **10 अङ्.का:** |
| **'ख' भाग:** | **रचनात्मककार्यम्** | **15 अङ्काः** |
| **'ग' भाग** | **अनुप्रयुक्तव्याकरणम्** | **25 अङ्.का:** |
| **'घ' भागः** | **पठितावबोधनम्** | **30 अङ्काः** |

3. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
5. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| **भाग-'क'**<br>**अपठित-अवबोधनम्** | | |
|---|---|---|
| 1 | **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**<br>'शरीरं खलु धर्मसाधनं' प्रसिद्धा एषा सूक्तिः। यदि वयं स्वस्थाः भवामः तदैव जगति बहुविधकार्याणि कर्तुं शक्नुमः। धर्मपालनाय चापि आरोग्यम् तु आवश्यकमेव। संस्कृतसाहित्ये अस्ति एकः आयुर्वेदस्य महान् ग्रंथः यस्मिन् स्वास्थ्यविषये विस्तरेण सर्वं लिखितम्। अस्य ग्रंथस्य नाम 'चरक संहिता' इत्यस्ति। महर्षिः चरकः च अस्य रचनाम् अकरोत्।अस्य महत्त्वम् अद्यापि तादृशम् एव वर्तते यथा पुरा | **10** |

| | | |
|---|---|---|
| | आसीत्।उत्तमस्वास्थ्यप्राप्तये अनेके नियमा: अस्मिन् दत्ता:। वयं प्रात:काले सूर्योदयात् पूर्वमेव जागृयाम।स्वच्छेन जलेन स्नानं कृत्वा स्वच्छानि वस्त्राणि एव धारयेम।क्षुधां विना कदापि भोजनं न कुर्याम।उत्तमस्वास्थ्याय नियमितं व्यायामम्, संतुलितं सद्य:कृतं भोजनं च अनिवार्यम् अस्ति।<br>रात्रौ पर्याप्तं निद्रा, मनस: शांति:, पवित्रता , वाण्या: मधुरता ,सर्वान् जन्तून् प्रति स्नेहभावना चापि मनुष्यं शारीरिकमानसिकदृष्ट्या स्वस्थं सुदृढं च करोति ।स्वस्था: जना: एव आत्मोन्नतिं कुर्वन्ति देशस्य प्रगत्यां च अपि योगदानं कर्तुं समर्था: भवन्ति।<br>**प्रश्ना:**<br>**अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ।**<br>I. कीदृशा: जना: बहुविधकार्याणि कर्तुं समर्था: भवन्ति?<br>II. चरकसंहिता कस्य विषयस्य ग्रंथ:?<br>III. चरकसंहिताया: रचनाकार: क: अस्ति ?<br>**आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>I. वयं प्रात:काले कदा उत्तिष्ठेम ?<br>II. मनुष्यस्य शरीरं मन: च किं किम् स्वस्थं सुदृढं च करोति?<br>III. स्वस्था: जना: किं कर्तुं समर्था: भवन्ति ?<br>**इ. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।**<br>**ई .निर्देशानुसारम् उत्तरत-**<br>**1. प्राचीनकाले**—- इत्यस्य पदस्य पर्यायपदं लिखत।<br>(अ) अद्यापि (ब) प्रात:काले<br>(स) पुरा (द) आरोग्यम्<br>2. 'अस्य महत्त्वम् अद्यापि तादृशम्………………।' अस्मिन् वाक्ये '**अस्य**' इति पदं कस्मै प्रयुक्तम्?<br>(अ) चरकाय (ब) स्वास्थ्याय<br>(स) जनाय (द) ग्रंथाय<br>3. '**जागृयाम**' इति क्रियापदस्य कर्तृपदं किम् अस्ति?<br>(अ) जना: (ब) वयम्<br>(स) मनुष्य: (द) स्वस्थ: | <br><br><br><br><br><br><br><br>**(2x1=2)**<br><br><br><br>**(2×2=4)**<br><br><br><br>**(1)**<br>**(3x1=3)** |
| | | |

| 'ख' भागः<br>रचनात्मकलेखनम् (15 अङ्काः) | | |
|---|---|---|
| 2 | **2. पित्रा पुत्रीं प्रति लिखितम् अधः दत्तं पत्रं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायां लिखत।**<br><br>पिता, लेखितुम्, नवदिल्ली,अप्रैलमासे, वार्षिक्य:,करोमि, सहायता, पठने , आशीर्वादा:, उत्तराणि<br><br>23-सी ,जनकपुरी<br>1.——————————<br>दिनांक:- 25-9-2025<br><br>प्रिय पुत्रि!महिमे!<br>2.——————-।<br>आशासे त्वं तत्र सकुशला असि। कार्यबाहुल्यात् बहुदिनेभ्य: तुभ्यं पत्रं 3——-नाशक्यम्।किंतु अहं सदैव तव चिंतां 4.—————-। तव 5.—————परीक्षा: अग्रिममासे भविष्यन्तीति ज्ञातम्। तदर्थं निरंतरं 6.—————निरता: भूया: । सम्यक् रूपेण सर्वेषां विषयाणाम् अध्ययनं कुरु अवधानेन सह च प्रश्नानाम् 7.———- लिखे:। यदि कापि 8.————— अपेक्ष्यते, सपदि माम् पत्रं लिखे:।<br>9.—————- अहं गृहमागमिष्यामि। शुभमस्तु।<br>तव 10.————<br>अभिनीत: | (1/2x10=5) |
| | | |

| | | |
|---|---|---|
| 3.अ | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पंच वाक्यानि संस्कृतेन लिखत-**<br><br>**मञ्जूषा—-**<br>चिकित्सालयः, वृद्धः, चिकित्सकाः, रुग्णान्, सहायिका,बालिका, क्रोडे, आसन्दिकायाम्, स्वास्थ्याय,प्रावारम्, स्पंदमापनयंत्रम् | **(5x1-5)** |
| आ. | **अथवा**<br>**मञ्जूषायां प्रदत्तपदानाम् सहायतया निम्नलिखितम् विषयम् अधिकृत्य पंचभि: संस्कृतवाक्यै: एकम् अनुच्छेदं लिखत-**<br>**''अस्माकं देश:''**<br>**मञ्जूषा—-**<br>विशालः, उत्तरस्यां , हिमालयः, सागरः, शस्यश्यामला, प्रदेशाः, भाषाः, जन्मभूमिः, रक्षा, मुनयः, वेदाः, पालनं करोति | |
| | | |
| 4.अ | **मञ्जूषाप्रदत्तपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत-**<br>वैदेही— अधुना विश्वस्य गुरुतमा समस्या का अस्ति ?<br>मैथिली— (1) ————————————।<br>वैदेही—- अद्य संसारे अशांते: 2) ———— कारणानि कानि सन्ति?<br>मैथिली- 3) ——————— ।<br>वैदेही—— किं जना: परस्परं स्नेहेन जीवनं4) ————- नेच्छन्ति? ? | **(1/2x10=5)** |

| | | |
|---|---|---|
| | मैथिली—- न हि , अपितु ते निजतुच्छस्वार्थपूर्तये (5) ———— अपि मारयन्ति।<br>वैदेही—सत्यम्, धनस्य 6) ——— विवेकं नश्यति ।<br>मैथिली —- तदैव अस्माकं संस्कृति: सदैव सर्वेभ्य: 7.) ————कार्यं कर्तुं शिक्षयति।<br>वैदेही — आम् , विश्वबंधुत्वं प्रति च 8) ————-।<br>मैथिली- भारतीया संस्कृति: 9) ————- शांते: च संदेशं प्रचारयति।<br>वैदही- त्वं सत्यं वदसि, वयम् एकत्रीभूय एव जीवनस्य 10) ———- अनुभवितुं शक्नुम:।<br><br>हितकारि ,अशांति:,आनन्दम्,अहिंसाया: निर्दोषजनान्,लिप्सा, प्रमुखानि,यापयितुं, स्वार्थपरतावैमनस्यादीनि,प्रेरयति<br><br>**अथवा**<br>**अधोलिखितां कथां, मञ्जूषायां दत्तानां पदानां सहायतया पूरयित्वा पुनः लिखत -**<br>भारतस्य इतिहासपृष्ठेषु सर्वथा अमरा अस्ति (क) ————- लक्ष्मीबाई। तस्य बाल्यकालस्य नाम 'मनू:' आसीत् सा च मोरोपन्त-ताम्बेमहोदयस्य (ख) ———— - आसीत्। 1835 तमे ईसवीये वर्षे वाराणस्यां जाता 'मनू:' शैशवे एव (ग) ——— —अभवत् । मोरोपन्तः ताम् आदाय पेशवाबाजीरावं (घ) ————आगत:। तस्य पुत्र: 'नानासाहबः' तस्याः अग्रजः इव (ङ) ———- आसीत्। सा तेन सहैव कुन्त-कृपाणचालनं भुषुण्डिप्रयोगं च (च) ———— । (छ) ————-मन्वाः झाँसीनरेशेण गङ्गाधररावेण सह विवाहः अभवत् । यथाकालं तस्याः एकः पुत्रः अजायत किंतु दुर्भाग्येण सः (ज) ———- एव दिवंगतः। तदा राजा 'दामोदरराव' इत्याख्यम् एकं बालकं दत्तकपुत्ररूपेण स्वीकृतवान् । परंतु महाराजः गंगाधररावः स्वयमेव कतिपयदिनान्तरं (झ) ————- प्राप्तः । पुत्रपतिशोकविह्वला दुखिता लक्ष्मीबाई, स्वराज्यरक्षणार्थं आङ्ग्लशासकैः सह युद्धमारभत। तस्याः वीरत्वं दृष्ट्वा शत्रवः अपि चकिताः आसन्। अन्ते, मातृभूम्यै सा (ञ) ———— लब्धवती। वयं तां श्रद्धया नमामः । | **(1/2×10=5)** |

| | | |
|---|---|---|
| | **मञ्जूषा**<br>वीरगतिम्,मातृविहीना,आत्मीयः, युवत्या:,निकषा, मासत्रयेण,सुता, शिक्षितवती, मृत्युं, वीरबाला | |
| | | |
| | **'ग' भाग:**<br>**अनुप्रयुक्तव्याकरणम् (25अङ्.का:)** | |
| | | |
| **5. अ** | **अधोलिखितवाक्येषु रेखांकितपदेषु संधिं संधिविच्छेदं वा कुरुत-**<br>i. **गुरो:+भाषणं** श्रुत्वा कपय: अहसन्।<br>ii. **दिक्+गजा:** अपि ईश्वरं नमन्ति।<br>iii. **पितृ+आदेशं** श्रुत्वा राम: वनम् अगच्छत्।<br>iv. **प्रिय+छात्रा:!** सुस्वागतम् अरुणाचले।<br>**अथवा**<br>1. **हरये** स्वाहा।<br>2. यस्य मानसं शुद्धं, स: **शुचिरिह।**<br>3. साधु: **दं+डं** गृहीत्वा चलति।<br>4. **बालो + अपि** खेलति। | **(4x1=4)** |
| | | |
| **6** | **अधोलिखितवाक्येषु रेखांकितपदानाम् समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत**<br>i. **न ऋतं** वदेत् यदि काक: दशेत्।<br>(अ) अऋतम् (ब) अनारतम्<br>(स) अनृतम् (द) अनऋतम्<br>ii. **आशया अन्वित:** अहं त्वत्समीपमुपागत: अस्मि।<br>(अ) आशान्वित: (ब) आशयान्वित:<br>(स) आशन्वित: (द) आशाअन्वित:<br>iii. दुष्टबुद्धि: कलशे **भयङ्.करं** सर्पं दृष्टवान् ।<br>(अ) भयं कर्ता (ब) भयं करोति इति<br>(स) भयान् करोति इति (द) भयं कारयति इति | **(4x1=4)** |

| | | |
|---|---|---|
| | iv. तौ **<u>पार्वती च परमेश्वर: च</u>** कृपां कुरुताम्। ।<br>(अ) पार्वत्यौ (ब) पार्वतीपरमेश्वरा:<br>(स) पार्वतीपरमेश्वरौ (द) पार्वतीपरमेश्वर: | |
| | | |
| 7. | **अधोलिखितवाक्येषु रेखांकितपदानाम् प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरम् प्रदत्तविकल्पेभ्य: चित्वा लिखत -**<br>1. वाण्या: **<u>(मृदु+तल्)</u>** शत्रुम् अपि जयति।<br>(अ) मृदुता (ब) मृदुताम्<br>(स) मृदुलता (द) मृदुत्वम्<br>2. सा कन्या प्रतियोगितायां **<u>(विजेतृ +ङीप्)</u>** अभवत्।<br>(अ) विजेती (ब) विजेत्री<br>(स) विजेतरी (द) विजेत्रि:<br>3. **<u>बलवद्भि:</u>** जनै: सह मित्रता न उचिता।<br>(अ) बल+ वतुप् (ब) बलवत्+ वतुप्<br>(स) बलवान+ मतुप् (द) बलवत्+अभि:<br>4. अरुणाचलस्य प्रकृति: **<u>मनोहरा</u>** अस्ति।<br>(अ) मनोहर+ ङीप् (ब) मनोहारी+टाप्<br>(स) मन+हरा (द) मनोहर+टाप् | **(4x1=4)** |
| | | |
| 8.अ | **वाच्यानुसारम् मञ्जूषाया: उचितपदानि चित्वा, रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत-**<br>सुधा- मणिके! कक्षायां त्वम् कुत्र तिष्ठसि?<br>मणिका – मया तु अत्र एव ——————।<br>सुधा- कि त्वं पुस्तके कथां पठसि?<br>मणिका- आम्, मया प्रतिदिनं ——————- पठ्यते।<br>सुधा- कि श्रुति: श्यामपट्टे दिनाङ्.कं लिखति?<br>मणिका- आम्, ——————— दिनाङ्.कं लिख्यते। | **(3x1=3)** |

| | | |
|---|---|---|
| | **मञ्जूषा—**<br>तया, स्थीयते, कथा<br>**अथवा**<br>1. संदीप: मात्रे फलं (दा) ——————-।<br>2. देशभक्तै: देशस्य (सेवा) ————क्रियते।<br>3. (भूमि) ————-जलदानं क्रियते। | |
| | | |
| 9. | **कालबोधकशब्दै: अधोलिखितां दिनचर्यां पूरयत-**<br>1. अनिल: प्रात: ——————-(5.15) उत्तिष्ठति।<br>2. ——————- (6) वादने स: प्रातराशं करोति।<br>3. स: —————-(7.30) वादने विद्यालयं गच्छति। | **(3x1=3)** |
| | | |
| 10. | **मञ्जूषाया: चित्वा उचितै: अव्ययपदै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत।**<br>**मंजूषा—**<br>वृथा, नूनम्, पुरा, इव<br>1. धन्यं क) ————— महापुरुषा: येषां यश: सूर्य: ख) ——————-प्रकाशते।<br>2. कुपात्राय दत्तं दानं ग) ——————— भवति।<br>3. महाकवि: वाल्मीकि: घ) —————- अभवत् परम् अद्यापि तस्य कीर्ति: प्रसरति। | **(4x1=4)** |
| | | |
| 11. | **अधोलिखितवाक्येषु रेखांकित-अशुद्धपदाय उचितपदानि चित्वा वाक्यानि पुन: लिखत-**<br>1. <u>**त्रय:**</u> ललना: जलम् आनयन्ति।<br>(अ) त्रीणि (ब) तिस्र:<br>(स) त्रीन् (द) त्रयान् | **(3x1=3)** |

| | | |
|---|---|---|
| | 2. बाला: गुरून् **नमिष्यन्ति**।<br>(अ) नमिस्यन्ति (ब) नंस्यन्ति<br>(स) नमेष्यन्ति (द) नमिश्यन्ति<br>3. भवन्त: कुत्र **वसथ?**<br>(अ) वससि (ब) वसति<br>(स) वसथ: (द) वसन्ति | |
| | | |
| | **'घ' भागः**<br>**पठितावबोधनम्। (30 अङ्काः)** | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन्- 'भो ! किमिदम् उच्यते? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्तकषाय कटु रूक्षफलानि भक्षयिष्यामः ।' एतच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान् - 'रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।'<br>अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः ।<br>**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ।**<br>(i) सूपकारेण मेषः केन ताडितः ?<br>(ii) वानराः कीदृशान् उपभोगान् परित्यज्य वनं गन्तुं न इच्छन्ति स्म ?<br>(iii) वानरा: कीदृशा: आसन्?<br>**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) .**<br>(i) अटव्यां कीदृशाणि फलानि प्राप्यन्ते ?<br>(ii) तृणेषु वह्निज्वालाः कथं समुत्थिताः ?<br>(iii) मेष: केन कथं च ताडित:?<br>**III. (अ) निर्देशानुसारम् उत्तरत -**<br>(i) ''वह्निना जाज्वल्यमानशरीरः मेषः" इत्यत्र विशेषणपदं किम्?<br>(ii) 'भूमौ' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ? | **5**<br><br>**(1/2x2=1)**<br><br>**(1x2=2)**<br><br>**(1x2=2)** |

| | | |
|---|---|---|
| | **अथवा**<br>(i) 'प्रविशति' इति क्रियापदस्य कर्तृपदं गद्यांशात् चित्वा लिखत ।<br>(ii) 'रुदनं कृत्वा' इत्यस्य पदस्य विपरीतार्थकं अनुच्छेदात् चित्वा लिखत। | |
| | | |
| 13. | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।<br>पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥<br>त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।<br>परित्यज्य फलं पक्वं भुङ्.क्तेऽपक्वं विमूढ़धी:।।<br>**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ।**<br>(i) पिता पुत्राय किं यच्छति ?<br>(ii) विमूढ़धी: कीदृशं फलं खादति ?<br>(iv) पुत्रः कां प्रकटयति ?<br>**II पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) पिता पुत्राय किं करोति ?<br>(ii) बुद्धिमन्त: जना: कीदृशीं वाणीं वदन्ति ?<br>(iii) पुत्र: स्व-कृतज्ञतां कथं प्रकटयति?<br>**III. (अ) निर्देशानुसारम् उत्तरत -**<br>(i) "पिताऽस्य किं तप: तेपे" अस्मिन् वाक्ये क्रियापदं किम्?<br>(ii) ' वदेत्' अस्मिन्नर्थे श्लोके किं पदम् आगतम्?<br>**अथवा**<br>(i) महत्- इदं पदं कस्य विशेषणम्?<br>(ii) भुङ्.क्ते- अस्य क्रियापदस्य कर्ता क: ? | **5**<br><br><br><br><br><br>**(2x1/2=1)**<br><br><br><br>**(2x1=2)**<br><br><br><br>**(2x1=2)** |
| | | |
| 14. | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**<br>मयूरः (प्रविश्य साट्टहासम्) सत्यं सत्यम्। अहमेव राष्ट्रपक्षी। को न जानाति तव ध्यानावस्थाम् ? मौनं धृत्वा वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि। धिक् त्वाम्। अवमानितं खलु सर्वं पक्षिकुलं त्वया।<br>काकः —रे सर्पभक्षक ! नर्तनात् अन्यत् किम् अपरं जानासि ? | **5** |

| | | |
|---|---|---|
| | मयूरः— श्रूयताम्, श्रूयताम् ! मम नृत्यं तु प्रकृतेः आराधना। पश्य ! चारुवर्तुलचन्द्रिकाशोभितानां मम पिच्छानाम् अपूर्वं सौन्दर्यम्। मम केकारवं श्रुत्वा कोकिलः अपि लज्जते। मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव अहं पक्षिराजः कृतः । | |
| | **I एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)**<br>(i) राष्ट्रपक्षी कः अस्ति ?<br>(ii) काकः 'सर्पभक्षक' इति कथयित्वा कं सम्बोधयति ?<br>(iii) कोकिलः किं श्रुत्वा लज्जते ? | **(1/2x2=1)** |
| | **II पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(i) बकेन पक्षिकुलं कथम् अवमानितम् ?<br>(ii) मयूरस्य शिरसि किम् अस्ति ?<br>(iii) मयूर: केन पक्षिराज: कृत:? | **(2x1=2)** |
| | **III यथानिर्देशम् उत्तरत।**<br>(i) 'अपमानितम्' अस्मिन्नर्थे अत्र किं पदं प्रयुक्तम्?<br>(ii) 'जानाति' अस्य क्रियापदस्य कर्तृपदं किम् अस्ति?<br>**अथवा**<br>(i) 'कोकिल:' अस्य कर्तृपदस्य क्रियापदं किम्?<br>(ii) 'वराकान्' अस्य विशेषणस्य विशेष्यपदं किम् अस्ति? | **(2x1=2)** |
| | | |
| **15.** | **रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -**<br>1. **आर्तानां** परित्राणाय एव मे निश्चय:।<br>2. बक: **वृष्टे:** अभिनन्दनं करोति।<br>3. दुष्टबुद्धि: प्रच्छन्नभाग्यस्य गृहे **मध्यरात्रे** अतिष्ठत्।<br>4. ज्वलन् मेष: **अश्वशालां** प्रविशति।<br>5. अभीष्टवस्तूनि प्राप्य **याचका:** संतुष्टा: अभवन्। | **(5x1=5)** |
| | | |

| | | |
|---|---|---|
| 16.अ. | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत-**<br>अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।<br>अनिच्छन्नपि वार्ष्णेय ! बलादिव नियोजितः ।।<br>अन्वयः (i) ——-! अथ केन प्रयुक्तः अयं पुरुषः (ii) ——— अपि<br>(iii) ————-नियोजितः इव (iv) ————- चरति।<br>**मञ्जूषा -**<br>अनिच्छन्,पापं, वार्ष्णेय,बलात् | (4x1/2=2) |
| आ. | **अथवा**<br>**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा उत्तरं पुनः लिखत –**<br>चंचलं हि मनः कृष्ण! प्रमाथि बलवद्दृढ़म्।<br>तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।।<br>भावार्थ:- हे कृष्ण! इदं (i) —————— तु अतीव चंचलम् अस्ति, शरीरम् इन्द्रियाणि च (ii) ————- मथ्नाति। तस्य निग्रहं अहं (iii) —————— नियंत्रणम् इव —————(iv) मन्ये।<br>**मञ्जूषा -**<br>कठिनम्, मनः, वायोः , बलपूर्वकं | |
| | | |
| 17. | **अधोलिखितवाक्येषु रेखाक्तिपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br>(i) मीनान् छलेन **अधिगृह्य** क्रूरतया भक्षयसि।<br>( क) दृष्ट्वा (ख) आहूय<br>(ग) गृहीत्वा (घ) कथयित्वा<br>(ii) **हर्म्याणि** कलहान्तानि भवन्ति।<br>( क) प्रासादानि (ख) मित्राणि<br>(ग) राष्ट्राणि (घ) शासनानि | (4x1=4) |

| | | |
|---|---|---|
| | (iii) भो वीरौ! संहरतम् **<u>संहरतम्</u>** निजास्त्रे।<br>(क) संहारं कुर्वन्तु (ख) प्रतिनिवर्तयतम्<br>(ग) चोरयन्तु (घ) हरन्तु<br>(iv) यथा **<u>अवक्रता</u>** चित्ते, तथा एवं वाचि भवेत्।<br>(क) सत्यम् (ख) भक्ति:<br>(ग) ऋजुता (घ) वीरता | |
| **18.** | **मञ्जूषाया: पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत-**<br>विद्याविमुख: प्रच्छन्नभाग्य: (i) ————- सह चौर्यकर्मणि संलग्न: संजात:।एकदा विषमे मार्गे (ii) ———— गच्छन्तौ तौ एकेन बालकेन गर्हितौ।बालवचसा समुपजातविवेक: प्रच्छन्नभाग्य: गृहं (iii) ———दुष्टबुद्धि: च एकाकी एव चौर्यार्थं प्रस्थित:।गृहमागत: (iv) ———-उपदिष्ट: प्रच्छन्नभाग्य: विलापं विहाय कस्यचित् कृषकस्य क्षेत्रे कृषिकार्यम् आरभ्य शनै:-शनै: धनिक: संजात:। तस्य धनागमवृतान्तं श्रुत्वा दुष्टबुद्धि: तस्य एव गृहे चौर्यार्थं (v) ———- अकरोत्। स: तत्र प्रच्छन्नभाग्यस्य मुखेन स्वप्नस्य वार्ताम् श्रुत्वा क्षेत्रम् अगच्छत् (vi) ------ च प्राप्तवान्। कलशे एक: भयंकर: सर्प: आसीत्। सर्पेण मित्रं (vii) ——— इच्छन् दुष्टबुद्धि: कलशं तस्य गृहे क्षिप्तवान्।पतितात् कलशात् बहूनि (viii) —————नि:सृतानि प्रच्छन्नभाग्यस्य गृहे च पतितानि। संधित: सर्पश्च निर्गत्य दुष्टबुद्धिं दष्टवान्।<br>**मञ्जूषा—**<br>मणिमाणिक्यानि,भार्यया,मारयितुम्,दुष्टबुद्धिना,प्रत्यागतवान्,चौर्यार्थम्, सुवर्णकलशम्,संधिखननम् | **(8x1/2=4)** |

# उत्तरमाला-1
# अभ्यास प्रश्न-पत्र-1
# संस्कृतम् (सम्प्रेषणात्मकम्) (कोड सङ्ख्या-119)

| खण्ड'क'<br>अपठितावबोधनम् | | |
|---|---|---|
| 1 | **गद्यांश:**<br>**(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम् )**<br>**i. स्वस्था:**<br>**ii. आयुर्वेदस्य/स्वास्थ्यविषयस्य**<br>**iii. चरक:**<br>**(आ) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम् )**<br>i. वयं प्रात:काले सूर्योदयात् पूर्वमेव उत्तिष्ठेम।<br>ii. नियमितं व्यायामम्,संतुलितं सद्य:कृतं भोजनम्,रात्रौ पर्याप्तं निद्रा,मनस: शांति:, पवित्रता,वाण्या: मधुरता, सर्वान् जन्तून् प्रति स्नेहभावना च मनुष्यस्य शरीरं मन: च स्वस्थं सुदृढं च करोति।<br>iii. स्वस्था: जना: बहुविधकार्याणि धर्मपालनं चापि कर्तुं समर्था: भवन्ति।<br>**(इ) शीर्षकप्रदानम्——शरीरं खलु धर्मसाधनम्/ चरकसंहिता/ उत्तमस्वास्थ्यस्य महत्त्वम् (अथवा अन्य: कोऽपि उपयुक्त: शीर्षक:)**<br>**(ई) यथानिर्देशम् उत्तरत-**<br>1. पुरा<br>2. ग्रंथाय<br>3. वयम् | **10**<br>**(1×2-2)**<br><br><br><br>**(2×2=4)**<br><br><br><br>**(1)**<br>**(3x1=3)** |
| | | |

| 'ख' भागः<br>**रचनात्मकलेखनम्** | | |
|---|---|---|
| **2** | **पत्रलेखनम्।**<br>१.नवदिल्ली  २. आशीर्वादा:  ३.लेखितुम्  ४. करोमि<br>५. वार्षिक्य:  ६. अध्ययने  ७.उत्तराणि  ८.सहायता<br>९.अप्रैलमासे  १०. जनक: | **(1/2x10=5)** |
| | | |
| **3.** | **चित्र-वर्णनम्**<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति । वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति । प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरण दृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति । छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति । मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते ।<br>**चित्र-वर्णनम्-**<br>1. एतत् एकस्य चिकित्सालयस्य चित्रम् अस्ति।<br>2. चित्रे एक: रुग्ण: वृद्ध: शय्यायां तिष्ठति।<br>3. अत्र एक: चिकित्सक: तस्य समीपे तिष्ठति ।<br>4. एका महिला एकया बालिकया सह आसन्दिकायां तिष्ठति।<br>5. तस्या: समीपे एका चिकित्सिका अस्ति यस्या: हस्ते कानिचित् पत्राणि सन्ति ।<br>**अथवा**<br>**अनुच्छेद लेखनम्—**<br>अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति । अतः अङ्काः देयाः । अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः। | **(5x1-5)** |

| | | |
|---|---|---|
| | **अनुच्छेद लेखनम्—। 'अस्माकं देश:'**<br>1. अस्माकं देश: भारतवर्षम् अस्ति।<br>2. भारतस्य उत्तरे पर्वतराज: हिमालय: अस्ति।<br>3. अत्र गंगा- यमुना -प्रभृतय: नद्य: वहन्ति।<br>4. भारतस्य संस्कृति: अति प्राचीना गौरवमयी च अस्ति।<br>5. अत्र वेदा:, उपनिषद: ,रामायणम्, महाभारतम् आदय: ज्ञानपूर्णा: ग्रंथा: लिखिता:। | |
| | | |
| **4.** | **संवाद-पूर्ति: ——**<br>1.अशांति: 2. प्रमुखानि 3.स्वार्थपरतावैमनस्यादीनि<br>4.यापयितुम् 5.निर्दोषजनान् 6.लिप्सा 7.हितकारि<br>8. प्रेरयति. 9.अहिंसाया: 10. आनन्दम्<br>**अथवा**<br>**कथा-पूर्ति: ——**<br>१. वीरबाला २. सुता ३.मातृविहीना ४.निकषा<br>५. आत्मीय: ६.शिक्षितवती ७. युवत्याः ८.मासत्रयेण<br>९. मृत्युं १०.वीरगतिम् | **(1×5=5)** |
| | | |
| | **'ग' भाग:**<br>**अनुप्रयुक्तव्याकरणम्** | |
| | | |
| **5.** | **संधिं संधिच्छेदं च। (केवलं प्रश्नचतुष्टयम्)**<br>1. गुरोर्भाषणम् 1. हरे+ए<br>2. दिग्गजा: अथवा 2.शुचि:+इह<br>3. पित्रादेशम् 3.दण्डं<br>4. प्रियच्छात्रा: 4.बालोऽपि | **(4x1=4)** |
| | | |
| **6** | **समस्तपदं विग्रहं च (1x4=4)**<br>1. (स) अनृतम्<br>2. (अ)आशान्वित: | **(4x1=4)** |

| | | |
|---|---|---|
| | 3. (ब) भयं करोति इति<br>4. (द) पार्वतीपरमेश्वरौ | |
| | | |
| 7. | **प्रत्यया:**<br>1. (अ) मृदुता<br>2. (ब) विजेत्री<br>3. (अ) बल+वतुप्<br>4. (द) मनोहर+टाप् | **(4x1=4)** |
| | | |
| 8. | **वाच्य (केवलं प्रश्नत्रयम्) .**<br>अ स्थीयते,कथा, तया<br>**अथवा**<br>**आ** यच्छति, सेवा, भूम्या | **(3x1=3)** |
| | | |
| **9.** | **समय:**<br>1. सपादपंचवादने<br>2. षट्<br>3. सार्धसप्त | **(3x1=3)** |
| | | |
| **10** | **अव्ययपदानि**<br>क) नूनम् ख) इव ग) वृथा घ) पुरा | **(4x1=4)** |
| | | |
| **11** | **अशुद्धिसंशोधनम्**<br>1.(ब) तिस्र:<br>2.(ब) नंस्यन्ति<br>3.(द) वसन्ति | **(3x1=3)** |
| | | |

| 'घ' भागः<br>पठितावबोधनम्। | | |
|---|---|---|
| **12.** | **गद्यांशः** | **5** |
| | **(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ।** | **(1/2×2=1)** |
| | i. अर्धज्वलितकाष्ठेन<br>ii. स्वर्गसमानान्/ स्वर्गसमानोपभोगान्<br>iii. रसनास्वादलुब्धा: | |
| | **(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) ।** | **(2)** |
| | i. अटव्यां क्षार-तिक्तकषाय-कटु-रुक्षफलानि प्राप्यन्ते।<br>ii. जाज्वल्यमानशरीरस्य मेषस्य क्षितौ प्रलुठत: तृणेषु वह्निज्वाला: समुत्थिता:।<br>iii. मेष: सूपकारेण अर्धज्वलितकाष्ठेन ताडित:। | |
| | **निर्देशानुसारम् उत्तरत** | **(1×2=2)** |
| | 1. जाज्वल्यमानशरीर:<br>2. क्षितौ<br>**अथवा**<br>1. मेष: - कर्तृपदम् अस्ति।<br>2. प्रहस्य- इति विपरीतार्थकं पदमस्ति। | |
| | | |
| **13.** | **पद्यांशः** | **5** |
| | **(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ।** | **(2x1/2=1)** |
| | I. विद्याधनम्<br>II. अपक्वम्<br>III. कृतज्ञताम् | |
| | (आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) । | **(2x1=2)** |
| | 1.पिता पुत्राय बाल्यकाले महत् विद्याधनं यच्छति।<br>2.बुद्धिमन्त: जना: धर्मप्रदां वाणीं वदन्ति।<br>3."मम पिता मह्यं किं तप: तेपे" इति उक्त्वा पुत्र: स्व-कृतज्ञतां प्रकटयति। | |

| | | |
|---|---|---|
| | **निर्देशानुसारम् उत्तरत-**<br>1. तेपे- इति क्रियापदम् अस्ति।<br>2. 'अभ्युदीरयेत्' इदं पदम् आगतम्।<br>**अथवा**<br>1. महत्- इदं पदं 'विद्याधनम्' अस्य पदस्य विशेषणम् अस्ति।<br>2. अस्य क्रियापदस्य कर्ता- 'विमूढ़धी:' इति अस्ति। | **(1x2=2)** |
| | | |
| **14.** | **नाट्यांश:——।**<br>**(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ।**<br>I. मयूर:<br>II. मयूरम्<br>III. केकारवम्<br>**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) ।**<br>I. 'बक: मौनं धृत्वा वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयति' इत्थं/एवम् तेन पक्षिकुलम् अवमानितम्।<br>II. मयूरस्य शिरसि राजमुकुटमिव शिखा अस्ति।<br>III. मयूर: विधात्रा पक्षिराज: कृत:।<br>**निर्देशानुसारम् उत्तरत-**<br>1. 'अवमानितम्' इति पदं प्रयुक्तम्।<br>2. 'जानाति' अस्य क्रियापदस्य कर्तृपदं 'क:' इत्यस्ति।<br>**अथवा**<br>1. कोकिल: - अस्य कर्तृपदस्य क्रियापदं 'लज्जते' इति अस्ति।<br>2. 'वराकान्' अस्य विशेष्यपदं 'मीनान्' इति अस्ति। | **5**<br>**(1/2x2=1)**<br>**(2×1=2)**<br>**(2x1=2)** |
| | | |
| **15.** | **प्रश्ननिर्माणम्—**<br>1. केषाम्  2. कस्या:  3.कदा<br>4. कुत्र  5. के | **(5x1=5)** |
| | | |

| | | |
|---|---|---|
| **16.** | **अ अन्वय-पूर्तिः**<br>१.वार्ष्णेय! २. अनिच्छन् ३. बलात् ४. पापं<br>**अथवा**<br>**आ भावार्थपूर्तिः-**<br>1.मनः २. बलपूर्वकं ३. वायोः ४. कठिनम् | **(4x½=2)** |
| | | |
| **17.** | **प्रसंगानुसारम् उचितार्थचयनम्।**<br>1. (ग) गृहीत्वा 2. (क) प्रासादानि 3. (ख) प्रतिनिवर्तयतम. 4. (ग) ऋजुता | **(4x1=4)** |
| **18.** | **पठितकथापूर्तिः**<br>1.दुष्टबुद्धिना 2. चौर्यार्थम् 3. प्रत्यागतवान् 4.भार्यया 5. संधिखननम्<br>6. सुवर्णकलशं 7. मारयितुम् 8. मणिमाणिक्यानि | **(8x1/2=4)** |

# संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)
# अभ्यास-प्रश्नपत्रम् -2 (हल सहित)
# कक्षा - दशमी

**अवधिः होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

   **'क' भागः अपठितावबोधनम्. 10 अङ्.काः**

   **'ख' भागः रचनात्मककार्यम् 15 अङ्काः**

   **'ग' भाग अनुप्रयुक्तव्याकरणम् 25 अङ्.काः**

   **'घ' भागः पठितावबोधनम् 30 अङ्काः**
3. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
5. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| | | |
|---|---|---|
| | **भाग-'क'**<br>**अपठित-अवबोधनम्** | |
| 1 | **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**<br>काश्मीरप्रदेशः भारतदेशस्य उत्तरभागे मुकुटमणि: इव स्थितः अस्ति। एषः केंद्रशासितप्रदेश: हिमालयस्य मध्ये स्थितः अस्ति। परमरमणीय: मनोहरश्च अयं प्रदेश:। काश्मीरभूमि: मनोरमाणां तडागानाम् , उद्यानानां,निर्झराणां, सरोवराणां च भूमि: अस्ति। श्रीनगरं जम्मू-काश्मीर राज्यस्य ग्रीष्मकालस्य राजधानी अस्ति।नगरम् इदं 'झेलम'नदीम् उभयत: स्थितम् अस्ति। श्रीनगरस्य समीपे डलनाम एकः महान् | **10** |

कासारः अस्ति।तत्र विकसितानि कमलानि जनानां मनांसि बलात् हरन्ति। नगरं परित: शैलानां सौंदर्यम् अद्भुतं प्रतीयते।श्रीनगरे नौका "शिकारा" इति कथ्यते। देश-विदेशीया: पर्यटका: अत्र आगत्य, एतस्यां नौकायाम् उपविश्य जलविहारं कुर्वन्ति ।

पुरा कश्मीरराज्ये बहव: प्रसिद्धा: कवय: यथा कल्हण:, बिल्हण:,अभिनव गुप्त: मम्मटादय:: च अभवन्। अयं प्रदेश: कलाशिल्पादिनां केंद्र: आसीत् अधुना अपि च हस्तकला-शिल्पोद्योगे प्रसिद्ध: अस्ति।

केसरस्य कृषि: अस्य प्रदेशस्य एका महती विशेषता अस्ति। हरिता भूमि:, फलै: आच्छादिता: वृक्षा:, विचित्राणि, विविधवर्णानि पुष्पाणि दृष्ट्वा कस्य चित्तं न प्रसीदति? नूनं पृथिव्या: स्वर्ग: इव प्रतीयते अयं प्रदेश:।

**अ एकपदेन उत्तरत— (केवलं प्रश्नद्वयम्)** **(2x1=2)**

i. काश्मीरप्रदेशः भारतस्य किमिव स्थित: ?

ii. कश्मीर: केषाम् मनांसि हरति?

iii. क: पृथिव्या: स्वर्ग: कथ्यते?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) ।** **(2x2=4)**

i. काश्मीरप्रदेशस्य प्राकृतिकं सौन्दर्यं कीदृशम् अस्ति ?

ii. अस्य प्रदेशस्य महती विशेषता का?

iii. अत्र के विख्याता: कवय: अभवन्?

**इ. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **(1)**

**ई यथानिर्देशम् उत्तरत-** **(3x1=3)**

(1) 'नौकायाम्' इति पदस्य किं विशेषणम् अत्र प्रयुक्तम् ?

(अ) अनुपमम् (ब) एतस्याम्

(स) कासार: (द) उपविश्य

(2) 'हरन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(अ) मनांसि (ब) विकसितानि

(स) जनानाम् (द) कमलानि

(3) 'पर्वतानाम्' अस्मिन् अर्थे गद्यांशे किं पदम् आगतम् ?

(अ) शैलानाम् (ब) निर्झराणाम्

(स) तडागानाम् (द) उद्यानानाम्

| 'ख' भागः<br>रचनात्मकलेखनम् (15 अङ्काः) | | |
|---|---|---|
| 2 | **भवान् अथर्वः अस्ति। गतमासे भवान् स्वविद्यालयात् सहपाठिभिः सह अनाथालयं गतवान्। तत्रत्यान् अनुभवान् वर्णयन्, स्वानुजां प्रति लिखितम् इदं पत्रं, मञ्जूषायाः पदानि चित्वा पूरयत-**<br>**मञ्जूषा—**<br>क्रीत्वा,भगिनि, दृढ़निश्चयः ,अभावे, बालानाम्, कानपुरतः, छात्राणाम्, सहायकः, उपहारं, प्रमुदिताः<br>**छात्रावासः**<br>नवोदय: विद्यालय:<br>(1) ——————-<br>तिथि:<br><br>प्रिय(2) ——- सान्वि!<br>स्नेहाशीष:।<br>अत्र सर्वगतं कुशलम्। आशासे त्वमपि कुशला असि।गतमासे मम विद्यालयात् 3) ——एकः समूहः अनाथालयं प्रेषितः। अहमपि तेषु आसम्। वयं (4) ———- कृते फलानि, पुस्तकानि, क्रीडनकानि च 5) ——— अनयाम ।<br>तेषु केचित् तु स्व-पित्रो: (6) ———- अति दुःखिताः आसन्। तत्र गत्वा तै: सह वार्तालापं च कृत्वा अहं (7) ——— अभवम् यत् भविष्ये अहं सदैव नियमितरूपेण तत्र गमिष्यामि तेषां 8) ———च भविष्यामि।अहं तेभ्य: कथापुस्तकानि दत्तवान् येन ते अतीव 9) —————-आसन्। भगिनि ! त्वमपि स्व- अवकाशेषु निर्धनबालकान् अवश्यमेव पाठये: तेभ्य: शिक्षाया: अमूल्यम् 10) ———- च यच्छे:। समाजसेवा एव आत्मोन्नते: मार्ग:।<br>पितृभ्याम् मम प्रणामाञ्जलिः निवेदनीया।<br>तव अग्रज:<br>अथर्व: | **(1/2x10=5)** |
| | | |

| | | |
|---|---|---|
| 3.अ | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत-**<br><br>**मञ्जूषा—-**<br>वनम्, वानरः, जनौ, शशकः, हरिताः, वृक्षाः, मृगः, अवलम्बते, शुद्धम्, शांतिः, जलाशय: | **(5x1-5)** |
| आ. | **अथवा**<br>**मञ्जूषायां प्रदत्तशब्दानां सहायतया "पुस्तकालयः" विषयम् अधिकृत्य पञ्च वाक्यानि संस्कृते लिखत –**<br>**मञ्जूषा-**<br>अनेकानि, जनाः, समाचारपत्रम्, स्थातव्यम्, आगच्छन्ति, अनेकेषाम्, विषयाणाम्,तूष्णीम्, ग्रन्थाः, ज्ञानवर्धनम्, अध्ययनम् | |
| | | |
| 4.अ | **मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत –**<br>सरिता —-शालिनि ! अद्य त्वम् स्व-कारयानेन न आगता?<br>शालिनी - (1) ———————————————————————————।<br>सरिता- किमर्थम्? किं तव जनक: गृहे नासीत्? 2) ——————————-1<br>शालिनी- 3) ——————————————। | **(1x5=5)** |

<table>
<tr><td></td><td>सरिता —- आम्, अधुना अहम् अवगच्छामि, त्वम् स्वास्थ्यलाभाय पदाति: आगता।<br><br>शालिनी- सत्यम्, किंतु4) ————————————————-।मम गृहं तु विद्यालयस्य समीपे एव अस्ति।<br><br>5) ————————————।<br><br>सरिता- त्वया उचितं कथितम्। श्व: अहमपि पादाभ्याम् एव विद्यालयम् आगमिष्यामि।<br><br>i. स: तु गृहे एव आसीत्।<br>ii. न सरिते! अद्य अहं पादाभ्याम् एव आगता।<br>iii. पर्यावरणस्य रक्षायै अपि अस्माभि: वाहनानां न्यून: प्रयोग: करणीय: ।<br>iv. न का अपि आवश्यकता कारयानस्य। भविष्ये अहम् पादाभ्याम् एव विद्यालयम् आगमिष्यामि।<br>v. प्रतिदिनं त्वम् तेन सहैव आगच्छसि।<br><br>अथवा</td><td></td></tr>
<tr><td>आ.</td><td>प्रदत्तशब्दसूचीसाहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तराणि उत्तरपुस्तिकायां लिखत –<br><br>एकदा बहव: धनिका: 1) ———- च नगरं प्रति गच्छन्ति स्म। मार्गे दस्यव: तेषां सर्वं 2) ——— अलुण्ठन्। पथिकेषु एक: 3) ————- नवयुवक: अपि आसीत्। दस्यूनां नायक: तम् अपृच्छत्- 'बालक! तव समीपे किम् किम् अस्ति? सत्यं वद।' युवक: अकथयत्:- 'मम पार्श्वे त्रिंशत् 4) ——— सन्ति।' दस्यव: युवकस्य कंचुके मुद्राणाम् 5) ———— अकुर्वन् परं किमपि न प्राप्तवन्त:। नायक: बालकस्य सर्वाणि अड्.गानि अपश्यत् किंतु मुद्रा: तत्रापि नासन्। क्रुद्ध: स: अवदत्- 'त्वम् किमर्थम् 6) ———— अवद: ?तव समीपे धनं नास्ति।' तदा बालक: स्व-कंचुके 7) ———— मुद्रा: अदर्शयत् । दस्युनायक: चकित: भूत्वा अपृच्छत् यत् बालक: किमर्थं सम्यक्तया गोपिता: मुद्रा: तान् अदर्शयत्? युवक: अकथयत्- 'मम 8) ——— माम् सदैव सत्यं कथयितुं शिक्षयति। अहं तु केवलं मम मातु: 9) ———- पालनम् अकरवम्।'बालकस्य आदर्शचरित्रेण प्रभाविता: दस्यव: अपि 10) ———- अत्यजन्।ते धर्मस्य मार्गम् स्वीकृतवन्त:। 'सत्यं सदैव जयते।'</td><td>(1/2×10=5)</td></tr>
</table>

| | | |
|---|---|---|
| | **मञ्जूषा——-**<br>अल्पवयस्क:, धनम् , अन्वेषणम्, स्वर्णमुद्रा:, असत्यम्, गोपिता:, जननी, कुपथम्, आदेशस्य, पथिका: | |
| | | |
| | **'ग' भाग:**<br>**अनुप्रयुक्तव्याकरणम् (25अङ्.का:)** | |
| | | |
| **5. अ** | **अधोलिखितवाक्येषु रेखांकितपदेषु संधिं संधिविच्छेदं वा कुरुत-**<br>i. अपि इदं श्रेय:+ करम् ?<br>ii. वाण्येका या पुरुषं समलंकरोति।<br>iii. प्रियहितं, सत्यं वाक्यं ,स्वाध्यायाभ्यसनं चैव **वाङ्.मयं** तप: उच्यते।<br>iv. एतत् कार्यं तु **कुक्कुट:+अपि** करोति।<br>**अथवा**<br>1. न **कुर्यादहितं** कर्म।<br>2. **तौ+ अत्र** किमर्थम् आगतौ?<br>3. अस्ति कर्मपुरनगरे प्रच्छन्नभाग्य-नामधेय: **कश्चित्** कुमार:।<br>4. सत्यं **जयति।** | **(4x1=4)** |
| | | |
| **6** | **अधोलिखितवाक्येषु रेखांकितपदानाम् समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत**<br>i. अस्माकं वदनाम्बुजे **सर्वदा** शारदा निवसेत्।<br>(अ) सर्वे ददाति या (ब) सर्वं ददाति इति<br>(स) सर्वं च दा च (द) सर्वेषाम् दायकः<br>ii. अये ! **श्रीकृष्णार्जुनौ** युधिष्ठिर: च आगच्छत:।<br>(अ) श्रीकृष्णौ अर्जुनौ च (ब) श्रीकृष्णम् अर्जुनम् च<br>(स) श्रीकृष्ण: च अर्जुन: च (द) श्रीकृष्ण: अर्जुनौ च<br>iii. वयं सर्वे **उपवृक्षं** तिष्ठेम।<br>(अ) वृक्षस्य समीपम् (ब) वृक्षं- वृक्षं प्रति<br>(स) वृक्षात् दूरम् (द) वृक्षस्य पश्चात् | **(4x1=4)** |

| | | |
|---|---|---|
| | iv. **सूपकारा:** मेषं ताडयन्ति स्म।<br>(अ) सूपस्य कारा: (ब) सूपं करोति य:,स:<br>(स) सूपेण कारयति इति (द) सूपं कुर्वन्ति इति | |
| | | |
| 7. | **अधोलिखितवाक्येषु रेखांकितपदानाम् प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरम् प्रदत्तविकल्पेभ्य: चित्वा लिखत**<br>1. मेष: **जिह्वालोलुपतया** महानसं प्रविशति।<br>(अ) जिह्वा+लोलुपतया (ब) जिह्वालोलुप+तया<br>(स) जिह्वालोलुप+तल् (द) जिह्वालोलुप+टाप्<br>2. सेतुनिर्माणादिकं **समाज+ठक्** कार्यं क्रियते ।<br>(अ) सामाजिकम् (ब) समाजिकम्<br>(स) सामाजिक: (द) सामाजिठकम्<br>3. जानीम: वयं भवत: **दिव्यां** शक्तिम्।<br>(अ) दिव्य+तल् (ब) दिव्य+ टाप्<br>(स) दिव्य+त्व (द) दिव्य+ ङीप्<br>4. **धैर्यवान्** मंत्री परै: कदापि न परिभूयते।<br>(अ) धैर्य+वान् (ब) धैर्य+ मतुप्<br>(स) धैर्य+ वती ( द) धैर्+यवान् | **(4x1=4)** |
| | | |
| 8.अ | **वाच्यानुसारम् मञ्जूषाया: चित्वा उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत-**<br>गुरुः - वत्स ! वद, अस्मान् का धारयति ?<br>शिष्य: — आचार्य !पृथिव्या (क) ———— धार्यामहे।<br>गुरु: - मयंक! अस्मान् प्रति का उपकारं करोति ?<br>मयंक:- ख) ———— अस्मभ्यम् उपकारं करोति।<br>गुरुः- वसुधे !वयं केन जीवनं धारयाम:।<br>वसुधा - श्रीमन्! अस्माभि: वायुना जीवनं ग) ————।<br>धार्यते , वयम्, प्रकृति: | **(3x1=3)** |

| | | |
|---|---|---|
| आ. | **अथवा**<br>**वाच्यानुसारम्  उचितपदै: रिक्तस्थानानि पूरयित्वा वाक्यानि पुन: लिखत-**<br>1. ————प्रहरीव देशस्य रक्षां कुर्वन्ति ।(पर्वत)<br>2. सूर्येण सर्वेभ्य: ——————- (दीयते।(प्रकाश)<br>**3. ईश्वरेण एव सर्वे जीवा: —————।(पाल)** | |
| | | |
| 9. | **दिल्लीत: प्रस्थितं  शताब्दीरेलयानं कदा कुत्र प्राप्नोति इति, एतां समयसारिणीं  समुचित कालबोधकै: शब्दै: पूरयत-**<br>1. प्रात: (6.15) वादने ——————दिल्लीत: भोपालनगरं प्रति गच्छति।<br>2. प्रात: (7.30) ———— आगरानगरं प्राप्नोति।<br>3. प्रात: (10) वादने ————— एतत् रेलयानं 'ग्वालियर'इति स्थाने भवति। | **(3x1=3)** |
| | | |
| **10.** | **(क) मञ्जूषायां प्रदत्तै: उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत-**<br>एव, कदापि, परश्व:, तथा<br>1. अहं ————— कानपुरनगरं गमिष्यामि।<br>2. प्रथमं तु पर्यटनाधिकारी ————— एकं प्रश्नं पृच्छति ।<br>3. अनृतं ————— न वदेत्।<br>4. यथा अवक्रता चित्ते,————- वाचि भवेत्। | **(4x1=4)** |
| | | |

| | | |
|---|---|---|
| 11. | **अधोलिखितवाक्येषु रेखांकित-अशुद्धपदाय उचितपदानि चित्वा वाक्यानि पुनः लिखत-**<br>**1. <u>शोभनः</u> परिणामं दृष्टवा कः प्रसन्नः न भवति?**<br>(अ) शोभना (ब) शुभम्<br>(स) शोभाम् (द) शोभनम्<br>**2. त्वम् अधुना गृहं <u>गच्छत।</u>**<br>(अ) गच्छ (ब) गच्छानि<br>(स) गच्छसि (द) गच्छथ<br>**3. <u>दुष्टजनानां</u> सह मित्रतां मा कुरु।**<br>(अ) दुष्टजनस्य (ब) दुष्टजनैः<br>(स) दुष्टजनेषु (द) दुष्टजनकात् | **(3x1=3)** |
| | | |
| | **'घ' भागः**<br>**पठितावबोधनम्। (30 अङ्काः)** | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>अथ व्रजन्तौ तौ गर्तसंकुले मार्गे क्रीडतः कांश्चित् बालकान् प्रेक्ष्य अवदताम्- भो भो बालकाः ! कथमत्र नतोन्नते विषमे मार्गे क्रीडथ ? यदि कश्चिद् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्। तच्छ्रुत्वा तेषु कश्चित् उद्दण्डः बालकः उवाच, 'अयि भो ! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ ? अपि इदं श्रेयस्करम् ?'<br>अनेन वचसा प्रतिहतान्तःकरण प्रच्छन्नभाग्यः अचिन्तयत् – 'किमिदं वचनं विशेषेण मामेव लक्ष्यीकरोति ? अहो ! कुमार्गम् आश्रितस्य मम कीदृशीयं क्लेशपरम्परा। गुरुपदेशेन इव अनेन बालवचसा मम चक्षुषी समुन्मीलिते। अद्यप्रभृति पापपथं त्यजामि' इति विचिन्त्य मित्रं दुष्टबुद्धिम् अवदत् 'सखे ! यदि मां मित्रस्थाने गणयसि तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्।'<br>**I एकपदेन उत्तरत – (केवल प्रश्नद्वयम्)**<br>i. पापपथं त्यक्तुं कः अचिन्तयत् ?<br>ii. बालाः कीदृशे मार्गे क्रीडन्ति स्म ?<br>iii. प्रच्छन्नभागस्य चक्षुषी केन समुन्मीलिते? | **5**<br><br><br><br><br><br><br><br><br><br><br><br><br>**(1/2x2=1)** |

| | | |
|---|---|---|
| | **II पूर्णवाक्येन उत्तरत – (केवल प्रश्नद्वयम्)**<br>i. प्रच्छन्नभाग्यः किं निश्चयं करोति किमर्थं च ?<br>ii. प्रच्छन्नभाग्यः दुष्टबुद्धिं किं कर्तुं कथयति ?<br>iii. क: प्रतिहतान्त:करण: आसीत्? | **(1x2=2)** |
| | **III (अ) निर्देशानुसारम् उत्तरत -**<br>i. 'अथ व्रजन्तौ तौ .' अस्मिन् वाक्ये "तौ" इति सर्वनामपदं काभ्यां प्रयुक्तम्?<br>ii. अवदताम्- अस्य क्रियापदस्य कर्तृपदं किम् अस्ति?<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>i. 'भवान् ' इति कर्तृपदस्य क्रियापदं किम्?<br>ii. 'मार्ग:' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्? | **(1x2=2)** |
| | | |
| **13.** | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>शारदा शारदाम्भोजवदना वदनाम्बुजे ।<br>सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात् ।।<br>वाक्पटुधैर्यवान् मंत्री सभायामप्यकातर:।<br>स केनापि प्रकारेण परैर्न परिभूयते।। | **5** |
| | **I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ।**<br>1. शारदायाः वदनं किमिव अस्ति ?<br>2. सा किं ददाति ?<br>3. मंत्री सभायाम् कीदृश: स्यात्? | **(2x1/2=1)** |
| | **II पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>i. कीदृश: मंत्री परै: न परिभूयते?<br>ii. शारदाया: उपस्थिति: किमिव अस्ति?<br>iii. शारदा कदा कुत्र च वसेत्? | **(2x1=2)** |
| | **III. (अ) निर्देशानुसारम् उत्तरत**<br>i. यदा-कदा'- अस्य विलोमपदं श्लोकात् चित्वा लिखत।<br>ii. 'धैर्यवान् मंत्री' अनयो: पदयो: विशेष्यपदं किम् अस्ति? | **(2x1=2)** |

| | | |
|---|---|---|
| | **अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>i. क्रियात् -- अस्य क्रियापदस्य कर्ता क:?<br>ii. 'तिरस्क्रियते' अस्मिन्नर्थे श्लोके किं पदम् आगतम्? | |
| | | |
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>काकः- रे परभृत। अहं यदि तव सन्ततिं न पालयामि, तर्हि कुत्र स्युः पिकाः ? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः ।<br>राजहंसः- शान्तं, शान्तम्। अहमेव नीरक्षीरविवेकी पक्षिणां राजा।<br>बकः- धिक् युष्मान्। अहमेव सर्वशिरोमणिः ।<br>(ततः प्रकृतिमाता प्रविशति)<br>प्रकृतिः -(सस्नेहम्) अलम् अलं मिथः कलहेन। अहम् प्रकृतिः एव युष्माकं जननी। यूयं सर्वे एव मम प्रियाः। सर्वेषामेव महत्त्वं विद्यते यथासमयम्। सर्वैः एव मे शोभा। न तावत् कलहेन समयं वृथा यापयेत। मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम्। | **5** |
| | **I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ।**<br>i. 'परभृत' इति सम्बोधनपदं कस्मै अस्ति ?<br>ii. काकः आत्मानं केषां सम्राट् कथयति ?<br>iii. राजहंसः कयोः विवेकं कर्तुं समर्थः ? | **(1/2x2=1)** |
| | **I. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>i. प्रकृतेः शोभा कैः वर्तते?<br>ii. प्रकृतिः जीवान् किं न कर्तुं कथयति?<br>iii. अस्माकं जीवनं कथं रसमयं भवितुं शक्यते ? | **(2x1=2)** |
| | **III. (अ) निर्देशानुसारम् उत्तरत -**<br>i. 'परस्परम्' अस्य समानार्थकं पदं नाट्यांशात् चित्वा लिखत।<br>ii. 'स्युः' अस्य क्रियापदस्य कर्तृपदं किम् अस्ति?<br>**अथवा** | **(2x1=2)** |

| | | |
|---|---|---|
| | **(आ) निर्देशानुसारम् उत्तरत -**<br>i. पालयामि- अस्या: क्रियाया: कर्ता क:?<br>ii. 'नीरक्षीरविवेकी' अस्य विशेषणपदस्य विशेष्यपदं किम् अस्ति? | |
| | | |
| **15.** | **रेखाङ्कितपदानि आश्रित्य प्रश्ननिर्माणं कुरुत।**<br>(क) **प्रीतः** शक्रः वरम् अददात्।<br>(ख) **सरस्वत्या:** कोश: अपूर्व: विद्यते।<br>(ग) **भवता** समीचीनं न कृतम्।<br>(घ) द्रौणिना **द्रौपद्या**: पुत्रा: हताः।<br>(ङ्.) राजादेशं श्रुत्वा **कपयः** चिन्तितवन्त:। | **(5x1=5)** |
| | | |
| **16.अ.**<br><br><br><br><br><br><br><br><br><br>**आ.** | **अधोलिखितस्य श्लोकस्य अन्वयम् उचितपदैः पूरयित्वा पूर्णोत्तरम् उत्तर-पुस्तिकायां लिखत**<br>**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**<br>**परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ।।**<br>अन्वयः यः (1) ——— वाचं त्यक्त्वा (2) ———— (वाचं) अभ्युदीरयेत्,(स:) (3) . —————- पक्वं फलं (4) ——— अपक्वं (फलं) भुड्.क्ते।<br>**मञ्जूषा—**<br>परुषां, परित्यज्य,धर्मप्रदां, विमूढधी:<br>**अथवा**<br>**निम्नलिखितस्य श्लोकस्य भावम् , मञ्जूषायाः सहायतया उपयुक्तपदैः पूरयत-**<br>ध्यायतः विषयान् पुंसः संगस्तेषूपजायते।<br>सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते।।<br>भावार्थः—- यदा मनुष्यः सततं (1) ————-चिन्तयति, तदा तस्य हृदये तान् प्रति (2) ——— उत्पन्न: भवति। तदा स: तेषां वस्तूनां (3) ————- करोति, तानि न प्राप्नोति चेत् , तर्हि (4) .———- उत्पत्तिः भवति।<br>मञ्जूषा—<br>(कामनाम्, विषयान्, क्रोधस्य, सड्.ग: | **(4x½=2)** |

| | | |
|---|---|---|
| **17.** | **अधोलिखितवाक्येषु रेखाक्तिपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br>**(1) वानरयूथप: सर्वान् वानरान् रहसि आहूय कथयति।**<br>( क) रहस्यम् (ख) त्याज्यम्<br>(ग) एकान्ते (घ) क्रोधेन<br>**(2) विभो! एतत् ते सत्यं ब्रवीमि।**<br>( क) वैभवयुक्त: (ख) हे सर्वव्यापक!<br>(ग) सर्वशक्तिमान्! (घ) कृपालु:<br>**(3) कथं माम् अधिक्षिपसि ।**<br>(क) अधिकारेण क्षिपसि (ख) मारयसि<br>(ग) तिरस्करोषि (घ) हरसि<br>**(4) अहो सत्व हितैषिता ।**<br>(क) बलम् (ख) प्राणिनाम्<br>(ग) सत्यम् (घ) शक्ति: | **(4x1=4)** |
| **18.** | **मञ्जूषाया: पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत।**<br>एकस्मिन् प्रासादे चंद्रनाम्न: राज्ञ: पुत्रा: 1) ————- सह क्रीडन्ति स्म।राजगृहे जिह्वालोलुप: एक: मेष: 2) ———— प्रविश्य यत् पश्यति,तत् खादति स्म। 3) ———— तं येन- केन पात्रेण ताडयन्ति स्म।मेषताडनं दृष्ट्वा वानरयूथप: कपीन् 4) ———— त्यक्तुम् अकथयत्।यदा वानरा: स्वर्गसमान् उपभोगान् त्यक्तुम् न ऐच्छन्, तदा वानरयूथपति: 5) ———— एवं वनम् अगच्छत्।एकदा 6) ———— ताडित: ज्वलन् मेष: अश्वशालां प्राविशत्। तत्र तृणेषु वह्निज्वाला: समुत्थिता: वह्निना च केचन अश्वा: मृता:,केचन दग्धा: ,केचन अर्धदग्धा: चाभवन्। तत्रस्थान् 7) ———— अश्वान् दृष्ट्वा राज्ञा वैद्या: आहूता:। 8) ————- एव अश्वानाम् औषध: इति श्रुत्वा मृत्युभयात् कपय: पश्चात्तापम् अकुर्वन् ।[i]<br>**मञ्जूषा——**<br>ज्वलितकाष्ठेन,राजभवनम्,वानरमेद:, महानसम्,वानरै:, सूपकारा:, एकाकी , दग्धान्, | **(8x1/2=4)** |

# उत्तरमाला-2
# अभ्यास प्रश्न-पत्र-2
# संस्कृतम् (सम्प्रेषणात्मकम्) (कोड सङ्ख्या-119)

| | | | |
|---|---|---|---|
| **खण्ड'क'**<br>**अपठितावबोधनम्** | | | |
| 1 | **गद्यांश:**<br>**(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम् )**<br>i. मुकुटमणिरिव/मुकुटमणि:<br>ii. जनानाम्<br>iii. काश्मीरप्रदेश:<br>**(आ) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम् )**<br>i. काश्मीरप्रदेशस्य प्राकृतिकं सौंदर्यम् अनुपमं/अद्भुतं वर्तते।<br>ii. केसरस्य कृषि: अस्य प्रदेशस्य महती विशेषता अस्ति।<br>iii. अत्र कल्हण:, बिल्हण:,अभिनवगुप्त:, मम्मटादय: च विख्याता: कवय: अभवन्।<br>**(इ) शीर्षकप्रदानम्—— पृथिव्या: स्वर्ग:- काश्मीरप्रदेश: ( अन्यथा अन्य: कोऽपि उपयुक्त: शीर्षक:)**<br>**(ई) यथानिर्देशम् उत्तरत-**<br>1. (ब) एतस्याम्<br>2. (द) कमलानि<br>3. (अ) शैलानाम् | 10<br>(1×2=2)<br><br><br><br>(2×2=4)<br><br><br><br>(1)<br>(3x1=3) | |
| | | | |
| **'ख' भागः**<br>**रचनात्मकलेखनम्** | | | |
| 2 | **पत्रलेखनम्।**<br>१.कानपुरत: २.भगिनि ३.छात्राणाम् ४. बालानाम्<br>५.क्रीत्वा ६.अभावे ७.दृढ़निश्चय: ८.सहायक:<br>९.प्रमुदिता: १०. उपहार | (1/2x10=5) | |
| | | | |

| | | |
|---|---|---|
| **3.** | **चित्र-वर्णनम्**<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति । वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति । प्रतिवाक्यम् अर्धः अङ्कः भावस्य कृते अर्धः अङ्कः च व्याकरण दृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते।<br>**चित्र-वर्णनम्-**<br>1. एतत् चित्रम् एकस्य वनस्य अस्ति।<br>2. चित्रे एक: मृग:, एक: शशक: च भूमौ तिष्ठत:।<br>3. अत्र अनेके वृक्षा: अपि दृश्यन्ते।<br>4. एक: वानर: वृक्षस्य शाखाया: अवलम्बते।<br>5. चित्रे एक: जलाशय: अपि दृश्यते, केचित् जना: अपि च तिष्ठन्ति।<br>**अथवा**<br>**अनुच्छेद लेखनम्—**<br>अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति । अतः अङ्काः देयाः । अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः।<br>**अनुच्छेद लेखनम्— 'पुस्तकालय:'**<br>1. पुस्तकानाम् आलय: गृहं वा पुस्तकालय: कथ्यते।<br>2. पुस्तकालये विविधविषयाणाम् अनेकेषां पुस्तकानां संग्रह: भवति।<br>3. तत्र जना: शान्त्या स्थित्वा पुस्तकानि पठन्ति।<br>4. पुस्तकालय: छात्रेभ्य: अतीव उपयोगी ज्ञानस्य मंदिर: इव भवति।<br>5. पुस्तकालयेषु ज्ञानवर्धनाय विविधानि समाचारपत्राणि पत्रिका: च अपि भवन्ति। | **(5x1-5)** |
| | | |

| | | |
|---|---|---|
| **4.** | **संवाद-पूर्तिः ——।**<br>i. (2) न सरिते!अद्य अहं पादाभ्याम् एव आगता।<br>ii. (5) प्रतिदिनं त्वं तेन सहैव आगच्छसि।<br>iii. (1) स: तु गृहे एव आसीत्।<br>iv. (3) पर्यावरणस्य रक्षायै अपि अस्माभि: वाहनानां न्यून: प्रयोग: करणीय:।<br>v. (4) न का अपि आवश्यकता कारयानस्य। भविष्ये अहं पादाभ्याम् एव विद्यालयम् आगमिष्यामि।<br>**अथवा**<br>**कथा-पूर्तिः ——**<br>क) पथिका: ख) धनम् ग) अल्पवयस्क: घ) स्वर्णमुद्रा:<br>ड्.) अन्वेषणम् च) असत्यम् छ) गोपिता: ज) जननी<br>झ) आदेशस्य (ञ) कुपथम् | **(1×5=5)** |
| | | |
| | **'ग' भाग:**<br>**अनुप्रयुक्तव्याकरणम् (25अड्.का:)** | |
| | | |
| **5.** | **संधिं संधिच्छेदं च। (केवलं प्रश्नचतुष्टयम्)**<br>1. श्रेयस्करम् — 1. कुर्यात्+अहितम्<br>2. वाणी+एका — **अथवा** — 2.तावत्र<br>3. वाक्+मयम् — 3.क:+चित्<br>4. कुक्कटोऽपि — 4.जे+अति | **(4x1=4)** |
| | | |
| **6** | **समस्तपदं विग्रहं च (1x4=4)**<br>1. (ब) सर्वं ददाति इति<br>2. (स) श्रीकृष्ण: च अर्जुन: च<br>3. (अ)वृक्षस्य समीपम्<br>4. (द) सूपं कुर्वन्ति इति | **(4x1=4)** |
| | | |

| | | |
|---|---|---|
| 7. | **प्रत्यया:**<br>1. (स) जिह्वालोलुप+तल्<br>2. (अ)सामाजिकम्<br>3. (ब) दिव्य+टाप्<br>4. (द) धैर्य+मतुप् | **(4x1=4)** |
| | | |
| 8. | **वाच्य (केवलं प्रश्नत्रयम्) .**<br>अ वयम्,प्रकृत्या, पर्यावरणम्<br>**अथवा**<br>आ पर्वता:, प्रकाश:, पाल्यन्ते | **(3x1=3)** |
| | | |
| **9.** | **समय:**<br>1. सपादषट्<br>2. सार्धसप्तवादने<br>3. दश | **(3x1=3)** |
| | | |
| **10** | **अव्ययपदानि**<br>1. परश्वः 2. एव 3. कदापि 4. तथा | **(4x1=4)** |
| | | |
| **11** | **अशुद्धिसंशोधनम् .**<br>1. (द) शोभनम्<br>2. (अ)गच्छ<br>3. (ब) दुष्टजनै: | **(3x1=3)** |
| | | |

| 'घ' भागः<br>पठितावबोधनम्। (30 अङ्काः) | | |
|---|---|---|
| **12.** | **गद्यांश:**<br>**(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ।**<br>i. प्रच्छन्नभाग्य:<br>ii. नतोन्नते/ विषमे<br>iii. बालवचसा<br>**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) ।**<br>i. प्रच्छन्नभाग्य: पापपथं त्यक्तुं निश्चयम् अकरोत् यत: बालवचसा तस्य चक्षुषी समुन्मीलिते।<br>ii. प्रच्छन्नभाग्य: दुष्टबुद्धिं साधुजनगर्हितं पापपथं त्यक्तुम् कथयति।<br>iii. प्रच्छन्नभाग्य: प्रतिहतान्त:करण: आसीत् ।<br>**निर्देशानुसारम् उत्तरत-**<br>1. 'तौ' इति सर्वनामपदं प्रच्छन्नभाग्याय दुष्टबुद्धये च प्रयुक्तम्।<br>2. 'अवदताम्' अस्य क्रियापदस्य 'तौ' इति कर्तृपदम् अस्ति।<br>**अथवा**<br>1. 'भवान्' इति कर्तृपदस्य क्रियापदम् – 'त्यजतु' इति अस्ति।<br>2. 'पथ:' इति पर्यायपदम् प्रयुक्तम्। | **5**<br>**(1/2x2=1)**<br><br><br><br>**(1×2=2)**<br><br><br><br>**(1x2=2)** |
| | | |
| **13.** | **पद्यांश:**<br>**(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ।**<br>I. अम्भोजमिव/ शारदाम्भोजमिव<br>II. सर्वम्<br>III. अकातर:<br>**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)**<br>I. वाक्पटु:, धैर्यवान् सभायामप्यकातर: मंत्री परै: न परिभूयते।<br>II. शारदाया: उपस्थिति: सन्निधि: इव अस्ति। | **5**<br>**(2x1/2=1)**<br><br><br><br>**(2x1=2)** |

| | | |
|---|---|---|
| | III. शारदा सर्वदा अस्माकं वदनाम्बुजे वसेत्।<br>**निर्देशानुसारम् उत्तरत-**<br>1. सर्वदा—विलोमपदम् अस्ति।<br>2. 'मंत्री' इति विशेष्यपदम्।<br>**अथवा**<br>1. अस्य कर्तृपदं 'शारदा' इति अस्ति।<br>2. 'परिभूयते' इति पदम् आगतम्। | **(2x1=2)** |
| | | |
| **14.** | **नाट्यांशः——।**<br>**(अ) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ।**<br>I. पिकाय<br>II. पक्षिणाम्<br>III. नीरक्षीरयो:<br>**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) ।**<br>I. प्रकृते: शोभा सर्वैरेव जीवै: वर्तते।<br>II. प्रकृति: जीवान् कलहेन समयं वृथा न यापयितुम् कथयति।<br>III. अस्माकं जीवनं परस्परं स्नेहेन एव रसमयं भवितुं शक्यते।<br>**निर्देशानुसारम् उत्तरत-**<br>1. 'मिथ:' इति समानार्थकं पदं प्रयुक्तम्।<br>2. 'पिका:' इति कर्तृपदम् अस्ति।<br>**अथवा**<br>1. पालयामि- अस्य कर्तृपदं 'अहम्'(काक:) अस्ति।<br>2. अस्य विशेष्यपदम् 'अहम्' (राजहंस:) इति अस्ति। | **5**<br>**(1/2x2=1)**<br>**(2x1=2)**<br>**(1x2=2)** |
| | | |

| | | |
|---|---|---|
| **15.** | **प्रश्ननिर्माणम्—**<br>1.कीदृश: 2.कस्या: 3.केन<br>4. कस्या: 5. के | **(5x1=5)** |
| | | |
| **16.** | **अ अन्वय-पूर्तिः**<br>1.धर्मप्रदां 2. परुषां 3. विमूढ़धी: 4. परित्यज्य<br>**अथवा**<br>आ भावार्थपूर्ति:-<br>1. विषयान् 2. सङ्.ग: 3. कामनाम् 4. क्रोधस्य | **(4x½=2)** |
| | | |
| **17.** | **प्रसंगानुसारम् उचितार्थचयनम्।**<br>1. (ग) एकान्ते 2. (ख) हे सर्वव्यापक! 3. (ग) तिरस्करोषि<br>4. (ख) प्राणिनाम् | **(4x1=4)** |
| **18.** | **पठितकथापूर्तिः**<br>1.वानरैः 2. महानसम् 3. सूपकारा: 4. राजभवनम्<br>5. एकाकी 6. ज्वलितकाष्ठेन 7. दग्धान् 8. वानरमेद: | **(8x1/2=4)** |

# संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)
# अभ्यास-प्रश्नपत्रम् -3 (हल रहित)
# कक्षा - दशमी

**अवधिः होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

| | | |
|---|---|---|
| **'क' भागः** | **अपठितावबोधनम्.** | **10 अङ्.काः** |
| **'ख' भागः** | **रचनात्मककार्यम्** | **15 अङ्काः** |
| **'ग' भाग** | **अनुप्रयुक्तव्याकरणम्** | **25 अङ्.काः** |
| **'घ' भागः** | **पठितावबोधनम्** | **30 अङ्काः** |

3. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
5. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| | | |
|---|---|---|
| | **भाग-'क'**<br>**अपठित-अवबोधनम्** | |
| 1 | **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**<br>आधुनिकसमये आभासी-कक्षा-शिक्षा अत्यन्तं प्रचलिता अस्ति। छात्राः गृहे उपविश्य एव संगणकस्य दूरभाषयन्त्रस्य वा माध्यमेन पाठान् अधीयन्ते। अस्यां शिक्षायां समयस्य स्थानस्य च विशेषः बन्धः नास्ति। गुरवः अपि जालपुटस्य साहाय्येन पाठान् शिक्षयन्ति। चित्राणि ध्वनिमुद्रणानि च उपयोगाय भवन्ति, येन अध्ययनं रोचकं भवति। आपत्काले यथा 'कोरोना'इति रोगप्रसारणकाले एषा पद्धतिः अत्यन्तं उपयोगिनी | **10** |

सिद्धा।अन्यविध-विषमे समये अपि ईदृशी शिक्षा, प्रत्यक्ष-शिक्षाया: उत्तम: विकल्प: अस्ति।

यद्यपि प्रत्यक्ष-संवादस्य अभावेन अस्यां शिक्षाविधौ किञ्चित् न्यूनता प्रतीयते, तथापि यथोचितम् उपयोगे कृते आभासी-शिक्षा विद्यार्थिनां ज्ञानवृद्धौ सहायिका भवति। ये बालका: वयस्का: वा विद्यालयं गन्तुं समर्था: न भवन्ति, तेऽपि अनेन नवीनमाध्यमेन शिक्षां प्राप्तुं शक्नुवन्ति। विद्यार्थिन: स्वगत्या अपि अध्ययनं कर्तुं शक्नुवन्ति तथा च पुनः पुनः पाठं द्रष्टुं समर्था: भवन्ति। अतः एषा प्रणाली आधुनिक-शिक्षायाः महत्वपूर्णः अंशः अस्ति।

**अ एकपदेन उत्तरत— (केवलं प्रश्नद्वयम्)** **(2x1=2)**

i. अधुना कीदृशी शिक्षा प्रचलिता ?

ii. आभासीकक्षासु गुरव: कस्य सहाय्येन पाठयन्ति?

iii. यथोचितम् उपयुक्ता आभासीशिक्षा कस्यां सहायिका भवति ?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) ।** **(2x2=4)**

i. आभासी- शिक्षाया: के लाभा: सन्ति ?

ii. ईदृश्यां शिक्षायाम् अध्ययनं रोचकं कर्तुं किं क्रियते? ?

iii. आभासी-शिक्षायां किमर्थं न्यूनता प्रतीयते ?

**इ. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **(1)**

**ई. यथानिर्देशम् उत्तरत-** **(3x1=3)**

(1) 'संकटकाले' अस्य पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(अ) रोगप्रसारणकाले (ब) समये

(स) आपत्काले (द) विषमे

(2) 'वयस्का:' इति पदस्य विशेषणपदं किम् अस्ति?

(अ) बालका: (ब) ये

(स) अनया (द) माध्यमेन

(3) 'अधीयन्ते' इति क्रियापदस्य कर्ता कः ?

(अ) आभासीशिक्षा (ब) विद्यार्थिन:

(स) कक्षा: (द) छात्रा:

| 'ख' भागः<br>रचनात्मकलेखनम्      (15 अङ्काः) | | |
|---|---|---|
| 2 | **भवान् जयः अस्ति। विदेशस्थं मित्रं प्रति लिखितं, भारतीय-पर्व-विषयकम् इदं पत्रं, मञ्जूषायाः पदानि चित्वा पूरयत-**<br>**मञ्जूषा—**<br>खिन्नतायाः, अभिन्नहृदय,एकरसतां, अभिवादनम्,आगतवान्,रक्षासूत्रं व्यस्ताः,उत्सवानाम्, गुरुपर्व,विविधवर्णान्<br>86- मनुनगरम्<br>प्रयागः<br>दिनांकः<br>1) ——————- पीटर !<br>सस्नेहम् 2) ——————-।<br>भवतः पत्रं प्राप्तम्। भवतः 3) ———— विषये पठित्वा अहं चिन्तितोऽस्मि । त्वया लिखितं यत् तत्र अवकाशेषु त्वम् एकाकी अति दुखी भवसि ।मित्र! त्वं किमर्थम् मम समीपम् न 4) ——————? अद्यत्वे वयं 'दीपावली' इति पर्वणः सज्जासु (5) ——— स्मः। अस्मिन् उत्सवे सर्वाणि गृहाणि दीपैः विभूषितानि क्रियन्ते। त्वं जानासि यत् भारतवर्षे तु अस्माभिः जीवनस्य (6) ——— दूरीकर्तुम् अनेके उत्सवाः मान्यन्ते । दीपावली,होली,विजयादशमी, रक्षाबंधनम्,7) ———- , वसंतोत्सवः, ईदपर्व, क्रिसमस-उत्सवः च प्रमुखाः उत्सवाः सन्ति। होल्यां जनाः परस्परं 8) ———-क्षिपन्ति, मुखे कपोले शालिचूर्णं लिम्पन्ति ,सौहार्द्रं च वर्धयन्ति। रक्षाबंधने भगिनी स्व- भ्रातुः मणिबंधे 9) ——— बध्नाति ।अलं लेखनेन, भवान् स्वयम् अत्र आगत्य सर्वेषाम् 10) ——— आनन्दम् अनुभवतु।<br>सर्वेभ्यः नमोनमः ।तवागमनस्य प्रतीक्षायाम्-<br>भवतः मित्रम्<br>जयः | **(1/2x10=5)** |
| | | |

| | | |
|---|---|---|
| **3.अ** | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पंच वाक्यानि संस्कृतेन लिखत-**  **मञ्जूषा—-** उद्यानस्य, त्रिचक्रिकां, मित्राणि,वृक्षा:, प्रकाश-स्तम्भ:, जनौ, तृणानि, वायु:, शुद्धं, वातावरणम्,व्यायाम:, मनोरंजनम् | **(5x1-5)** |
| **आ.** | **अथवा** **मञ्जूषायां प्रदत्तशब्दानां सहायतया "अस्माकं ग्रामा:" विषयम् अधिकृत्य पञ्च वाक्यानि संस्कृते लिखत –** **मञ्जूषा-** ग्रामीणा: , सरला:, कृषिकार्यम्, वातावरणम्, पशुपालनम्, क्षेत्राणि , सिञ्चन्ति,अधुना, शिक्षा, कन्या:, आधुनिककृषि-साधनै:, जागरूका: | |
| | | |
| **4.अ** | **मञ्जूषायां प्रदत्तपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत –** आर्यन: —- भो अखिल ! भवान् किमर्थं द्विदिवसाभ्याम् विद्यालयं न आगत: ? अखिल: — (1) ——————————————————-। आर्यन्:— चिकित्सक: किं कथयति? किं कारणम् आसीत् तव अस्वस्थताया:? अखिल: —(उपेक्षया) (2) ———————————————-। | **(1x5=5)** |

| | | |
|---|---|---|
| | आर्यन: ——3) ——————————————————————————।<br>अखिल: —- किंतु मित्र! मह्यं संगणक-क्रीडा: अतीव रोचन्ते।<br>आर्यन: —— अहं जानामि, किंतु किम् स्व-स्वाथ्यस्य मूल्ये कृतं मनोरंजनम् उचितम् अस्ति?<br>अखिल: - (घ) ——————————————————————————<br>।<br>आर्यन: —आम्, अस्या: अवनते: कारणम् अपि एता: क्रीडा: एव सन्ति।<br>अखिल: - (ङ) ————————————————————————-।<br>**मञ्जूषा—-**<br>क) अये! स: तु किमपि न जानाति। स: कथयति यत् अहं संगणके दीर्घकालपर्यन्तं क्रीडा: न क्रीडेयम्।<br>ख) चिकित्सक: तु उचितमेव कथयति। त्वं संपूर्णे दिवसे संगणक-क्रीडासु मग्न: भवसि येन पुन:-पुन: तव शिरोवेदना जायते।<br>ग) मम शिरसि तीव्र पीडा आसीत्। शिरोघूर्मणम् अपि आसीत्।<br>घ) त्वं सत्यं वदसि। अस्मिन् सत्रे अहं परीक्षायाम् उत्तम-अड्.कान् अपि न प्राप्तवान्।<br>ङ) धन्यवाद: आर्यन! अद्यत: अहं केवलं सीमित-अवधये एव संगणके समयं यापयामि अध्ययने च दत्तध्यान: भविष्यामि। | |
| | **अथवा** | |
| **आ.** | **प्रदत्तशब्दसूचीसाहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तराणि उत्तरपुस्तिकायां लिखत –**<br>सुदामा नाम्न: एक: धार्मिक: 1) ————-विप्र: श्रीकृष्णस्य बालसखा आसीत्।एकदा धनाभावेन संत्रस्ता तस्य भार्या तं कृष्णं धनं 2) ———— द्वारकापुरीं गन्तुम् अकथयत्।सा मित्राय उपहारस्वरूपेण दातुं 3) —————— गृहात् तण्डुलान् आनीतवती पतये च अयच्छत्।कृष्ण: द्वारकाराज्यस्य 4) —————— आसीत्। यदा कृष्ण: स्व- द्वारपालस्य मुखात् मित्रस्य आगमनस्य संदेशं श्रुतवान्, स: धावन्, तस्य 5) ————- प्रासादस्य द्वारं प्रति गतवान्। सुदाम्न: जीर्णानि वस्त्राणि, कृशं 6) ———-,कंटकै: क्षत-विक्षतौ पादौ च दृष्ट्वा कृष्णस्य नेत्राभ्याम् अश्रूणि अपतन्। स: स्वयं तस्य पादौ अप्रक्षालयत् स्वयमेव गृहीत्वा च सुदाम्न: भार्यया प्रेषितान् 7) | **(1/2×10=5)** |

| | | |
|---|---|---|
| | ——————- अखादत्। किचित् कालानन्तरं यदा सुदामा स्व-गृहं प्रत्यागच्छत् तदा मार्गे स: अचिन्तयत् यत् कृष्ण: तस्मै किमपि 8) ———- नायच्छत्। परं गृहम् आगत्य स्व-कुटीरस्थाने 9) —————- स्वपत्नीं च अलंकारै: सुसज्जितां दृष्ट्वा सर्वम् अवाजानात्। 10) ——— मित्रता नरस्य भाग्यमपि परिवर्तते।<br><br>**मञ्जूषा——-**<br><br>धनम्, निर्धन:, याचितुम्, तण्डुलान्, नृप:, प्रातिवेशकस्य, नवप्रासादम्,स्वागतार्थम्, सन्मित्रस्य,शरीरं, | |
| | | |
| | **'ग' भाग:**<br>**अनुप्रयुक्तव्याकरणम् (25अड्.का:)** | |
| | | |
| **5. अ** | **अधोलिखितवाक्येषु रेखांकितपदेषु संधिं संधिविच्छेदं वा कुरुत-**<br>i. तत्र आगमनेन समय: **<u>वि+अर्थं</u>** भवति।<br>ii. **<u>कोऽयम्</u>** अनर्थ: क्रियते एताभ्यां वीराभ्याम्।<br>iii. काकस्य **<u>एकैकपक्षे</u>** मणिजालमपि भवेत्, तथापि स: काक: एव, न राजहंस:।<br>iv. राजर्षे! **<u>यत्+इच्छसि,</u>** तत् उच्यताम्।<br><br>**अथवा**<br><br>1. रमणीया हि **<u>सृष्टि:+एषा।</u>**<br>2. परद्रव्ये अनासक्ता सा **<u>न्यवेदयत्</u>**- नाथ! विरम अस्मात् लोभात्।<br>3. अस्मिन् प्रदेशे **<u>पञ्चाशदधिका:</u>** नद्य: प्रवहन्ति।<br>4. त्वया कति **<u>अम्+का:</u>** प्राप्ता:? | **(4x1=4)** |
| | | |
| **6** | **अधोलिखितवाक्येषु रेखांकितपदानाम् समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत**<br>i. मयूरस्य **<u>केकारवं</u>** श्रुत्वा कोकिल: अपि लज्जते।<br>(अ) केकस्य रवम् (ब) केकाया: रवम्<br>(स) केका इव रवम् (द) केकयां रवम् | **(4x1=4)** |

| | | |
|---|---|---|
| | ii. **<u>नतोन्नते</u>** मार्गे किमर्थं क्रीडथ?<br>(अ) नत: च उन्नत: च, तस्मिन्   (ब) नतस्य उन्नते<br>(स) नत: इव उन्नते   (द) । नत: न उन्नत:<br>iii. **<u>महीं पालयति इति</u>** प्रजां रक्षति।<br>(अ) महीप:   (ब) महिपाल:<br>(स) महीम्पाल:   (द) महीपाल:<br>iv. **<u>सामर्थ्यम् अनतिक्रम्य</u>** स्वधर्मस्य पालनं कुरु।<br>(अ) उपसामर्थ्यम्   (ब) अनुसामर्थ्यम्<br>(स) यथासामर्थ्यम्   (द) तथासामर्थ्यम् | |
| | | |
| 7. | **अधोलिखितवाक्येषु रेखांकितपदानाम् प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरम् प्रदत्तविकल्पेभ्य: चित्वा लिखत**<br>1. **<u>विचित्रा</u>** खलु दैवगति:।<br>( अ) विचित्र+टाप्   (ब) विचित्रा+टाप्<br>(स) विचित्र+तल्   (द) वि+चित्रा<br>2. अत्रत्यानाम् **<u>ऐतिहासिकानां</u>** स्थलानां विषये ज्ञातुमिच्छाम:।<br>(अ) ऐतिहास+ठक्   (ब) ऐतिहास+अक्<br>(स) इतिहास+ठक्   (द) इतिहासिक+अक<br>3. **<u>क्रूर+तल्</u>** तु सदैव निंदनीया।<br>(अ) क्रूरता   (ब) क्रूरतया<br>(स) क्रूरत्व   (द) क्रूरतला<br>4. **<u>बुद्धि+ मतुप्</u>** कन्यया सह मित्रतां कुरु।<br>(अ) बुद्धिमती   (ब) बुद्धिमत्यया<br>(स) बुद्धिमत्या   ( द) बुद्धिमता | **(4x1=4)** |
| | | |

| | | |
|---|---|---|
| 8.अ | **वाच्यानुसारम् मञ्जूषायाः चित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत-**<br>रविः- सन्दीप ! त्वं कुत्र गच्छसि।<br>सन्दीपः - (क) ———- तु विद्यालयस्य गणतन्त्रदिवससमारोहं द्रष्टुं गम्यते।<br>रविः - तत्र तु अद्य प्रधानाचार्यः छात्रान् ———।<br>सन्दीपः- आम्, तत्र प्रधानाचार्येण छात्राः सम्बुध्यन्ते।<br>रविः- प्रतियागितासु विजयिनः बालकाः पुरस्कारान् अपि गृह्णन्ति।<br>सन्दीपः- सम्यक् वदसि, बालकैः (ग) ———-गृह्यन्ते।<br>पुरस्काराः, मया, संबोधयति<br>**अथवा** | (3x1=3) |
| आ. | **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत-**<br>1. ———शिष्याः पाठ्यन्ते। (गुरु)<br>2. तैः आश्रमे ———(वस्)।<br>3. शिष्याः अधुना ———-स्मरन्ति। (पाठ) | |
| | | |
| 9. | **जन्मदिवसस्य अधोलिखितं कार्यक्रमम् समुचित कालबोधकैः शब्दैः पूरयत-**<br>1. प्रातः (7.30) वादने ———इष्ट-पूजनम्।<br>2. सायं (5.15) ———अपूपकर्तनम्।<br>3. सायं (7.45) वादने ——— भोजः। | (3x1=3) |
| | | |
| 10. | **(क) मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत-**<br>मा, विना, नूनम्, उच्चैः<br>1. त्वम् किमर्थम् एवम् ———- वदसि?<br>2. कोलाहलं ——— कुरु।<br>3. परिश्रमात् ———- कथं सफलः भविष्यसि? | (4x1=4) |

| | | |
|---|---|---|
| | 4. अस्मिन् वर्षे अहं परीक्षायाम् उत्तमान् अंकान् न प्राप्तवान्, किंतु भविष्ये अहं —————- परिश्रमं करिष्यामि। | |
| | | |
| **11.** | **अधोलिखितवाक्येषु रेखांकित-अशुद्धपदाय उचितपदानि चित्वा वाक्यानि पुनः लिख-**<br>**1. <u>सर्वा:</u>** सैनिका: देशभक्ता: सन्ति।<br>(अ) सर्वे (ब) सर्व:<br>(स) सर्वै: (द) सर्व एव<br>2. सैनिकेषु कोऽपि युद्धात् **<u>भयभीता:</u>** न आसीत्।<br>(अ) भया: (ब) भयभीते<br>(स) भयभीतौ (द) भयभीत:<br>3. लतायाम् त्रीणि **<u>पुष्पा:</u>** सन्ति।<br>(अ) पुष्पाणि (ब) पुष्पौ<br>(स) पुष्पे (द) पुष्पम् | **(3x1=3)** |
| | | |
| | **'घ' भागः**<br>**पठितावबोधनम्। (30 अङ्काः)** | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>अथ स राजा तान् उवाच-<br>दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः ।<br>कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः ।।<br>नाहं स्वर्गं मोक्षं वा कामये किन्तु आर्त्तानां परित्राणाय एव मे निश्चयः । अस्य याञ्चा वृथा मा अस्तु। इत्युक्त्वा स राजा वैद्योक्तविधिना नीलोत्पलम् इव एकं चक्षुः शनैः अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्। सः अपि तत् नेत्रं यथास्थानम् अस्थापयत्।ततो महीपाल: द्वितीयं नेत्रमपि शनै: निष्कास्य तस्मै अयच्छत्।<br>**I एकपदेन उत्तरत – (केवल प्रश्नद्वयम्)**<br>i. कः स्वर्गं न कामयते स्म ?<br>ii. केषां परित्राणाय राजा निश्चयम् अकरोत् ? | **5**<br><br><br><br><br><br><br>**(1/2×2=1)** |

| | | |
|---|---|---|
| | iii. राजा याचकाय किं समर्पितवान् ?<br>**II पूर्णवाक्येन उत्तरत – (केवल प्रश्नद्वयम्)**<br>i. कः अनिश्चितमतिः भवति ?<br>ii. याचकः नेत्रं कुत्र कथं च अस्थापयत् ?<br>iii. राजा याचकाय अन्यत् किम् अयच्छत्?<br>**III (अ) निर्देशानुसारम् उत्तरत -**<br>i. गद्यांशे 'अक्षतम्' इति विशेषणपदं कस्मै विशेष्याय प्रयुक्तम् ?<br>ii. 'व्यर्थम्' अस्मिन्नर्थे अत्र कः अव्ययः प्रयुक्तः ?<br>**अथवा**<br>(आ) निर्देशानुसारम् उत्तरत -<br>i. अत्र 'कामये' इति क्रियापदस्य कर्ता कः अस्ति ?<br>ii. 'द्वितीयम् ' इदं विशेषणपदं कस्मै प्रयुक्तम्? | <br>**(1×2=2)**<br><br><br><br>**(1×2=2)** |
| | | |
| **13.** | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत** – **(5)**<br>नानाशस्त्रविदः पूर्वे येऽप्यतीता महारथाः ।<br>नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन ॥<br>अपूर्वः कोऽपि कोषोऽयं विद्यते तव भारति।<br>व्ययतो वृद्धिमायाति क्षयमायाति संचयात् ॥<br>**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ।**<br>(क) कस्याः कोशः अपूर्वः ?<br>(ख) व्ययतः कः वृद्धिमायाति ?<br>(ग) पूर्वे कीदृशाः महारथाः आसन् ?<br>**II पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(1) भारत्याः कोशस्य क्षयः कथं भवति ?<br>(2) महारथिभिः ब्रह्मास्त्रस्य प्रयोगः मनुष्येषु कदा न कृतः ?<br>(3) प्रथम: श्लोक: केन कं प्रति कथ्यते? | **5**<br><br><br><br><br>**(2x1/2=1)**<br><br><br><br>**(2x1=2)** |

| | | |
|---|---|---|
| | **III. (अ) निर्देशानुसारम् उत्तरत -**<br>(1) 'निधिः' अस्मिन्नर्थे अत्र किं पदं प्रयुक्तम् ?<br>**(2) आयाति- अस्य क्रियापदस्य कर्ता कः ?**<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>**(1) अपूर्वः - अस्य किं विशेष्यपदं श्लोके प्रयुक्तम्?**<br>**(2) प्रयुक्तम्— अस्य क्रियापदस्य कर्तृपदं किम्?** | **(2x1=2)** |
| | | |
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>अश्वत्थामा - रे दुष्ट भीम ! त्वम् अद्य वध्योऽसि मया। (विलोक्य) अये ! कथं श्रीकृष्णार्जुनौ युधिष्ठिरश्च ? (स्वगतम्) इदानीं किं करवाणि? आः दृष्टम्, अस्मिन् विषमे समये ब्रह्मास्त्रम् एव मे शरणम्। मोचयामि अस्त्रम्। (ध्यानं नाटयति) इदम् अपाण्डवाय।<br>श्रीकृष्णः - पार्थ ! पश्य पश्य। एतद् विमुच्यते ब्रह्मास्त्रं द्रोणपुत्रेण। त्रैलोक्यं दहन् इव प्रचण्डज्वालः अग्निः परितः प्रसरति। अर्जुन ! अर्जुन ! त्वमपि मुञ्च ब्रह्मास्त्रम्, एतत् निवारयितुम्।<br>अर्जुनः - नमः भगवते। स्वस्ति आचार्यपुत्राय। स्वस्ति मे भ्रातृभ्यः। उत्सृज्यते मया ब्रह्मास्त्रम्। अस्त्रम् अस्त्रेण शाम्यताम्। | **5** |
| | **I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)।**<br>(1) द्रोणपुत्रेण किं विमुच्यते ?<br>(2) अर्जुनः सर्वप्रथमं कं नमस्करोति ?<br>(3) द्रोणपुत्रेण कः वध्यः आसीत्? | **(1/2x2=1)** |
| | **I. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>i. ब्रह्मास्त्रस्य प्रयोगात् परितः किं प्रसरति ?<br>ii. श्रीकृष्णः अर्जुनं किमर्थं ब्रह्मास्त्रं मोचयितुम् कथयति?<br>iii. प्रचण्डज्वालः अग्निः कं दहति? | **(2x1=2)** |

| | | |
|---|---|---|
| | **(अ) निर्देशानुसारम् उत्तरत-**<br>i. 'दृष्ट्वा' अस्य समानार्थकं पदं नाट्यांशात् चित्वा लिखत।<br>ii. 'मुञ्च' अस्य क्रियापदस्य कर्ता क:?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>कल्याणम्- अस्मिन्नर्थे अत्र किं पदं प्रयुक्तम्?<br>'प्रचण्डज्वाल: —- अस्य विशेषणपदस्य विशेष्यपदं किम् अस्ति? | **(2x1=2)** |
| | | |
| **15.** | **रेखाङ्कितपदानि आश्रित्य प्रश्ननिर्माणं कुरुत।**<br>(क) **<u>सड.गात्</u>** काम: जायते।<br>**(ख) <u>दानशालासु</u>** विचरन् राजा अचिन्तयत्।<br>**(ग) <u>जीवनं</u>** रसमयं कर्तव्यम्।<br>**(घ)** एतत् कुण्डं **<u>लोहितनद्या:</u>** किचिद् दूरं वर्तते।<br>**(ड्.)** सूर्योदये **<u>तम:</u>** नाशम् अभ्येति। | **(5x1=5)** |
| | | |
| **16.अ.** | **अधोलिखितस्य श्लोकस्य अन्वयम् उचितपदैः पूरयित्वा पूर्णोत्तरम् उत्तर-पुस्तिकायां लिखत -**<br>अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।<br>तदेवाहुः महात्मानः समत्वमिति तथ्यतः ॥<br>अन्वयः यदि अवक्रता (1) ———- चित्ते(2) ———- वाचि अपि भवेत् तदेव(3) ————तथ्यत: 4) ———- इति आहुः।<br>**मञ्जूषा—**<br>महात्मान:,तथा,यथा,समत्वम्<br>**अथवा** | **(4x1/2=2)** |

| | | |
|---|---|---|
| आ. | **निम्नलिखितस्य श्लोकस्य भावम् , मञ्जूषायाः सहायतया उपयुक्तपदैः पूरयत-**<br>धनस्य निःसारलघोः स सारो यद् दीयते लोकहितोन्मुखेन ।<br>निधानतां याति हि दीयमानम्, अदीयमानं निधनैकनिष्ठम् ॥<br>भावार्थः —- धनं तु तुच्छं भवति। तस्य अयम् एव (1) ————यत् धनं संसारस्य कल्याणाय (2) ———- तत् निधिरूपेण(3) ———- भवति, यत् न दीयते, तत् तु एकपदे एव(4) ——— भवति।<br>मञ्जूषा—<br>दीयते, सुरक्षितम् , सारः , विनष्टम् | |
| | | |
| 17. | **अधोलिखितवाक्येषु रेखाक्तिपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br>**(1) वर्षर्तौ तु मानसं <u>पलायसे</u>।**<br>(क) पालनं करोषि (ख) धावसि<br>(ग) नृत्यं करोषि (घ) दूषितं करोषि<br>**(2) भवतां जिज्ञासां <u>शमयितुम्</u> इच्छामि।**<br>(क) शान्तां कर्तुम् (ख) पूरयितुम्<br>(ग) ज्ञातुम् (घ) सोढुम्<br>**(3) स: सव्येन <u>पाणिना</u> चक्रं ग्रहीतवान्।**<br>(क) जलेन (ख) हस्तेन<br>(ग) मुनिना (घ) रुप्यकेण<br>**(4) काकस्य <u>गात्रं</u> यदि काञ्चनस्य भवेत्।**<br>(क) चञ्चु: (ख) पक्षा:<br>(ग) मुखम् (घ) शरीरम् | **(4x1=4)** |

| | | |
|---|---|---|
| **18.** | **मञ्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत।**<br>प्रियच्छात्राः! 1) ———— भवताम् अस्मिन् प्रदेशे।अस्य प्रदेशस्य नाम (2) —— ——— कथं जातम् ?<br>हिमाद्रितुङ्गश्रृङ्गैः सुशोभिता (3) ———- इयम्। शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं प्रकृतिः एव न विविधा मनोहरा च प्रत्युत (4) ———— अपि। अत्र अनेके (5) ———- मान्यन्ते। (6) ———— गोमहिषसदृशः एकः विशिष्टः राजपशुः। 'तवाङ्गगोम्पा' तु प्रसिद्धः (7) —————-। 'परशुरामकुण्डम्' अपि दर्शनीयम् अस्ति। इदं लोहितनद्याः (8) ————- मन्यते।<br>**मञ्जूषा——**<br>बौद्धमठः, मिथुनः, अभिनंदनम्, संस्कृतिः, अरुणाचलः, प्रमुखोत्सवाः,सूर्योदयभूमिः, उद्गमस्थलम् | **(8x1/2=4)** |

# संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)
# अभ्यास-प्रश्नपत्रम् -4 (हल रहित)
# कक्षा - दशमी

**अवधिः होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

   **'क' भागः अपठितावबोधनम्. 10 अङ्.काः**

   **'ख' भागः रचनात्मककार्यम् 15 अङ्काः**

   **'ग' भाग अनुप्रयुक्तव्याकरणम् 25 अङ्.काः**

   **'घ' भागः पठितावबोधनम् 30 अङ्काः**
3. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
5. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| | | |
|---|---|---|
| | **भाग-'क'**<br>**अपठित-अवबोधनम्** | |
| 1 | **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**<br>योगस्य महिमा भारतीयसंस्कृतौ मुक्तकंठेन गीता। लोकजीवने जीवनयात्राम् सम्यक् रूपेण यापयितुम् योगःपरमावश्यकः। इदमेव तथ्यं लक्ष्यीकृत्य अधुना पाठशालासु योगशिक्षा नियमितरूपेण आरब्धा। अद्य यत्र बालानाम् आहारः असन्तुलितः, भोजनम च अपौष्टिकं जातम्, ते यथा रात्रौ पठन्ति, चलदूरभाषयंत्रे वा वृथा समयं | **10** |

यापयन्ति ,तत्र तु योगनियमानाम् औचित्यं स्वयंसिद्धमेव । अनुचितजीवनरीत्या या स्वास्थ्यहानि: भवति, तस्या: निवारणाय योगः एव तेषां सहायक: भवितुं शक्यते।

अनया योग-शिक्षया बालकानां शारीरिक-मानसिक- आत्मिक: च सर्वाङ्गीणविकासः भवति। बाल्यकालात् एव योगामृतस्य रसास्वादनं कुर्वन्तः बालाः जीवने कदापि नैराश्यगर्ते न पतन्ति, कदाचारलीना: न भवन्ति, असफलतानां मुखं च न पश्यन्ति। ते स्वजीवनाय उचितं मार्गदर्शनं लभन्ते ।शरीरेण मनसा च स्वस्थाः भवन्ति। पाठशालासु योगशिक्षया बालकानां कुंचनीयताया: वृद्धिः भवति।तेषाम् अङ्गानि पुष्टतराणि भवन्ति एकाग्रतायां च वृद्धि: जायते।मानसिकं चाञ्चल्यम् क्षीयते। शरीरे रोगाणां प्रतिरोधकक्षमता अपि वर्धते।अत: जीवने सर्वै: नित्यं योगमार्ग: अवश्यमेव ग्रहणीय:।शुद्धे वातावरणे स्थित्वा ,शरीरस्य मनस: च योगेन कृत: योगाभ्यास: अतीव लाभप्रद: भवति।

**अ .एकपदेन उत्तरत— (केवलं प्रश्नद्वयम्)** **(2x1=2)**

i. योगस्य महिमा कुत्र गीता?

ii. योगेन किं क्षीयते?

iii. योग: कां निवारयितुं सहायक: भवति?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **(2x2=4)**

i. अद्य कुत्र योगनियमानाम् औचित्यं स्वयंसिद्धमेव ?

ii. योगाभ्यासेन शरीराय के लाभा: भवन्ति?

iii. बाल्यकालात् योगं कुर्वन्त: बालका: जीवने किं न कुर्वन्ति?

**इ. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **(1)**

**ई. यथानिर्देशम् उत्तरत-** **(3x1=3)**

**(1) 'वर्धते' अस्य क्रियापदस्य कर्तृपदं चित्वा लिखत ।**

(अ) अड्.गानि (ब) रोगप्रतिरोधकक्षमता

(स) कुंचनीयता (द) एकाग्रता

**(2) 'स्थिरता' इति पदस्य विपर्ययपदं चित्वा लिखत ।**

(अ) एकाग्रता (ब) कुंचनीयता

(स) चाञ्चल्यम् (द) वृद्धि:

<table>
<tr><td></td><td>(3) ‘कुर्वन्तः’—— अस्य विशेषणस्य विशेष्यपदं किम् अस्ति?<br>(अ) बाल्यकाल:      (ब) रसास्वादनम्<br>(स) योगामृत:       (द) बाला:</td><td></td></tr>
<tr><td></td><td></td><td></td></tr>
<tr><td colspan="3">'ख' भागः<br>रचनात्मकलेखनम्      (15 अङ्काः)</td></tr>
<tr><td>2</td><td>भवान् ऋषभः अस्ति। तव विद्यालये आयोजितस्य स्वच्छताभियानस्य वर्णनं कुर्वन्, स्वमित्रम् आयुषं प्रति लिखितम् इदं पत्रं, मञ्जूषायाः पदानि चित्वा पूरयत-<br>मञ्जूषा—<br>अवकरं, भित्तिषु, अभियानम्, ऋषभः, विद्यालयपरिसरं, आयुष, विस्तरेण, सारगर्भितम्, उद्यानानाम्, संतुष्टाः,<br><br>117, आर्यनगरम्<br>दिल्ली<br>तिथिः<br><br>प्रिय (1) —————<br>सप्रेम नमस्ते।<br>अत्र सर्वं कुशलं , तत्रास्तु। गतसप्ताहे अस्माकं विद्यालये स्वच्छता-अभियानस्य आयोजनं कृतम्। तस्य विवरणम् तवार्थे (2) —————लिखामि। मया सर्वै: छात्रै: सह उत्साहपूर्वकं तस्मिन् सहभागिता कृता।प्रात:काले प्रधानाचार्येण स्वच्छताया: महत्त्वविषयकम् एकं 3) ———— भाषणं कृतम्। तत: वयं दलेषु विभक्ता: अभवाम। अहम् मम मित्रै: सह 4) ——————- स्वच्छं कृतवान्।मार्गेषु, क्रीडाक्षेत्रे, कक्षासु, सभाभवने, सोपानेषु च विकीर्णम् 5) ———- संगृहीतं अवकरकण्डोले च क्षिप्तम्।केचन छात्रा: 6) ———- स्वच्छताकार्यमपि अकुर्वन्। स्वच्छताया: महत्त्वम् अधिकृत्य अनेके सूचिकापट्टा: अपि विद्यालयस्य 7) ——— अवलम्बिता:।कार्यसमाप्तौ अस्माकं विद्यालय: सुष्ठुरूपेण स्वच्छ: सुंदर: च प्रतीयते स्म।वयम् अतीव 8) ——- आस्म। प्रधानाचार्य: अपि छात्राणां परिश्रमस्य प्रशंसाम् अकरोत् ।</td><td>(1/2x10=5)</td></tr>
</table>

| | | |
|---|---|---|
| | तव विद्यालयेऽपि एतत् 9) ———- भवेत्,इति मम इच्छा अस्ति।<br>शेष कुशलम्। सर्वेभ्य: नमोनम:।<br>भवन्मित्रम्<br>(10) —————— | |
| | | |
| **3.अ**<br><br><br><br><br><br><br><br><br><br><br><br>**आ.** | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पंच वाक्यानि संस्कृतेन लिखत-**<br><br>**मञ्जूषा—-**<br>गर्ता:, जलपूरिता: , जना:, यातायातम्, रोगा:<br>स्कूटरयाने, वर्षाजलम्, मार्गे, काठिन्यम्<br>**अथवा**<br>**मञ्जूषायां प्रदत्तशब्दानां सहायतया "रेलस्थानकम्" विषयम् अधिकृत्य पञ्च वाक्यानि संस्कृते लिखत –**<br>**मञ्जूषा-**<br>लौहपथे ,आवागमनम्, रेलयानम्, प्रतीक्षन्ते, पश्यन्ति, आकारयति,<br>भारवाहका:, बहिः, उच्चैः, पठति, मञ्जूषाम्,वस्तूनि, क्षिपन्ति | **(5x1-5)** |
| | | |
| **4.अ** | **मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत –**<br>एकस्मिन् पात्रे जलं स्थापयन्तीं स्व-मातरं दृष्ट्वा, पुत्रेण तया सह कृतं संवादं, मंजूषाया: पदानां सहायतया पूरयत पुन: लिखत च—<br>पुत्र: ——अम्बे! भवती किं करोति? | **(1/2×10=5)** |

माता—अहं पात्रे जलं 1) ———- ।

पुत्र:- किमर्थं जलं पूरयसि?

माता- अयं निदाघकाल: । बहि: अतीव 2) ————— अस्ति।पक्षिण: तृषार्ता: भवन्ति।

पुत्र: ——-अहो! ग्रीष्मकाले तु 3) ——— लघुगर्ता: चापि शुष्का: भवन्ति।ते कुत: जलं प्राप्स्यन्ति?

माता- आम्, तदैव अहम् आङ्.गणे 4) ———- स्थापयामि । खगा: अत्र आगत्य जलं पिबन्ति।

पुत्र: ——- इदं तु अति 5) ———- कार्यम्, अहमपि 6) ———— करिष्यामि।

माता- साधु 7) ———! सर्वे 8) ———- अस्माकं मित्राणि सन्ति।

पुत्र: — आम् अम्बे! अद्यत: अहं प्रतिदिनं तेषां कृते जलं 9) ——————।

माता -शुभम्। दयालुता एव श्रेष्ठ: 10) ————— गुण:।

**मञ्जूषा—-**

| पूरयामि, उत्तमं,प्राणिन:, साहाय्यं, उष्णता,<br>जलाशया:, जलपात्रं,वत्स,स्थापयिष्यामि,मानवीय: |
|---|

**अथवा**

**आ.** **प्रदत्तशब्दसूचीसाहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तराणि उत्तरपुस्तिकायां लिखत** – **(1/2×10=5)**

पुरा 'उत्तानपाद:'इति नाम राजा आसीत्। तस्य द्वे 1) ———— आस्ताम्- सुरुचि: सुनीति: च।राज्ञ: प्रिया पत्नी सुरुचि: आसीत् नेतरा। स: सुरुचे: पुत्रे उत्तमे 2) ———- स्म न तु सुनीते: सुते ध्रुवे।एकदा उत्तमं 3) ————- क्रोडे उपविष्टं दृष्ट्वा बालक: ध्रुव: अपि राज्ञ: अङ्.के आरोढुं प्रयासोऽकरोत् परं उत्तानपाद: तं न उपवेशयत्। सुरुचि: अवदत्- ' बालक! एतत् सुखं तव 4) ——- न अस्ति। यदि त्वं नृपासनम् इच्छति, तर्हि 5) ————— आराध्य जन्मान्तरे मम पुत्र: भवितुं प्रयासं कुरु।भग्नहृदय: , रुदन् ध्रुव: मातु: समीपम् आगच्छत्। सुनीति: तम् अबोधयत् यत् 'त्वं परमपितु: अङ्.के उपविष्टुं , तस्य 6) ———- कुरु। तस्य कृपया त्वं सर्वोत्कृष्टं पदं प्राप्स्यसि।' मात्रा प्रेरित: बालक: ध्रुव: 7) ———— गत्वा ,नारदमुने: उपदेशेन एकाग्रमनसा 8) ———— रत: अभवत्। दीर्घकालपर्यन्तं स: तप: अकरोत्। तस्य भक्त्या 9) ———- ईश्वर: तस्मै वरम् अयच्छत् ।स: अकथयत्- 'वत्स! तव कल्याणं भवतु। अहं

| | | |
|---|---|---|
| | तुभ्यं नान्यैरधिष्ठितं 10) ———- प्रयच्छामि।तव नाम सदैव लोके मम भक्तरूपे प्रचरिष्यति।' <br> **मञ्जूषा——-** <br> प्रसन्नः, आराधनां,ध्रुवपदं,भार्ये,भाग्ये,तपसि, <br> वनं,भगवन्तम्, पितुः,स्निह्यति, | |
| | | |
| | **'ग' भागः** <br> **अनुप्रयुक्तव्याकरणम्   (25अङ्.काः)** | |
| | | |
| **5. अ** | **अ. अधोलिखितवाक्येषु रेखांकितपदेषु संधिं संधिविच्छेदं वा कुरुत-** <br> i. **वृक्ष+छाया** ग्रीष्मेषु सुखदा। <br> ii. **तावत्र** किमर्थम् आगतौ? <br> iii. **पर्जन्यः+तद्** राष्ट्रम् नाभिवर्षति। <br> iv. अस्माकं वदनाम्बुजे सरस्वती **सन्निधिं** कुर्यात्। <br> **अथवा** <br> i. **सभायामपि+अकातरः** मंत्री परैः न परिभूयते। <br> ii. वयं प्रक्षेपकयंत्रेण **केषाम्+चित्** स्थलानां परिचयं प्राप्स्याम:। <br> iii. मन: **दुर्निग्रहं** चलम्। <br> iv. **ते जगदीशस्य** पूजां कुर्वन्ति। | **(4x1=4)** |
| | | |
| **6** | **अधोलिखितवाक्येषु रेखांकितपदानाम् समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत** <br> 1. **वीणादक्षा** सा कन्या। <br> (अ) वीणाया: दक्षा   (ब) वीणां दक्षा <br> (स) वीणया दक्षा   (द) वीणायां दक्षा <br> 2. अहो! **न ज्ञानं** भवत्या:। <br> (अ) अज्ञानम्   (ब) अनज्ञानम् <br> (स) अभिज्ञानम्   (द) आज्ञानम् | **(4x1=4)** |

| | | | |
|---|---|---|---|
| | 3. **<u>पाणिपादं</u>** प्रक्षाल्य भोजनं कुरु।<br>(अ) पाणे: पादम्     (ब) पाणि: च पाद: च<br>(स) पाणी च पादौ च तेषां समाहार: (द) पाणिं च पादं च<br>4. **<u>विधिम् अनतिक्रम्य</u>** कार्यं कुरु।<br>(अ) यथाविधे:     (ब) यथाविधि<br>(स) यथाविधिम्     (द) विधे: सहितम् | | |
| | | | |
| 7. | **अधोलिखितवाक्येषु रेखांकितपदानाम् प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरम् प्रदत्तविकल्पेभ्य: चित्वा लिखत**<br>1. **<u>अभिमानिनी</u>** नारी  प्रशंसनीया न भवति।<br>(अ) अभिमान+इनी     (ब) अभि+मान+ई<br>(स) अभिमानिन्+ **ङीप्**     (द) अभिमानि+ई<br>2. **(उद्योग+ठक्)** ———— विकासेन पर्यावरणं प्रदूष्यते।<br>(अ) औद्योगिकेन     (ब) उद्योगिकेन<br>(स) उद्योगेन     (द) औद्योगिक:<br>3. महापुरुषा: सर्वै: सह **<u>विनम्रतया</u>**————-वार्तां कुर्वन्ति।<br>(अ) विनम्र+त्व     (ब) विनम्र+तल्<br>(स) विनम्रता+आ     (द) वि+नम्र+ता<br>4. ये शुभकार्याणि कुर्वन्ति, ते **<u>कीर्तिमन्त:</u>** भवन्ति।<br>(अ) कीर्तिमन्+त:     (ब) कीर्ति+ मतुप्<br>(स) कीर्त+मान्     (द) कीर्ति+वतुप् | **(4x1=4)** | |
| | | | |

| | | |
|---|---|---|
| 8.अ<br><br><br><br><br><br><br><br><br><br><br><br>आ. | **वाच्यानुसारम् मञ्जूषायाः चित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत-**<br>अध्यापकः —- नमिते! स्व- दिनचर्यां वद।<br>नमिता — महोदय ! अहं प्रातःकाले सर्वप्रथमं ईश्वरं 1) ————।<br>अध्यापकः - अति उत्तमम्। तदनन्तरं त्वम् किं करोषि?<br>नमिता— तदा मया विद्यालयाय 2) ————- क्रियते।<br>अध्यापकः — वत्से ! त्वं प्रातराशं कदा करोषि?<br>वसुधा - 3) ———— सार्धषट्वादने दुग्धं पीयते पौष्टिकः आहारः च क्रियते। ।<br>सज्जा, मया, नमामि<br>**अथवा**<br>**वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत-**<br>1. मालाकारः वृक्षान् ——————-।(सिच्)<br>2. सैनिकैः ———————- रक्ष्यते।(देश)<br>3. ——————- पुत्रः पाल्यते।(अम्बा) | (3x1=3) |
| | | |
| 9. | **विवाहदिवसस्य समारोहस्य , एतत् कार्यक्रमं समुचित कालबोधकैः शब्दैः पूरयत-**<br>1. सायंकाले (6.15) वादने ———————केककर्तनम्।<br>2. तदा (7.0) ———— जलपानम्।<br>**3.** रात्रौ (8.30) वादने —————— संगीतकार्यक्रमः। | (3x1=3) |
| | | |
| 10. | **(क) मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत-**<br>इव , सम्प्रति , नूनम्, वृथा<br>1. अग्निः ———— दहति माम् अयं शोकः ।<br>2. तर्हि ———— न जानाति भवान् तस्य मनोवृत्तिम्।<br>3. युधिष्ठिरः उवाच- ———— आश्वस्तः अस्मि।<br>4. मूर्खः ————वदति। | (4x1=4) |

| | | |
|---|---|---|
| **11.** | **अधोलिखितवाक्येषु रेखांकित-अशुद्धपदाय उचितपदानि चित्वा वाक्यानि पुनः लिखत-**<br>1. अत्र दश जना: सन्ति। तेषु वयं पञ्च बालिका: **सन्ति।**<br>(अ) अस्मि (ब) स्त:<br>(स) अस्ति (द) स्म:<br>2. गृहस्य पुरतः **उद्यानौ** स्त:।<br>(अ) उद्याने (ब) उद्यानानि<br>(स) उद्यानम् (द) उद्याना:<br>3. नृप: **निर्धनान्** धनं ददाति।<br>(अ) निर्धनै: (ब) निर्धनेषु<br>(स) निर्धनस्य (द) निर्धनेभ्य: | **(3x1=3)** |
| | | |
| | **'घ' भागः**<br>**पठितावबोधनम्। (30 अङ्काः)** | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुम् देवाधिपतिः शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा तत्पुरतः अवदत् - हे राजन् । भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि । देव ! रवि-शशि-तारामण्डलभूषितं जगत् एतत् कथमिव पश्येयम् चक्षुर्हीन: । राजा उवाच - भगवन् । भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि । आदिश्यताम्, किं करवाणि ? विप्रः उवाच - यदि भवान् प्रीतः, तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्।<br>**I एकपदेन उत्तरत – (केवल प्रश्नद्वयम्)**<br>i. देवाधिपतिः कः कथितः ?<br>ii. शक्रः कस्य दानवीरतां श्रुत्वा आगच्छत् ?<br>iii. राजा कम् अनुग्रहीतुम् इच्छति?<br>**II पूर्णवाक्येन उत्तरत – (केवल प्रश्नद्वयम्)**<br>1. शकः किमर्थं नेत्रहीनयाचकस्य रूपम् अधारयत्?<br>2. राजा आत्मानम् केन प्रकारेण अनुगृहीतं कर्तुम् इच्छति स्म ? | **5**<br>**(1/2×2=1)**<br>**(1×2=2)** |

| | | |
|---|---|---|
| | 3. जगत् कीदृशम् अस्ति? | |
| | **III (अ) निर्देशानुसारम् उत्तरत -**<br>1. दूरे— अस्य पदस्य विपर्ययपदम् अत्र किम्?<br>2. "प्रीत:" इति पदाय प्रयुक्तं विशेष्यपदं गद्यांशात् चित्वा लिखत।<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>1. अवदत्' इति क्रियापदस्य कर्तृपदं किम्?<br>2. चंद्र: —- अस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्? | **(1×2=2)** |
| | | |
| **13.** | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>चञ्चलं हि मनः कृष्ण ! प्रमाथि बलवद्दृढ़म् ।<br>तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥<br>क्रोधाद् भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।<br>स्मृति भ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ | **5** |
| | **I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ।**<br>i. कस्मात् सम्मोहः भवति ?<br>ii. कस्य निग्रहं सुदुष्करम् ?<br>iii. स्मृतिभ्रंशात् किं भवति ? | **(2x1/2=1)** |
| | **II. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>i. मनुष्यः कथं प्रणश्यति ?<br>ii. मनः कीदृशम् अस्ति ?<br>iii. प्रथमस्य श्लोकस्य वक्ता क:? | **(2x1=2)** |
| | **(अ) निर्देशानुसारम् उत्तरत -**<br>i. 'अविवेकः' इति अर्थे किम् पदम् अत्र प्रयुक्तम् ?<br>ii. 'सम्मोहः' इति, पदस्य किम् क्रियापदम् अस्ति ?<br>**अथवा** | **(2x1=2)** |

| | | |
|---|---|---|
| | **निर्देशानुसारम् उत्तरत -**<br>i. अस्मिन् श्लोके 'प्रमाथि' इति पदम् कस्य पदस्य विशेषणं अस्ति ?<br>ii. 'अतिकठिनम्' अस्मिन्नर्थे श्लोके किं पदम् आगतम्? | |
| | | |
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**शैलेश -** अहं जानामि इदं स्थानम् । इदं तु 'तवाङ्ग-गोम्पा इति प्रसिद्ध बौद्धमठः ।<br>**पर्यटनाधिकारी** - सम्यक् अभिज्ञातम् । मनोहरे सुरम्ये 'तवांग' इति स्थले राजते अयं बौद्धमठः। पञ्चशतानां बौद्धभिक्षूणां निवासयोग्या स्थली इयम्। लोहितजनपदे अपि अनेके बौद्धविहाराः सन्ति।<br>**नीलिमा** - मान्यवर ! मया अस्य प्रदेशस्य 'परशुरामकुण्डम' इति दर्शनीयस्थलविषये अपि पठितम्। किम् इदम् **?**<br>**पर्यटनाधिकारी** - आम् । एतत् कुण्डम् तु लोहितनद्या: किञ्चिद् दूरे अस्ति । पूर्वम् इदं ब्रहमकुण्डम् आसीत्। इदं लोहितनद्याः उद्गमस्थलमपि मन्यते । | **5** |
| | **I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ।**<br>i. किं कुण्डं लोहितनद्या: किञ्चिद् दूरे अस्ति ?<br>ii. 'तवाड्.ग' इति कति बौद्धभिक्षूणां निवासयोग्या स्थली ?<br>iii. परशुरामकुण्डं पूर्वं किं नाम कुण्डम् आसीत् ? | **(1/2x2=1)** |
| | **II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>i. 'तवाड्.ग गोम्पा' किम् अस्ति कुत्र च विद्यते ?<br>ii. 'मान्यवर' इति संबोधनपदं कस्मै प्रयुक्तम्?<br>iii. 'तवाड्.ग' इति स्थलं कीदृशम् अस्ति? | **(2x1=2)** |
| | **(अ) निर्देशानुसारम् उत्तरत-**<br>i. राजते- इति क्रियापदस्य कर्तृपदं किम् अस्ति ?<br>ii. 'सुष्ठुतया' अस्मिन्नर्थे अत्र किं पदम् आगतम्?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>i. समीपे- अस्य किं विपर्ययपदम् संवादेषु आगतम्?<br>**ii.** 'मनोरमे' अस्य विशेषणपदस्य विशेष्यपदं किम् अस्ति**?** | **(2x1=2)** |
| | | |

<table>
<tr><td>15.</td><td>रेखाङ्कितपदानि आश्रित्य प्रश्ननिर्माणं कुरुत।<br>(क) सूर्योदये <u>तम:</u> नश्यति।<br>(ख) दग्धां हयशालां विज्ञाय राजा <u>वैद्यान्</u> अवदत्।<br>(ग) सुखं वै <u>पुण्यकर्मणाम्।</u><br>(घ) मेष: <u>महानसं</u> प्रविशति।<br>(ङ्.) अहो! <u>विचित्र:</u> स्वप्नो मया दृष्ट:।</td><td>(5x1=5)</td></tr>
<tr><td></td><td></td><td></td></tr>
<tr><td>16.अ.<br><br><br><br><br><br><br><br><br><br>आ.</td><td>अधोलिखितस्य श्लोकस्य अन्वयम् उचितपदैः पूरयित्वा पूर्णोत्तरम् उत्तर-पुस्तिकायां लिखत<br>अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।<br>स्वाध्यायाभ्यसनं चैव वाङ्मयं तपः उच्यते ।।<br>अन्वय: — यत् वाक्यं (1) ———- सत्यं प्रियहितं च (2) ———- अभ्यसनं चैव (3) ————तप: (4) ————।<br>मञ्जूषा—<br>उच्यते, अनुद्वेगकरम्, स्वाध्याय:, वाड्.मयम्<br>अथवा<br>निम्नलिखितस्य श्लोकस्य भावम् , मञ्जूषायाः सहायतया उपयुक्तपदैः पूरयत-<br>आचार: प्रथमो धर्म: इत्येतद् विदुषां वच:।<br>तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषत:।<br>भावार्थः—- विद्वांस: (1) ————- यत् सदाचार: एव (2) ———- धर्म: अत: नर: आचारस्य (3) —————- प्राणेभ्य: अपि (4) ————— कुर्यात्।<br>मञ्जूषा—<br>प्रथम: ,कथयन्ति,रक्षां, विशेषरूपेण</td><td>(4x1/2=2)</td></tr>
<tr><td></td><td></td><td></td></tr>
</table>

| | | |
|---|---|---|
| **17.** | **अधोलिखितवाक्येषु रेखांकित-पदानाम् प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br>**(1) स्वाध्यायाभ्यसनं चैव वाङ.मयं तप: उच्यते।**<br>( क) साहित्यम् (ख) वाचिकम्<br>(ग) वाणी (घ) वाक्पटुता<br>**(2) शैला: विदीर्यन्ते।**<br>( क) शीलस्वभावा: (ख) पर्वता:<br>(ग) पाषाणखण्ड: (घ) विस्फोटा:<br>**(3) मम याचकानां संख्या विरला जाता।**<br>(क) सरला (ख) अधिका<br>(ग) विशिष्टा (घ) न्यूना<br>**(4) सर्वदा शारदा अस्माकं वदनाम्बुजे निवसेत्।**<br>(क) कमले (ख) मुखकमले<br>(ग) मुखे (घ) अम्बुजे | **(4x1=4)** |
| **18.** | **मञ्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत।**<br>द्रोणपुत्रेण (1) ————- हताः। युधिष्ठिरः द्रौपद्यै (2) ———- यच्छति । द्रौपदी (3) ———— क्षत्रधर्मस्य पालनं कर्तुम् कथयति। भीमः द्रोणपुत्रगतेन (4) ———— गच्छति । नकुलः भीमस्य (5) ———— भवति। कृष्णः युधिष्ठिरं द्रोणपुत्रस्य (6) ———- विषये कथयति ।सर्वे तत्र गच्छन्ति यत्र द्रोणपुत्रः (7) ———- विनाशाय ब्रह्मास्त्रं मुञ्चति। व्यासनारदौ अर्जुनं द्रोणपुत्रं च (8) ———- संहर्तुं कथयतः ।<br><br>**मञ्जूषा——**<br>पाण्डवानाम्, मार्गेण, चञ्चलप्रकृते:, सांत्वनाम्,सारथि:,<br>भीमम् , ब्रह्मास्त्रम्, द्रौपदीपुत्रा: | **(8x1/2=4)** |

# संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)
# अभ्यास-प्रश्नपत्रम् -5 (हल रहित)
# कक्षा - दशमी

**अवधिः होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

1.कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।

2.अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

| | | |
|---|---|---|
| **'क' भागः** | **अपठितावबोधनम्.** | **10 अङ्.का:** |
| **'ख' भाग:** | **रचनात्मककार्यम्** | **15 अङ्काः** |
| **'ग' भाग** | **अनुप्रयुक्तव्याकरणम्** | **25 अङ्.का:** |
| **'घ' भागः** | **पठितावबोधनम्** | **30 अङ्काः** |

3.प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

4.उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।

5.प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।

6.सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

7.प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| | | |
|---|---|---|
| | **भाग-'क'**<br>**अपठित-अवबोधनम्** | |
| 1 | **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**<br>मानवकर्तव्येषु आचारः एव प्रमुखः उपदिष्टः। सतां सज्जनानाम् आचार: "सदाचारः" इत्युच्यते। अद्यतने समाजे सर्वत्र अनैतिकतायाः साम्राज्यः दृश्यते। अद्य तु सदाचार-पालनस्य महती आवश्यकता उपस्थिता।<br>सर्वे धर्मनिरूपका: ग्रंथा: शिक्षयन्ति यत् मानवेषु मानवोचित- दयासत्यनिष्ठादिगुणानां प्रादुर्भावः अवश्यमेव भवितव्यः। एतेषां गुणानां समाहारः एवं "सदाचार:' इति | **10** |

| | | |
|---|---|---|
| | कथ्यते। सदाचारी नरः सदैव सत्यप्रियः भवति यतः असत्यं तु अनेकेषां अन्यदोषाणामपि आश्रयस्थलं भवति । नरः सर्वविधम् अशोभनीयं कृत्यं निलीयितुं असत्यस्य आश्रयं गृह्णाति ।<br><br>सदाचारी जनः स्वार्थं परित्यज्य त्यागेन एवं जगतः सुखानाम् उपभोगं करोति । बुभुक्षिताय दत्तं भोजनम्, रुग्णाय दत्ता औषधिः निर्धनाय दत्तं धनं च याम् आत्मतुष्टिं प्रयच्छति, न सा कोटिस्वर्णहीरकैः अपि प्राप्तुं शक्यते। । सदाचारिण: जनाः एव देशभक्ताः, परोपकारिणः समाजोन्नायका: च भवन्ति । ते निर्भयाः भवन्ति । सर्वप्राणिषु जगत्पतिं पश्यन्तः ते सर्वान् प्रति उदारहृदया: भवन्ति ।<br><br>**अ .एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>i. केषाम् आचार: 'सदाचार:' इत्युच्यते ?<br>ii. असत्यं केषाम् आश्रयस्थलं भवति ?<br>iii. सदाचारी जगत: सुखानाम् उपभोग: कथं करोति ?<br><br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>i. केषां गुणानां समाहार: 'सदाचार:' कथ्यते ?<br>ii. नर: असत्यस्य आश्रयं कदा गृह्णाति ?<br>iii. आत्मतुष्टि: कथं प्राप्यते?<br><br>**इ. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।**<br><br>**ई. यथानिर्देशम् उत्तरत-**<br>**1. 'समूह:' इति पदस्य समानार्थकं पदम् अनुच्छेदात् चित्वा लिखत।**<br>(अ) समाहार: (ब) सदाचार:<br>(स) निरूपका: (द) साम्राज्य:<br>**2. 'शिक्षयन्ति' अस्या: क्रियापदस्य कर्तृपदम् अनुच्छेदात् चित्वा लिखत ।**<br>(अ) जना: (ब) सर्वे<br>(स) धर्मनिरूपका: (द) ग्रंथा: | <br><br><br><br><br><br><br>**(2×1=2)**<br><br><br><br><br>**(2×2=4)**<br><br><br><br><br>**(1)**<br>**(3×1=3)** |

| | | |
|---|---|---|
| | **3. भयभीता: — इति पदस्य विपरीतार्थकं पदम् अनुच्छेदात् चित्वा लिखत।**<br>(अ) सत्यप्रिय: (ब) सदाचारिण:<br>(स) निर्भया: (द) परोपकारिण: | |
| | | |
| **'ख' भागः**<br>**रचनात्मकलेखनम् (15 अङ्का:)** | | |
| 2 | **भवत: नाम रुद्र: अस्ति। पितु: स्थानान्तरणकारणात् गोवाप्रदेशम् आगत:। अस्य प्रदेशस्य वर्णनं कुर्वन्, गुरुग्रामे स्थितं स्वमित्रं प्रति लिखितम् इदं पत्रं, मञ्जूषायाः पदानि चित्वा पूरयत पुन: च लिखत।**<br>**मञ्जूषा—**<br>विक्रम, समुद्रतटे,जलपरिवहनं,तण्डुलानां, नगरम्,स्थानान्तरणकारणात्,पणजी, अनुभवितुं,उत्सवप्रिया:,रुद्र:<br>81-ए, स्वर्णकुटीर:,<br>सम्भाजी(1) ——————<br>दिनाङ्:<br><br>प्रिय (2) ———-<br>नमस्ते।<br>अत्र कुशलं तत्रास्तु। जानासि त्वं यत् पितुः (3) ————— अहम् गोवाप्रदेशम् आगतवान्। अस्य रमणीयस्य प्रदेशस्य अद्भुतसौंदर्येण मंत्रमुग्ध: अहम् अस्मिन् पत्रे अस्मिन् विषये एव लिखामि।<br>भारतस्य पश्चिमदिशायां (4) ————— स्थित: गोवाप्रदेश: एकं, प्रसिद्धं पर्यटन-नगरम् अस्ति। अस्य प्रदेशस्य राजधानी (5) ———-विश्वे अति प्रसिद्धा। 'माण्डोवी' 'जुवारी' च अत्र द्वे प्रमुखे नद्यौ स्त:। जलेन पूरितयो: एतयो: नद्यो: (6) ————— सरलम् अस्ति।<br>अत्रत्या: जनाः 7) ——— सन्ति। गहनवनै: वेष्टित: अयं प्रदेश:। गोवाप्रदेशे मुख्यरूपेण(8) ———-कृषि: भवति। अतिलेखनेन अलम्, त्वं स्वयं दृष्ट्वैव अस्य आनन्दम् (9) ——————- शक्यते। अस्य मूर्तिकला, स्थापत्यकलादय: तु संसारे | **(1/2x10=5)** |

| | | |
|---|---|---|
| | प्रसिद्धा: सन्ति।अतः अवकाशेषु, स्वपरिवारेण सह अत्रैव आगच्छतु भवान् । पितृभ्यां मम सादरं प्रणामा: ।<br>तव सुहृत्<br>(10) ——————- | |
| | | |
| 3.अ | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पंच वाक्यानि संस्कृतेन लिखत-**<br><br><br>**मञ्जूषा—-**<br>रक्तदान-शिविर:, जीवनदानम्, स्वस्था:, परोपकार:,<br>द्वौ युवकौ, युवती,चिकित्सालये, परिचारिका, एकवारम्<br>आसन्दिका:, चिकित्सिका,<br>**अथवा** | **(5x1-5)** |

| | | |
|---|---|---|
| **आ.** | **'मम जननी' इति विषयमधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पंचभि: संस्कृतवाक्यै: एकम् अनुच्छेदं लिखत।**<br>**मञ्जूषा-**<br>अतिपरिश्रमी, महिला,स्नेहमयी,स्निह्यति, भोजनं , सुमधुरम्, उत्तिष्ठति, प्रातः , रात्रौ, चतुर्वादने, अध्ययने, कार्येषु , सहायताम्, | |
| | | |
| **4.अ** | **अधोलिखितं संवादं मञ्जूषाप्रदत्तपंक्तिसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत—**<br>**मधुप: —-** शर्वरि ! श्व: अस्माकं परीक्षा अस्ति।किम् त्वया परीक्षायै 1) ———— कृता ?<br>**शर्वरी** —- आम्, सज्जाम् तु अहं कृतवती परंतु अहम् अनुभवामि यथा अहं 2) ——— न जानामि।<br>मधुप: (विहस्य) —- त्वं सदैव परीक्षाया: 3) ———— एवमेव चिन्तयसि।<br>शर्वरी —- किं करोमि ?अहम् अतीव 4) ———- अस्मि।<br>मधुप: ——इदं केवलं तव 5) ———— एवास्ति। त्वं तु मत् अधिकं परिश्रमं करोषि।<br>शर्वरी —— आम्, किंतु वयं केवलं परीक्षाकाले एव पठाम:, एवं सम्यक् 6) —————— न भवति।<br>मधुपः —- सत्यं वदसि । यथा अस्माकं अध्यापिका: कथयन्ति, अस्माभि: नियमितरूपेण 7) ——- ।<br>शर्वरी—- अहं निश्चयम् अकरवम् यत् 8) ———- अहं प्रतिदिनम् अध्ययनं करिष्यामि।तदा मनसि न भविष्यति ईदृशी आशंका।<br>मधुपः- आम्, जीवने 9) ——— परिश्रमं अनिवार्यं भवति। 'परिश्रमेण हि सिध्यन्ति कार्याणि, न 10) ———-1<br>मनोरथै:, अध्ययनं,पूर्वम्, किंचिदपि, सफलतायै, पठितव्यम्, सज्जा, भयभीता, आशंका,आगामिसत्रे<br>**अथवा** | **(1/2×10=5)** |

| | | |
|---|---|---|
| आ. | **प्रदत्तशब्दसूचीसाहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तराणि उत्तरपुस्तिकायां लिखत –**<br><br>**मञ्जूषा—**<br><br>मृगयार्थम्, ऋषिपदम्, , धेनुः, स्पर्धा,अस्त्राणि ,वसिष्ठम्, अभवन्,आतिथ्यम्, नाम्ना, पिपासया,<br><br>क्षत्रियवंशे एक: विश्वरथः नाम राजा अभवत् यः अनन्तरं "विश्वामित्र" इति 1) ——- प्रसिद्ध: जातः।स: कान्यकुब्जनगरे राज्यं करोति स्म। एकदा सः ससैन्यं (2) ——— - गहनं वनं प्राविशत् बहुकालपर्यन्तं च वन्यपशून् अहन् । अन्ततः स: क्षुधया 3) —— च भृशं पीडित: भूत्वा समीपस्थं ऋषेः वसिष्ठस्य आश्रमं गतवान्। विश्वरथ: तत्र गत्वा वसिष्ठम् अनमत्। मुनेः समीपे 'नंदिनी' नाम दिव्या (4) ——— आसीत्। तस्याः प्रभावात् तेन सर्वेषां सैनिकानां नृपस्य च सम्यक् (5) ———— कृतम्। एवंविधं नन्दिन्याः प्रभावं दृष्ट्वा विश्वरथः (6) ———- नन्दिनीम् अयाचत् किंतु वसिष्ठः तस्य प्रार्थनां न स्वीकृतवान्। तयो: मध्ये महती (7) ————जाता। विश्वरथः सैनिकान् आदिदेश यत् 'नन्दिनीं बलपूर्वकं नयत' इति। तदा सा दिव्या गौ: क्रोधिता अभवत् ।तस्याः शरीरात् पुलिंदा:, शका:, यवनादय: अनेके सैनिकाः हस्तेषु (8) ———— गृहीत्वा निर्गच्छन्। विश्वरथेन अनेकानि भीषणानि अस्त्राणि प्रयुक्तानि परं सर्वाणि एव महर्षेः वसिष्ठस्य एकेन तपस्सिद्धेन दण्डेन भस्मसात् (9) ———।-अनन्तरम् विश्वरथः स्वक्षत्रियबलस्य निंदां कुर्वन् (10) ————- प्राप्तुं निश्चयमकरोत् राज्यभारं च पुत्रेषु निक्षिप्य वनं प्रति प्रस्थित:। | **(1/2×10=5)** |
| | | |
| | **'ग' भाग:**<br>**अनुप्रयुक्तव्याकरणम् (25अड्.का:)** | |
| | | |
| 5. अ | **अधोलिखितवाक्येषु रेखांकितपदेषु संधिं संधिविच्छेदं वा कुरुत-**<br>i. नर: जीवनस्य **<u>सदुपयोगं</u>** कुर्यात्।<br>ii. **<u>रौ+अन:</u>** रामस्य विरोधी आसीत्।<br>iii. **<u>पापिनाम्+च</u>** सदा दुखम्।<br>**iv.** बकस्य ध्यानावस्थाम् **<u>तेऽपि</u>** जानन्ति।<br><br>**अथवा** | **(4x1=4)** |

| | | |
|---|---|---|
| | 1. खग: आकाशे **स्वच्छंद:** उत्पतति।<br>2. संकटं दृष्ट्वा **य:+ मोहात्** केवलं परिदेवयेत्, तस्य क्रंदनं वर्धते एव।<br>3. एष: तु तव **मातृ+अधिकार**: अस्ति।<br>4. **तवौदार्यं** जनेभ्य: भवेत्। | |
| | | |
| 6 | **अधोलिखितवाक्येषु रेखांकितपदानाम् समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत**<br>**1. मुने: वाणी धर्मप्रदा अस्ति।**<br>(अ) धर्मस्य प्रदा (ब) धर्मं प्रदा<br>(स) धर्म: च प्रदा च (द) धर्मं प्रददाति इति<br>**2. मेष: अहर्निशं महानसं प्रविशति स्म।**<br>(अ) अह: च निशा च (ब) अहस्य निशा<br>(स) अहनि निशा (द) । अहम् च निशम् च<br>**3. सा बुद्धिमती परद्रव्ये अनासक्ता आसीत्।**<br>(अ) परे द्रव्ये (ब) परेषां द्रव्ये<br>(स) परं द्रव्ये (द) पर: च द्रव्य: च<br>**4. तौ साश्चर्यम् निजगृहं अपश्यताम्।**<br>(अ) सह आश्चर्यम् (ब) स आश्चर्यम्<br>(स) आश्चर्यस्य सह (द) आश्चर्येण सह | **(4x1=4)** |
| | | |
| 7. | **अधोलिखितवाक्येषु रेखांकितपदानाम् प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरम् प्रदत्तविकल्पेभ्य: चित्वा लिखत-**<br>**1. (विद्वस्+त्वम्) —————— जगति प्रसिद्धं भवति।**<br>अ) विद्वत्त्वम् (ब) विद्वत्ता<br>(स) विद्वस्त्वम् (द) विद्वानता<br>**2. रविवासरे (साप्ताहिक:) —————-अवकाश: भवति।**<br>(अ) साप्ताह+ठक् (ब) सप्ताहिक+अक्<br>(स) सप्ताह +ठक् (द) सप्ताह+इक | **(4x1=4)** |

| | | |
|---|---|---|
| | **3. य: नर: (रूप+मतुप्) ————- भवति, तं सर्वे पश्यन्ति।**<br>(अ) रूपमान्  (ब) रूपवान्<br>(स) रूपमन्त:  (द) रूपवत:<br>**4. अस्माभि: समाज-सेवा (कृ+तव्यत्) ———-।**<br>(अ) कृतव्या  (ब) करितव्या<br>(स) कर्तव्यम्  ( द) कर्तव्या | |
| | | |
| 8.अ<br><br><br><br><br><br><br><br><br><br><br><br><br>आ. | **वाच्यानुसारम् मञ्जूषायाः चित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत-**<br>माधवी —- अद्य तव जन्मदिनं, मम वर्धापनं स्वीकरोतु।<br>राधा—-धन्यवाद:! स्व -जन्मदिवसे प्रतिवर्षं मया आपणं गत्वा ——————- क्रीयन्ते।<br>माधवी - किं त्वं जन्मदिवसे नवीनानि वस्त्राणि न केष्यसि ?<br>राधा - नहि, ——————- तु नवीनानि पुस्तकानि पठितुम् उत्सुका अस्मि।<br>माधवी - परम् मह्यं तु नूतनं परिधानम् अतीव रोचते।<br>राधा - किं परिधानै: ? पुस्तकै: अस्माभि: ज्ञानं ——————-।<br>[ अहम् , प्राप्यते, पुस्तकानि ]<br>**अथवा**<br>**वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुन: लिखत-**<br>i. मया प्रात:काले षट्वादने ——————(उत्+स्था)<br>ii. तस्मिन् समये सूर्येण —————— हन्यते।(तमस्)<br>iii. ————आकाशे उड्डयन्ति।(खग) | **(3x1=3)** |
| | | |
| **9**. | **उचितैः समयवाचकशब्दैः रिक्तस्थानपूर्तिः करणीया-**<br>1. सम्प्रति -(4.00) ——————।<br>2. (4.30) —————— अहं कीडाक्षेत्रं गमिष्यामि।<br>**3.** अहं (5.45) ————- वादने दुग्धं पास्यामि । | **(3x1=3)** |
| | | |

| | | |
|---|---|---|
| **10.** | **(क) मञ्जूषायां प्रदत्तै: उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत-**<br><br>सहसा, किमर्थम् ,इव, उच्चैः<br><br>1. सा कक्षायाम् ————- कवितां पठति।<br>2. त्वम् —————रोदिषि?<br>3. वने —————- सिंह: आगच्छत्।<br>4. गुरूपदेश: —————- बालस्य वचनं मम चक्षुषी समुन्मीलितवान्। | **(4x1=4)** |
| | | |
| **11.** | **अधोलिखितवाक्येषु रेखांकित-अशुद्धपदाय उचितपदानि चित्वा वाक्यानि पुन: लिखत-**<br><br>**1. जलाशये <u>कमला:</u> विकसन्ति।**<br>(अ) कमलानि (ब) कमलम्<br>(स) कमल: (द) कमले<br>**2. उद्यमेन जना: साफल्यं <u>लभन्ति।</u>**<br>(अ) लभन्त: (ब) लभन्ते<br>(स) लभेथे (द) अलभन्<br>**3. अहं स: च तत्र <u>अगच्छताम्।</u>**<br>(अ) अगच्छत् (ब) अगच्छताम्<br>(स) अगच्छाव (द) अगच्छतम् | **(3x1=3)** |
| | | |
| | **'घ' भागः**<br>**पठितावबोधनम्। (30 अङ्काः)** | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>अनेन वचसा प्रतिहतान्तःकरण प्रच्छन्न भाग्यः अचिन्तयत्- किम् इदं वचनं विशेषेण माम् एव लक्ष्यीकरोति ? अहो । कुमार्गम् आश्रितस्य मम कीदृशी इयं क्लेशपरम्परा ।गुरूपदेशेन इव अनेन बालवचसा मम चक्षुषी समुन्मीलिते। अथ प्रभृति पापपथं त्यजामि इति विचिन्त्य मित्रं दुष्टबुद्धिम् अवदत्- 'सखे! यदि मां मित्रस्थाने परिगणयसि, तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान् । | **5** |

| | | |
|---|---|---|
| | दुष्टबुद्धिः तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखं प्राचलत्। प्रच्छन्नभाग्यः तु समुपजातविवेकः स्वगृहं प्रतिनिवृत्तः ।<br>**I एकपदेन उत्तरत – (केवल प्रश्नद्वयम्)**<br>i. कस्य अन्तःकरणं प्रतिहतम् अभवत् ?<br>ii. कः सद्वचनानि तिरस्कृतवान् ?<br>iii. प्रच्छन्नभाग्यस्य चक्षुषी केन समुन्मीलिते?<br>**II पूर्णवाक्येन उत्तरत – (केवल प्रश्नद्वयम्)**<br>i. प्रच्छन्नभाग्यः दुष्टबुद्धिम् किम् अकथयत् ?<br>ii. बालवचनं कीदृशम् आसीत् ?<br>iii. कीदृश: प्रच्छन्नभाग्य: गृहं प्रतिनिवृत्त:?<br>**III (अ) निर्देशानुसारम् उत्तरत -**<br>i. गद्यांशे 'नेत्रे' अस्मिन्नर्थे किं पदं प्रयुक्तम्?<br>ii. 'प्राचलत्' अस्य क्रियापदस्य कर्तृपदं किम् अस्ति ?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>i. भवान्- अस्य कर्तृपदस्य क्रियापदं किम् अस्ति?<br>ii. गृह्णामि- अस्या: क्रियाया: कर्तृपदं किम्? | <br><br>**(1/2x2=1)**<br><br><br><br>**(1x2=2)**<br><br><br><br>**(1x2=2)** |
| | | |
| **13.** | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>क्रन्दनं वर्धते तस्य नान्तं समधिगच्छति ।<br>व्यसनं प्राप्य यो मोहात् केवलं परिदेवयेत् ॥<br>पापिनाञ्च सदा दुखम्, सुखं वै पुण्यकर्मणाम् ।<br>एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत् ॥<br>**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ।**<br>1. किं प्राप्य मोहग्रस्त: नर: परिदेवयेत् ?<br>2. मोहग्रस्तस्य नरस्य किम् अन्तं न गच्छति?<br>3. सदैव किं समाचरेत् ? | **5**<br><br><br><br><br>**(2x1/2=1)** |

| | | |
|---|---|---|
| | **II. पूर्णवाक्येन उत्तरत।        (केवलं प्रश्नद्वयम्)**<br>1. केषां सदा दुःखं भवति केषां च सदा सुखम् ?<br>2. पापपुण्ययो: स्थिरतरम् किम् भवति?<br>3. संकटं प्राप्य नर: किं न कुर्यात्?<br>**(अ) निर्देशानुसारम् उत्तरत -**<br>1. 'विलापं  कुर्यात्' अस्मिन् अर्थे किं पदं श्लोके प्रयुक्तम् ?<br>2. 'समधिगच्छति'- अस्या:  क्रियायाः कर्तृपदं किम् अस्ति ?.<br>**अथवा**<br>**निर्देशानुसारम् उत्तरत -**<br>1. द्वितीये श्लोके के द्वे परस्परविपरीतार्थकपदे प्रयुक्ते?<br>2. 'विज्ञाय' अस्मिन्नर्थे द्वितीयश्लोके किं पदम् आगतम्? | **(2x1=2)**<br><br><br><br>**(2x1=2)** |
| | | |
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>पर्यटनाधिकारी-  साधु पृष्टम्। अत्र अनेके प्रमुखोत्सवाः। 'वाड्.चो' जनजातीनां प्रमुखं पर्व "ओरिया" इति अस्ति। एतत् तु 'फरवरी' इति मासे मान्यते। अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च सामाजिकं कार्यं क्रियते। 'मोपीन' इति अपि कृषिपर्व अस्ति। देवानामपि देवः 'मोपीन' इति कथ्यते। 'होली' सदृशम् एव पर्व इदम्। जनाः परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति। इदम् 'अप्रैल' इति मासे मान्यते। 'ओणम्' पर्व समं 'साडकेन' एकम् अन्यत् पर्व अस्ति। लामासम्प्रदायस्य 'लोसर' इति प्रमुखं पर्व अपि फरवरी इति मासे सम्पद्यते।<br>हिमांशु: ——अस्माभिः 'मिथुन' इति विषये अपि किंचिद् श्रुतम्। किं तत् ?<br>पर्यटनाधिकारी ——-मिथुनः गोमहिषसदृशः एकः विशिष्टः राजपशुः अस्ति।<br>शोभा—- वयम् अत्रत्यानाम् ऐतिहासिकस्थलानां विषये ज्ञातुम् इच्छामः ।'<br>**I. एकपदेन उत्तरत -       (केवलं प्रश्नद्वयम्) ।**<br>i. के ऐतिहासिकस्थलानां विषये ज्ञातुम् उत्सुकाः ?<br>ii. 'होली' सदृशं पर्व किम् ?<br>iii. मिथुनः कः अस्ति ? | **5**<br><br><br><br><br><br><br><br><br><br>**(1/2×2=1)** |

| | | |
|---|---|---|
| | **II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>i. 'लोसर' इति कस्य प्रमुखपर्व ?<br>ii. नाट्यांशस्य आधारे अरुणाचलप्रदेशस्य प्रमुखपर्वणां नामानि लिखत।<br>iii. 'मोपीन' इति पर्वणि जना: किं कुर्वन्ति?<br>**(अ) निर्देशानुसारम् उत्तरत-**<br>i. संवादे 'पर्व' अस्य किं समानार्थकं पदं प्रयुक्तम्?<br>ii. लिम्पन्ति—— अस्या: क्रियाया: कर्तृपदं किम् अस्ति?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>i. प्रमुखं पर्व- अनयो: पदयो: विशेष्यपदं किम्?<br>ii. वयम् - अस्य कर्तृपदस्य क्रियापदं किम् अस्ति? | **(2×1=2)**<br><br><br><br>**(1×2=2)** |
| | | |
| **15.** | **रेखाङ्कितपदानि आश्रित्य प्रश्ननिर्माणं कुरुत।**<br>1. प्रच्छन्नभाग्य: **कर्मपुरे** अवसत्।<br>2. तस्य पत्नी **बुद्धिमती** आसीत्।<br>3. पठने **अक्षराणां** स्पष्टता स्यात्।<br>4. राजा प्रीत्या याचकाय **चक्षु:** समर्पितवान्।<br>5. स्मृतिभ्रंशात् **बुद्धे:** नाश: भवति। | **(5x1=5)** |
| | | |
| **16.अ.** | **अधोलिखितस्य श्लोकस्य अन्वयम् उचितपदैः पूरयित्वा पूर्णोत्तरम् उत्तर-पुस्तिकायां लिखत -**<br>चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद्दृढम् ।<br>तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥<br>अन्वयः -कृष्ण! 1) ————-हि चंचलम्,2) ————— प्रमाथि। अहं 3) ————- निग्रहं 4) ———— इव सुदुष्करम् मन्ये। | **(4x1/2=2)** |

| | | |
|---|---|---|
| आ. | **मञ्जूषा—**<br>तस्य, मनः, वायोः , बलवद्दृढ़म्<br>**अथवा**<br>**निम्नलिखितस्य श्लोकस्य भावम् , मञ्जूषायाः सहायतया उपयुक्तपदैः पूरयत-**<br>यः इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।<br>न कुर्यादहितं कर्म स परेभ्यः कदापि च।<br>भावार्थः— यः नरः1) ————- अनेकानि सुखानि कल्याणं च 2) ———— सः अन्येभ्यः अपि3) ————कार्यं कदापि न 4) ————-।<br>**मञ्जूषा—**<br>अहितकारि,आत्मने,कुर्यात्,इच्छति | |
| | | |
| **17.** | **अधोलिखितवाक्येषु रेखाक्तिपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br>**(1) प्रथमं त्वम् ज्ञान-विज्ञाननाशनम् एनम् हि <u>प्रजहि</u>।**<br>(अ) पालनं कुरु (ब) गृहाण<br>(स) पश्य (द) विनाशय<br>**(2) <u>सम्प्रति</u> परिश्रमं कुरु।**<br>(अ) प्रभूतम् (ब) अधिकम्<br>(स) इदानीम् (द) शीघ्रम्<br>**(3) <u>महाशनो</u> महापाप्मा विद्ध्येनमिह वैरिणम्।**<br>(अ) महाशयः (ब) बहुभोजी<br>(स) शत्रुः (द) महान्<br>**(4) <u>आर्तानां</u> परित्राणाय एव मे निश्चयः।**<br>(अ) तुष्टानाम् (ब) याचकानाम्<br>(स) साधूनाम् (द) दुखितानाम् | **(4x1=4)** |

| 18. | **मञ्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत।**<br>अथ बोधिसत्व: पूर्वजन्मपुण्यफलै:1.————- राजा बभूव ।स: 2.———, वृद्धोपसेवी दानशील: च आसीत्। स: प्रजा: 3.————- पालयति स्म। देशान्तरेभ्योऽपि जना: तस्य 4.———— आकर्ण्य आयान्ति स्म। एकदा तस्य दानशीलतां परीक्षितुम् 5.———- नेत्रहीनयाचकस्य रूपेण तत्र आगतवान्। याचकः एकस्य चक्षुषः दानम् अयाचत् । राजा प्रसन्नतया याचकाय 6.———— समर्पितवान्। तस्य कल्याणभावनया आश्चर्यचकित: इन्द्र: पुन: तस्य नेत्रे 7.——— ——। स: राज्ञे 8.————- पारं द्रष्टुं वरमपि अयच्छत्।<br><br>**मञ्जूषा—**<br><br>शैलानाम्, विनयशील:, शिवीनाम्, चक्षुर्द्वयमेव, दानशीलताम्, प्रत्यारोपितवान्, शक्रः, पुत्रवत्, | (8x1/2=4) |
|---|---|---|

# संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)
# अभ्यास-प्रश्नपत्रम् -6 (हल रहित)
# कक्षा - दशमी

**अवधिः होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

   **'क' भागः अपठितावबोधनम्. 10 अङ्.काः**

   **'ख' भागः रचनात्मककार्यम् 15 अङ्काः**

   **'ग' भाग अनुप्रयुक्तव्याकरणम् 25 अङ्.काः**

   **'घ' भागः पठितावबोधनम् 30 अङ्काः**

3. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
5. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| भाग-'क'<br>अपठित-अवबोधनम् | | |
|---|---|---|
| 1 | **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**<br>कस्यापि देशस्य राष्ट्रध्वजः तस्य प्रतिष्ठायाः सूचकः भवति।तस्य संस्कृतेः वाहकः आदर्शाणां च द्योतकः वर्तते।अस्माकं राष्ट्रध्वजः 'त्रिवर्णः' इति कथ्यते यतः अस्मिन् त्रयः वर्णाः सन्ति।सर्वोपरि अस्ति केसरवर्णः। एषः वर्णः भारतीयसंस्कृतेः त्यागस्य बलिदानभावनायाः च प्रतीकः विद्यते। वयम् त्यागे विश्वसिमः न तु संचये।मध्ये स्थितः अस्ति श्वेतवर्णः। अयं अस्माकं सात्विकतां पवित्रतां च सूचयति।भारतभूमिः ऋषीणां | **10** |

तपस: आध्यात्मिकताया: च संस्कारभूमि: अस्ति।अध: वर्तते हरितवर्ण: य: अस्माकं शस्यश्यामलाया: धराया: द्योतक: अस्ति। सौंदर्यपूर्णा उर्वरा चास्ति भारतवसुंधरा। ध्वजस्य मध्यभागे नीलवर्णम् एकं चक्रं विद्यते। इदं प्रसिद्धात् 'अशोकस्तम्भात्' गृहीतम्। अस्य चतुर्विंशति: अरा: कथयन्ति यत् सततं उद्यमं प्रयासं च कुर्यात्। अहर्निशं कार्यरत: भवेत्। अस्माकं प्रगते: सूचकम् इदम् चक्रम्।अस्माकं राष्ट्रीय-गौरवस्य प्रतीक: अयं ध्वज: अस्मभ्यं सदैव आदरणीय: अस्ति। स्वतंत्रतादिवसे गणतंत्रदिवसे च वयं सम्मानपूर्वकम् अस्य उत्तोलनं कुर्म: अस्य गुणगानं च कुर्म:।

**अ. एकपदेन उत्तरत— (केवलं प्रश्नद्वयम्)** **(2x1=2)**

i. अस्माकं ध्वजे कति वर्णा: सन्ति?

ii. वयं कस्मिन् विश्वसिम: ?

iii. ध्वजस्य नीलचक्रं कुत: गृहीतम् ?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **(2×2=4)**

i. भारतध्वजस्य श्वेतवर्ण: किं सूचयति ?

ii. ध्वजस्य हरितवर्ण: कस्य प्रतीक: ?

iii. अशोकचक्रस्य अरा: किं शिक्षयन्ति ?

**इ. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **1**

**ई. यथानिर्देशम् उत्तरत-** **(3×1=3)**

**(1) 'सौंदर्यपूर्णा' इति पदं कस्य पदस्य विशेषणम्?**

(अ) ध्वजस्य (ब) भारतवसुंधराया:

(स) उर्वराया: (द) तपस:

**(2) कथयन्ति – इति क्रियापदस्य कर्तृपदं किम्?**

(अ) अरा: (ब) ध्वज:

(स) हरितवर्ण: (द) चक्रम्

**(3) शुचिताम्—— अस्मिन्नर्थे गद्यांशे किं पदम् आगतम्?**

(अ) आध्यात्मिकताम् (ब) गौरवम्

(स) बलिदानभावनाम् (द) पवित्रताम्

| 'ख' भागः<br>रचनात्मकलेखनम् (15 अङ्काः) | | |
|---|---|---|
| **2** | **भवान् आरवः अस्ति। धूम्रपानस्य कुप्रभावं हानिम् च वर्णयन्, स्वमित्रं प्रति लिखितम् इदं पत्रं, मञ्जूषायाः पदानि चित्वा पूरयत-**<br>**मञ्जूषा—**<br>मुम्बईनगरतः, आरवः, बहिः,धूम्रपानम्, शुभकामनाः,सप्रेम, आचारः , प्राप्तम् कुसंगतिकारणात् ,समर<br>परीक्षा भवनात्<br>(1) ——————-<br>दिनाङ्कः<br><br>(2) प्रिय——————!<br>(3) ———-नमस्कारः ।<br>अद्य एव तव पत्रम् (4) ————। तव उत्तमं परिणामं दृष्ट्वा अहम् अति प्रसन्नः अस्मि। त्वया लिखितं यत् तव विद्यालये केचन छात्राः 5) ——— निंदनीयं कार्यं कुर्वन्ति। ते सदैव कक्षायाः 6) ——— एव भ्रमन्ति कदापि च न पठन्ति । ते यदा - कदा (7) ———-अपि कुर्वन्ति। परं मित्र ! त्वं तु जानासि यत् इदं व्यसनं स्वास्थ्याय अतीव हानिकरं भवति। अपि च त्वया तु पठितम् एव यत् (8) "——— प्रथमो धर्मः"। अतः मित्र! त्वम् आचारं रक्ष।एतादृशैः छात्रैः सह संगतिं कदापि मा कुर्याः।<br>अन्ते, भविष्येऽपि तव सफलतायै मम (9) ————। मातृपितृचरणेषु मम प्रणामाः।<br>तव अभिन्नहृदयम्<br>10.———— | **(1/2x10=5)** |
| | | |

| | | |
|---|---|---|
| **3.अ** | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पंच वाक्यानि संस्कृतेन लिखत-**<br><br>**मञ्जूषा—-**<br>दीपोत्सव:, दीपका:, परिवार:, माता-पितरौ<br>प्रज्वालयन्ति, मिष्टान्नानि, विभूषितम्,पुत्र:<br>कन्या, प्रसीदन्ति,प्रकाशः<br><br>**अथवा** | **(5x1-5)** |
| **आ.** | **'उपकारिणी प्रकृति:' इति विषयमधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया पंचभि: संस्कृतवाक्यै: एकम् अनुच्छेदं लिखत।**<br>**मञ्जूषा-**<br>अस्मभ्यम्, अवकरम्, कर्तनेन, छायाम्, जले, प्रदूषणेन,<br>अन्नानि, फलपुष्पाणि, नदीजलम्, सूर्य: | |
| | | |
| **4.अ** | **अधोलिखितं संवादं मञ्जूषाप्रदत्तपंक्तिसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत—**<br>राहुलः ——मयूर ! वयं 1) —— द्रष्टुं गच्छाम:। त्वम् अपि चल।<br>मयूरः —-न, अहं तु मम पितामहेन सह 2) ———- गच्छामि।<br>राहुलः- परन्तु तव पितामहः तु स्वयमेव 3) ————शक्नोति ।<br>त्वं किमर्थं गच्छसि ? त्वम् 4) ————- सह आगच्छे:। | **(1/2×10=5)** |

| | | |
|---|---|---|
| | मयूरः ——मित्र ! मम पितामह: प्राय: 5) ————एव स्व-कक्षे तिष्ठति।अहम्, मम भ्राता मातापितरौ च सदैव स्वकार्येषु 6) ——— भवाम: ।कदापि तेन सह समयं न 7) —————-।स: अपि अस्माकं 8) ———— इच्छति। तस्य भावनाया: 9) —————- अपि तु अस्माकं कर्तव्यम्।<br><br>राहुलः ——साधु, मयूर ! 10) ———————————तव विचारा:।<br>त्वम् पितामहेन सह अवश्यमेव गच्छेः।<br><br>एकाकी ,अस्माभि: ,चलचित्रं,सान्निध्यम्, यापयाम: प्रशंसनीया:, सम्मानम्,व्यस्ता:, आपणम्, गन्तुम्<br><br>**अथवा** | |
| **आ.** | **प्रदत्तशब्दसूचीसाहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तराणि उत्तरपुस्तिकायां लिखत –**<br>**मञ्जूषा—**<br><br>सबल: , अपसारणम्, आज्ञाम् ,श्रम:, शिला, कार्यम्, भक्त:, स्मितमान:, निरत:, बृहच्छिलाम्<br><br>ईश्वरस्य1———-एकः बालकः आसीत्। एकदा स: स्वप्ने प्रभुम् अपश्यत्। ईश्वर: अवदत् - 'त्वं तु मम भक्तः असि, अतः मम एकं 2.———- कुरु। तव गृहात् बहिः एका 3.—— अस्ति, तां शिलां तत्स्थानात् अपसारय।' बालकस्य ईश्वरे दृढविश्वासः आसीत्। अतः अविचार्य एव सः ईश्वरस्य 4.———- अमन्यत। प्रातःकाले उत्थाय सः 5.———- अपश्यत्। ईश्वरं स्मृत्वा बालकः तस्मिन् कार्ये नियुक्तः जातः। तदा तं दृष्ट्वा जनाः अकथयन्- "अस्याः शिलायाः 6.———- असम्भवम्, अतः व्यर्थं परिश्रमं मा कुरु।" परं सः बालकः तस्मिन् कार्ये 7.———- अभवत्। इत्थं कार्यं कुर्वन् तस्य शरीरं तु बलवत् अभवत् परं सः निराशः जातः। रात्रौ स्वप्ने पुनरागतम् ईश्वरं सः अकथयत्- "मया कृतः 8.——— तु व्यर्थः जातः। शिला तु तत्रैव वर्तते।" 9.———- ईश्वरः प्रत्यवदत्- "अस्मिन् जगति किमपि कार्यं निष्फलं न भवति। पश्य, त्वं निर्बल: आसी: परम् अधुना 10.————- असि। 'जीवने परिश्रमं कदापि वृथा न भवति।' | **(1/2×10=5)** |
| | | |

| | | |
|---|---|---|
| | **'ग' भागः**<br>**अनुप्रयुक्तव्याकरणम्  (25अङ्.काः)** | |
| | | |
| **5. अ** | **अधोलिखितवाक्येषु रेखांकितपदेषु संधिं संधिविच्छेदं वा कुरुत-**<br>i. उद्याने **वृद्धाः+अपि** भ्रमन्ति स्म।<br>**ii.** अग्नये **स्वाहा।**<br>iii. **धिक्+युष्मान्** येन पक्षिकुलम् अवमानितम्।<br>iv. **लभते+अयं** सततं सफलताम् ।<br>**अथवा**<br>**अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>i. **सत्+गुरुः** सदैव शिष्यस्य हितमेव इच्छति।<br>ii. वानराः राज्ञः **भवनं** त्यक्तुम् उद्यताः नासन्।<br>iii. भारति! तव कोशः **व्ययतः+वृद्धिम्** आयाति।<br>**iv.** भारते **षड् ऋतवः** क्रमेण आयान्ति यान्ति च। | **(4x1=4)** |
| | | |
| **6** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत**<br>**1) अस्मिन् अवसरे सेतुनिर्माणं क्रियते।**<br>अ) सेतुस्य निर्माणम्  ब) सेत्वोः निर्माणम्<br>स) सेतोः निर्माणम्  द) सेतुःच निर्माणं च<br>**2) सः प्रत्यहं पठति।**<br>अ) अहनि अहनि इति  ब) अहः अहः प्रति<br>स) अहम् अहम् इति  द) अहे अहे इति<br>**3) प्रकृतिः कथयति- सर्वहितं भवेत्।**<br>अ) सर्वाय हितम्  ब) सर्वेभ्यः हितम्<br>स) सर्वस्य हितम्  द) सर्वाणि हितम् | **(4x1=4)** |

<table>
<tr><td></td><td>4) <u>ग्रीष्मवसन्तशिशिरा:</u> ऋतव: उत्तरायणे भवन्ति।<br>अ) ग्रीष्मं च वसन्तं च शिशिरं च    ब) ग्रीष्मे च वसन्ते च शिशिरे च<br>स) ग्रीष्मं च वसन्तं च शिशिरं च    द) ग्रीष्म: च वसन्त: च शिशिर: च</td><td></td></tr>
<tr><td></td><td></td><td></td></tr>
<tr><td>7.</td><td>अधोलिखितवाक्येषु रेखांकितपदानाम् प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरम् प्रदत्तविकल्पेभ्य: चित्वा लिखत<br>1. विश्व+<u>बन्धुता</u> भारतीयसंस्कृते: विशेषता अस्ति।<br>अ) बन्धु+तल्    ब) बन्धु+आ<br>स) बन्धु+ता    द) बन्धु+त्व<br>2. पुस्तकालयात् पुस्तकानि बहि: न <u>नी+ तव्यत्।</u><br>(अ) नेतव्या:    ब) नेतव्यानि<br>स) नीतव्यानि    द) नेतव्यतानि<br>3. महापुरुषा: अभ्युदये <u>क्षमा+मतुप्</u> भवन्ति।<br>अ) क्षमामत्    ब) क्षमामन्त:<br>स) क्षमावन्त:    द) क्षमावत:<br>4. शिक्षया बालकानाम् <u>बौद्धिक:</u> विकास: भवति।<br>अ) बोधि+इक    ब) बुद्धि+ठक<br>स) बुद्ध+इक:    द) बुद्धि+ठक्</td><td>(4x1=4)</td></tr>
<tr><td></td><td></td><td></td></tr>
<tr><td>8.अ</td><td>वाच्यानुसारम् उचितपदै: रिक्तस्थानानि पूरयित्वा वाक्यानि पुन: लिखत -<br>लतिका- राहुल! किं जनक: तुभ्यं प्रतिदिनं विंशति: रुप्यकाणि यच्छति?<br>राहुल: —- आम्, तेन मह्यं रुप्यकाणि ——————-।<br>लतिका- —————-तै: रुप्यकै: क्रीडनकं क्रीणासि?<br>राहुल: - नहि, मया तु तै: ——————- क्रीयेते।<br>मञ्जूषा—<br>फले ,दीयन्ते, त्वम्<br><br>अथवा</td><td>(3x1=3)</td></tr>
</table>

| | | |
|---|---|---|
| **आ.** | **i.** छात्रै: ———————— नम्यन्तो।**(गुरु)**<br>**ii.** —————- दुग्धं पिबाव:। **(अस्मद्)**<br>**iii.** जनै: कविता —————-। **(श्रु)** | |
| | | |
| 9. | **कालबोधकशब्दै: अधोलिखित-दिनचर्यां पूरयत-**<br>i. रामानुज: ————————(3.30) वादने सभाम् अगच्छत्।<br>ii. तत्र ———————(4.15) वादने तस्य भाषणम् अभवत्।,<br>iii. ———————-(6.45) जलपानस्य व्यवस्था आसीत्। | **(3x1=3)** |
| | | |
| **10.** | **(क) मञ्जूषायां प्रदत्तै: उचितै: अव्ययपदै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत-**<br>श्व:, अद्य, इति, सहसा<br>i. ता: पठनाय ——————— गमिष्यन्ति।<br>ii. 'सत्यमेव जयते'————— उक्ति: प्रसिद्धा अस्ति।<br>iii. ————- तु रविवासर: अस्ति, विद्यालये अवकाश: अस्ति।<br>iv. किमपि कार्यं ——————— न कुर्यात्। | **(4x1=4)** |
| | | |
| **11.** | **अधोलिखितवाक्येषु रेखांकित-अशुद्धपदाय उचितपदानि चित्वा वाक्यानि पुन: लिखत-**<br>**1. उद्याने <u>वृक्षाणि</u> सन्ति।**<br>(क) वृक्षम् ख) वृक्षा:<br>(ग) वृक्षौ घ) वृक्षे<br>**2. त्वमेव एतत् कार्यं <u>कुरुत</u>।**<br>(क) कुरु ख) कुरुहि<br>(ग) करु घ) करोति<br>3. वयम् **सफलतां <u>लभन्ते</u>।**<br>क) लभाम: ख) लभेत<br>ग) लभन्ति घ) लभामहे | **(3x1=3)** |
| | | |

| | | |
|---|---|---|
| | **'घ' भागः**<br>**पठितावबोधनम्।** **(30 अङ्काः)** | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>कस्मिंश्चिद् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत् । तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठं, मृण्मयं भाजनं, कांस्यताम्रपात्रं वा पश्यन्ति तेन तम् आशु ताडयन्ति स्म।मेषस्य सूपकाराणां कलहम् अवेक्ष्य नीतिविदाम् अग्रणी वानरयूथपतिः अचिन्तयत्- 'एतेषां कलहो न वानराणां हिताय।'<br>**एकपदेन उत्तरत -** **(प्रश्नद्वयम्)**<br>(क) राजपुत्राः कीदृशाः आसन् ?<br>(ख) मेषः महानसं किमर्थं प्रविशति स्म ?<br>(ग) सूपकाराः कं ताडयन्ति स्म?<br>**पूर्णवाक्येन उत्तरत-** **(प्रश्नद्वयम्)**<br>(क) सूपकाराः मेषं केन ताडयन्ति स्म ?<br>(ख) राजपुत्राः राजभवने नित्यमेव किं कुर्वन्ति स्म ?<br>(ग) वानरयूथपतिः किम् अचिन्तयत्?<br>**अ. निर्देशानुसारम् उत्तरत-**<br>i. 'दिवारात्रिः" अस्मिन्नर्थे अत्र कः शब्दः प्रयुक्तः ?<br>ii. भक्षयति- इति क्रियापदस्य कर्ता कः?<br>**अथवा**<br>**आ.निर्देशानुसारम् उत्तरत-**<br>i. 'मेषयूथम्'' अस्य किं विशेषणपदम् गद्यांशे प्रयुक्तम्?<br>ii. शीघ्रम्- अस्मिन्नर्थे अत्र किं पदं प्रयुक्तम्? | **5**<br><br>**(1/2x2=1)**<br><br>**(1x2=2)**<br><br>**(1x2=2)** |
| | | |

| | | |
|---|---|---|
| **13.** | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**<br>आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः ।<br>तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ।।<br>आयुषः क्षणमेकोऽपि न लभ्यः स्वर्णकोटिकैः ।<br>स चेन्निरर्थकं नीतः का नु हानिस्ततोऽधिका ।।<br>**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) स्वर्णकोटिकैः आयुषः किं न लभ्यः ?<br>(ii) कः निरर्थकं नीतः ?<br>(iii) सदाचारं केभ्य: विशेषत: रक्षणीयम् ?<br>**II. पूर्णवाक्येनोत्तरत - (केवलं प्रश्नद्वयम्)**<br>i. कुतः अधिका हानिः न अस्ति ?<br>ii. विद्वांसः सदाचारस्य विषये किं कथयन्ति ?<br>iii. सदाचारस्य रक्षां कथं कुर्यात् ?<br>**III. यथानिर्देशमुत्तरत —-**<br>i. 'वयसः' अस्य कः पर्यायः श्लोके आगतः?<br>ii. 'प्रथम: धर्म:' अनयो: पदयो: विशेषणपदं किम्?<br>**अथवा**<br>**निर्देशानुसारम् उत्तरत-**<br>i. 'सार्थकम्' अस्य किं विलोमपदम् अत्र प्रयुक्तम्?<br>ii. 'हानिः' अस्य किं विशेषणम् ? | **5**<br><br><br><br><br>**(2x1/2=1)**<br><br><br><br>**(2×1=2)**<br><br><br><br>**(2×1=2)** |
| | | |
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन उत्तरत-**<br>वर्षर्तौ तु मानसं पलायसे । अहम् एव अत्र वृष्टेः अभिनन्दनं करोमि । कीदृशी तव मैत्री ?<br>आपत्काले सरांसि त्यक्त्वा दूरं व्रजसि । वस्तुतः अहमेव शीतले जले बहुकालपर्यन्तम् अविचलं ध्यानमग्नः 'स्थितप्रज्ञ' इव तिष्ठामि । दुग्धधवला मे पक्षाः। न जाने कथं माम् अपरिगणयन्तः जनाः चित्रवर्णं अहिभुजं मयूरं 'राष्ट्रपक्षी' इति मन्यन्ते । | **5** |

| | | |
|---|---|---|
| | **I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(क) वर्षर्तौ कः मानसं पलायते ?<br>(ख) बकः बहुकालपर्यन्तं कुत्र तिष्ठति ?<br>(ग) राष्ट्रपक्षी क: मन्यते?<br>**पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(1) बकस्य पक्षाः कीदृशाः सन्ति ?<br>(2) बकः मयूरस्य विषये किं कथयति ?<br>(3) बक: शीतले जले बहुकालपर्यन्तं किमर्थं तिष्ठति?<br>**निर्देशानुसारम् उत्तरत-**<br>i. "आपत्काले दूरं <u>व्रजसि</u>" अत्र रेखांकितक्रियापदस्य कर्ता कः?<br>ii. चित्रवर्णम्- अस्य विशेषणपदस्य विशेष्यपदं किम्?<br>**अथवा**<br>**निर्देशानुसारम् उत्तरत-**<br>(i) मलिना: - अस्य किं विपर्ययपदं नाट्यांशे आगतम्?<br>(ii) जना: - अस्य कर्तृपदस्य क्रियापदं किम्? | **(1/2x2=1)**<br><br><br><br>**(2x1=2)**<br><br><br><br>**(2x1=2)** |
| | | |
| **15.** | **रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत –**<br>i. <u>**विमूढधी:**</u> पक्वं फलं भुङ्.क्ते।<br>ii. काम: एव <u>**अस्माकं**</u> शत्रु:।<br>iii. <u>**अरुणाचलप्रदेशे**</u> पंचाशदधिका: नद्य: प्रवहन्ति।<br>iv. <u>**शांतचित्त**</u>: प्रच्छन्नभाग्य: कस्यचित् कृषकस्य क्षेत्रे कार्यं कर्तुम् आरभत।<br>v. अरुणाचले <u>**अनेके**</u> उत्सवा: मान्यन्ते। | **(5x1=5)** |
| | | |
| **16.अ.** | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत–**<br>मित्ररूपा हि रिपवः सम्भाष्यन्ते विचक्षणैः ।<br>ये हितं वाक्यम् उत्सृज्य विपरीतोपसेविनः ॥ | **(4x1/2=2)** |

| | | |
|---|---|---|
| आ. | ये 1.————-वाक्यम् उत्सृज्य 2.———— ते विचक्षणैः 3.———— हि रिपवः4.————.l<br><br>**मञ्जूषा—**<br><br>विपरीतोपसेविनः, सम्भाष्यन्ते, हितम्, मित्ररूपाः<br><br>**अथवा.**<br><br>**मंजूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत –**<br><br>विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः ।<br>अन्येषां वदने ये तु ते चक्षुर्नामिनी मते ॥<br><br>**भावार्थः**— जनाः विद्यारूपिणा 1——- सर्वं व्यवहारं कर्तुं समर्थाः । अतः अस्मिन् (2) ————केवलं ज्ञानिनः एव (3) ——— । ये सन्ति विद्याहीनाः तेषां नेत्रे तु (4) ———-एव।<br><br>**मञ्जूषा—**<br><br>जगति,नेत्राभ्याम्, नाममात्रे, चक्षुष्मन्तः | |
| | | |
| **17.** | **अधोलिखितवाक्येषु रेखाक्तिपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br><br>**(i) अलम् अलं <u>मिथः</u> कलहेन।**<br>(क) मिथुना (ख) मिथ्या<br>(ग) परस्परम् (घ) महता<br><br>**(ii) वयम् <u>अटव्यां</u> रुक्षफलानि न खादिष्यामः।**<br>(क) वने ख) पाकशालायाम्<br>(ग) उद्याने (घ) धरायाम्<br><br>**(iii) शरीरविमोक्षणात् <u>प्राक्</u> एव मनसः निग्रहं कुरुत।**<br>(क) पश्चात् (ख) पूर्वम्<br>(ग) विना (घ) ऋते | **(4x1=4)** |

| | | |
|---|---|---|
| | **(iv) शारद शारद-<u>अम्भोज</u>-वदना अस्ति।**<br>(क) अम्बा (ख) जलम्<br>(ग) कमलम् (घ) सर: | |
| **18.** | **मञ्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत।**<br>एकदा द्वे मित्रे धनं चोरयितुं 1.———। एकस्य नाम दुष्टबुद्धिः आसीत् 2. ———-नाम प्रच्छन्भाग्य:।<br>मार्गे बालानां वचनं श्रुत्वा 3.——— चौरकर्म त्यक्तुम् इच्छति। भार्यायाः परामर्शानुसारं सः परिश्रमेण4.——- करोति । दुष्टबुद्धिः इदं श्रुत्वा मित्रस्य 5.———- तस्य गृहं गच्छति। तत्र सःशृणोति यत् प्रच्छन्नभाग्यस्य क्षेत्रे 6.———— एकः सुवर्णकलश: अस्ति।) दुष्टबुद्धिः अश्वत्थमूलं खनित्वा सर्पयुक्तं 7.————-प्राप्नोति। सर्पः 8.———- एव दष्टवान् ।<br>**मञ्जूषा——**<br>धनार्जनम्, अपरस्य, प्रच्छन्नभाग्यः, दुष्टबुद्धिम् , प्रस्थितौ,सुवर्णकलशम्,धनहरणार्थम्, अश्वत्थतरुमूले, | **(8x1/2=4)** |

# संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)
# अभ्यास-प्रश्नपत्रम् -7 (हल रहित)
# कक्षा - दशमी

**अवधिः होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

   **'क' भागः अपठितावबोधनम्. 10 अङ्.काः**

   **'ख' भागः रचनात्मककार्यम् 15 अङ्काः**

   **'ग' भाग अनुप्रयुक्तव्याकरणम् 25 अङ्.काः**

   **'घ' भागः पठितावबोधनम् 30 अङ्काः**
3. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
5. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| | | |
|---|---|---|
| | **भाग-'क'**<br>**अपठित-अवबोधनम्** | |
| 1 | **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**<br>पुरा भारते अनेका: नार्य: न केवलम् उच्चशिक्षिता: अपितु वेदज्ञाः शास्त्रनिपुणा: चासन्। गार्गी, मैत्रेयी, लोपा मुद्रा, लीलावती सदृशविदुषीणाम् वैदुष्येण जगत् चमत्कृतम् आसीत्। मैत्रेयीगार्गीसमा: अनेका: नार्यः भारते ब्रह्म वादिन्यः अभवन्। एवं प्राचीनकालस्य वन्दिता नारी मध्ययुगे सम्मानहीना गतगरिमा च जाता। यवनानाम् आक्रमणैः भारतीय- नारीणां दशा अवनता जाता। सा अवगुण्ठने बन्दीकृता समाजेन | **10** |

च दासीपदं नीतवती। किन्तु तदापि नार्यः अन्त:शक्तिः स्वप्रकाशं यत्र-तत्र प्रदर्शितवती एव।

मध्यकाले भारतस्य प्रगतिः अपि अवरुद्धा। तदनन्तरं राजाराममोहनराय:, केशवचन्द्रसेन:,देवेन्द्रठाकुर:,महात्मागांधिमहोदय:स्वामिदयानन्द'सरस्वती'प्रभृति महानुभावा: नारीस्वातन्त्र्यहेतु: प्रयासं कृतवन्त:। एवं शनैः शनैः भारतीयनार्यः निजगौरवमयं स्थानं पुन: प्राप्तवत्य:।

अद्य भारतीयनार्य: सर्वेषु क्षेत्रेषु उच्चतमपदेषु आसीना: सन्ति।श्रीमती द्रौपदीमुर्मु: भारतस्य महिला राष्ट्रपति:, श्रीमती निर्मला सीतारमण: च वित्तमंत्री अस्ति।अद्य पी. वी. सिंधु:,कल्पना चावला, किरण बेदी,इंद्रा नूई,किरणमजूमदार 'शॉ',सर्वा: नार्य: स्व-स्वक्षेत्रेषु सफलताया: शिखरं स्पृशन्त्य: भारतस्य मानोन्नतिं कुर्वन्ति।

**अ. एकपदेन उत्तरत— (केवलं प्रश्नद्वयम्)** **(2x1=2)**

i. मैत्रेयीगार्गीसदृश्य: नार्य: कीदृश्य: अभवन् ?

ii. नारी कदा सम्मानहीना जाता ?

iii. अद्य भारतीयनार्य: केषु आसीना: सन्ति ?

**आ.पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **(2x2=4)**

i. पुरा भारते नार्य: कीदृश्य: आसन् ?

ii. नारीस्वातंत्र्यहेतु: के प्रयासम् अकुर्वन् ?

iii. अद्य भारतीयराजनीत्यां कार्यरतयो: द्वयो: नार्यो: नामनी लिखत ?

**इ. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **(1)**

**ई. यथानिर्देशम् उत्तरत-** **(3x1=3)**

**(1) 'निरादरा:' अस्मिन्नर्थे अत्र कः शब्दः आगतः ?**

(अ) वेदज्ञा: (ब) सम्मानहीना:

(स) आसीना: (द) बंदीकृता:

**(2) 'शास्त्रनिपुणा:' अस्य पदस्य विशेष्यपदं किम् अस्ति ?**

(अ) उच्चशिक्षिता: (ब) वेदज्ञा:

(स) गतगौरवा: (द) नार्य:

| | | |
|---|---|---|
| | **(3) 'कृतवन्त:' अस्य क्रियापदस्य कर्तृपदं किम् अस्ति?**<br>(अ) राजाराममोहनराय: (ब) दयानन्द:<br>(स) देवेन्द्रठाकुर: (द) महानुभावा: | |
| | | |

**'ख' भागः**

**रचनात्मकलेखनम् (15 अङ्का:)**

| | | |
|---|---|---|
| 2 | **भवान् प्रशान्त: अस्ति। गतावकाशेषु भवान् स्वग्रामम् अगच्छत् । ग्रामस्य अनुभवान् वर्णयन्, स्वमातुलेयं प्रति लिखितम् इदं पत्रं, मञ्जूषाया: पदानि चित्वा पूरयत-**<br>**मञ्जूषा—**<br>सर्वविधम्,साक्षरा:,समीपस्थानि,शुद्धं, मुख्यराजमार्गे,कृषका:,आधुनिकोपकरणानाम्, विश्रुत, नमस्ते. अभिन्नहृदय:,<br>57- मधुरनिवास:<br>अम्बालानगरम्<br>तिथि :<br>प्रिय (1) ————————<br>सस्नेहं (2) —————<br>अत्र (3) ————कुशलं वर्तते। अस्मिन् ग्रीष्मावकाशे अहं मम पितामहस्य समीपे तस्य ग्रामम् अगच्छम्। अस्माकं ग्रामः उत्तरप्रदेशे लखनऊनगरस्य समीपे (4) ————- स्थितः अस्ति। तस्य शोभा दर्शनीया। अस्माकं ग्रामस्य जनसंख्या प्राय: द्विसहस्त्रं परिमित: अस्ति, ग्रामे अधिकांशा: जना: (5) ——सन्ति क्षेत्रेषु विविधानि अन्नानि, शाकान् च उत्पादयन्ति,किंतु अधुना ते कृषिकार्ये (6) ————- प्रयोगं कर्तुं जानन्ति। ग्रामे सर्वे जना: (7) ————- सन्ति।तत्र एक: विद्यालय:, एकः उच्चतर -माध्यमिकः विद्यालयः चास्ति। बहुविध-उच्चशिक्षाप्राप्त्यै छात्राः (8) ———नगराणि गच्छन्ति। ग्रामे दुग्धम्, घृतनवनीतं सर्वं (9) ———— प्राप्यते। ग्रामीणजनाः सुखदुखे परस्परं सहयोगं सहायतां च कुर्वन्ति। अस्मिन् शीतावकाशे त्वया अपि मया सह तत्र अवश्यमेव गंतव्यम्। | **(1/2x10=5)** |

| | | |
|---|---|---|
| | शेषं कुशलम् अस्ति।मातापितरौ नमस्करोमि।<br>तव (10) ———-<br>प्रशांत: | |
| | | |
| **3.अ** | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पंच वाक्यानि संस्कृतेन लिखत-**<br><br>**मञ्जूषा—-**<br>उद्याने, परिवार:, सूर्य:, हरित:, घास:,<br>विहाराय, बालिका, हस्ते, कुक्कुर: ,<br>मनोरंजनम्, तित्तलिका: | **(5x1-5)** |
| | **अथवा** | |
| **आ.** | **मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत - अस्माकं पर्यावरणम्**<br>**मञ्जूषा-**<br>**वायु:,जलम्,महानगरेषु ,धूम्रेण, प्रदूषितम् , यानानाम् , रोपणीया:, नदीषु, अवकरम् ,क्षेपणीयम्, कर्तनीया:, संरक्षणम् ,जीवनाय** | |
| | | |
| **4.अ** | **अधोलिखितं संवादं मञ्जूषाप्रदत्तपंक्तिसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत—**<br>अन्वी ——तूलिके ! त्वं कस्मिन् कार्ये 1) ——- असि? | **(½x10=5)** |

| | | |
|---|---|---|
| | तूलिका – अहं तु होलिकोत्सवस्य 2) ——— रता अस्मि। दिनद्वयस्योपरांते एव अस्ति 'होली'3) ———।<br><br>अन्वी— आम् ,श्व: मम जननी संयावान् पक्ष्यति। 4) ——-सा अस्मिन् अवसरे मिष्टान्नानि पचति।<br><br>तूलिका—-मह्यं रक्तपीतवर्णै: होलिक्रीडनं बहु रोचते। अहं तव मुखेऽपि भृशं 5) —— लेपयिष्यामि।(हसति)<br><br>अन्वी —- वर्णै: शालिचूर्णै: च क्रीडनं तु मह्यम् अपि रोचते किंतु जना: यदा 6) —— वर्णान् अन्येषु क्षिपन्ति, तदा अहम् अतीव 7) ——— भवामि।<br><br>तूलिका- त्वं सत्यं वदसि। इत्थमेव होलीपर्वणि मदिरापानम्, मादकद्रव्यानां सेवनम् 8) ———— व्यवहारं चापि अस्य उत्सवस्य आनन्दं नाशयति।<br><br>अन्वी- अयं तु प्रेमसौहार्दस्य 9) ——- च उत्सव: अस्ति। वयं परस्परं 10) ——— - इमम् मानयेम, न कलहेन।<br><br>तूलिका- सत्यमिदम्।<br><br>क्षुब्धा, सज्जासु, अशोभनीयम्, प्रतिवर्षं, व्यस्ता, शालिचूर्णं, रसायनयुक्तान्,आनन्दस्य,पर्व, स्नहेन<br><br>**अथवा** | |
| **आ.** | **प्रदत्तशब्दसूचीसाहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तराणि उत्तरपुस्तिकायां लिखत –**<br><br>**मञ्जूषा—**<br><br>हिंसया, कपोती,अनुस्मरन्, व्याधेन,मुक्त्वा गहनवने,महती, क्षुधया, दातुम्, अग्निं.<br><br>एकस्मिन् 1) ——- एक: व्याध: प्रतिवसति स्म। स: नित्यं बहूनां प्राणिनां 2) —— स्वजीवननिर्वाहं करोति स्म।एकदा वने भोजनार्थम् इतस्तत: परिभ्रमत: तस्य हस्ते काचित् 3) ———आगता।तां पंजरे निक्षिप्य स: गृहं प्रति अचलत्।यदा स: मार्गे गच्छति स्म,तदैव सहसा 4) —— वृष्टि: आरब्धा।स: एकस्य वृक्षस्य अध: स्थित्वा , शीतेन, 5) ——— च बाध्यमान: उच्चै: अवदत्- 'अहं शरणागत: अस्मि। य: अस्मिन् वृक्षे वसति, स: मम रक्षां कुर्यात्।' तस्मिन् वृक्षे स: एव कपोत: वसति स्म यस्य भार्या 6) ——— बद्धा। कपोत: तां स्मृत्वा विलापं करोति स्म।कपोती पत्यु: | **(1/2×10=5)** |

<table>
<tr><td></td><td>वचनं श्रुत्वा तम् अबोधयत् यत् ‘यद्यपि अहम् एतेनैव व्याधेन बंदीकृता अस्मि,तथापि त्वं स्वधर्मम् 7) ——- अस्य शरणागतस्य रक्षां सहायतां च कुर्या:।’ तस्या: वचनै: प्रेरित: कपोत: शुष्कानि पर्णानि आनीय 8) —— च संपाद्य तस्य शीतबाधां दूरी अकरोत् तस्य क्षुधाशांतये च स्वशरीरमपि 9) ——- उद्यत: अभवत्।कपोतस्य सद्व्यवहारेण लज्जित: व्याध: आत्मानं बहु निंदितवान्। कपोतीं पंजरात् 10) ——- व्याध: हिंसामार्गं त्यक्तुं निश्चयम् अकरोत्।</td><td></td></tr>
<tr><td></td><td></td><td></td></tr>
<tr><td></td><td>‘ग’ भाग:<br>अनुप्रयुक्तव्याकरणम् (25अङ्.का:)</td><td></td></tr>
<tr><td></td><td></td><td></td></tr>
<tr><td>5. अ</td><td>अधोलिखितवाक्येषु रेखांकितपदेषु संधिं संधिविच्छेदं वा कुरुत-<br>i. <u>सम्यक्+अभिज्ञातम्।</u> अयं तु ‘तवाङ्.गोम्पा’ बौद्धमठ:।<br>ii. <u>विधात्रैव</u> अहं पक्षिराज: कृत:।<br>iii. य: आत्मन: कल्याणम् इच्छति, <u>स:+परेभ्य:</u> अहितं न कुर्यात्।<br>iv. <u>अतोऽहं</u> ब्रवीमि यत् त्वम् द्रौणिं न जानासि।<br><br>अथवा<br><br>आ .अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-<br>i. <u>काम एष:</u> रजोगुणात् समुद्भव: भवति।<br>ii. यासु सद्गुणा: लिखिता:, तासु <u>वीथिकासु+एव</u> चलनीयम्।<br>iii. अयं <u>अनुच्छेद</u>: तु अतीव शोभन<u>:</u> अस्ति।<br>iv. (iv) क्रीडनकं दृष्ट्वा <u>शिशु:+हसति।</u></td><td>(4x1=4)</td></tr>
<tr><td></td><td></td><td></td></tr>
<tr><td>6</td><td>अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत-<br>i. <u>स्वाध्यायाभ्यसनं</u> चैव वाङ्.मयं तप: उच्यते।<br>अ) स्वाध्यायस्य अभ्यसनम् ब) स्वाध्यायम् अभ्यसनम् च<br>स) स्वाध्याय: च अभ्यसनं च द) स्वाध्यायौ अभ्यसनौ च</td><td>(4x1=4)</td></tr>
</table>

| | | |
|---|---|---|
| | **ii. जगत् कथं पश्येयम् चक्षुर्हीनः अहम्।**<br>अ) चक्षुषेण हीन: ब) चक्षुशस्य हीन:<br>स) चक्षुभि: हीन: द) चक्षुर्भ्याम् हीन:<br>**iii. समयम् अनतिक्रम्य स्वकार्यं कुरु।**<br>अ) यथासमयम् ब) यथासमय:<br>स) समयानुसारम् द) समयस्य अभाव:<br>**iv. साश्रुनयनः यूथपः उवाच।**<br>अ) यूथं पालयति इति ब) यूथं पिबति इति<br>स) यूथस्य पालक: द) यूथं पाति इति | |
| | | |
| 7. | **अधोलिखितवाक्येषु रेखांकितपदानाम् प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरम् प्रदत्तविकल्पेभ्यः चित्वा लिखत-**<br>**i. न जानाति भवान् द्रौणेः चपलां प्रकृतिम्।**<br>अ) चपला +आ ब) चपल+टाप्<br>स) चपल+आप् द) चपल्+टाप<br>**ii. छाया+मतुप् वृक्षाः पथिकेभ्यः आश्रयं यच्छन्ति।**<br>अ) छायावान्। ब) छायावत:<br>स) छायामन्त: द) छायावन्त:<br>**iii. प्रकृतेः रमणीयता मनोरमा भवति।**<br>अ) रम्+अनीयर्+तल् ब) रमणीय+ता<br>स) रमण+ईयता द) रम्+अनीयर्+ता<br>**iv. मम भगिनी विद्वस्+ङीप् अस्ति।**<br>अ) विद्वसी ब) विद्वानी<br>स) विद्वसभि: द) विदुषी | **(4x1=4)** |
| | | |
| 8.अ | **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत**<br>नवीना- भो मुक्ते! पश्य, उदयाचले उदितस्य सूर्यस्य प्रकाशम्।<br>मुक्ता- नवीने! सूर्यस्य अरुण: प्रकाश: मया 1) ——————। | **(3x1=3)** |

| | | |
|---|---|---|
| आ. | नवीना- किं त्वम् जानासि यत्2) ————- मध्याह्वस्य सूर्यं न पश्यन्ति।<br>मुक्ता- आम्, यत: स: प्रचण्ड: भवति। अहम् इदमपि जानामि यत् सर्वै: जीवै: सूर्यात् एव 3) ————-गृह्यते।<br>जना: , दृश्यते , प्रकाश:<br>**अथवा**<br>**i.** विद्याहीनै: न ————**(शुभ्)**<br>**ii.** व्याध: ———— हन्ति।**(पशु)**<br>**iii.** ———— मंचे नृत्यते।**(नायिका)** | |
| | | |
| 9. | **अधोलिखितसम्भाषणशिविरस्य कार्यसूच्याम् अङ्कानां स्थाने संस्कृतपदेषु समयम् लिखत-**<br>i. 9:00 - ————-शिविरस्य आरम्भः ।<br>ii. 10.45-. ————-लघुविरामः ।<br>iii. 12.30————भोजनविरामः । | **(3x1=3)** |
| | | |
| 10. | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत-**<br>i. ———— वसंत: ऋतु: अस्ति।<br>ii. पुष्पेषु ————-भ्रमरा: गुंजन्ति।<br>iii. तेषां गुंजार: गीत: ————- प्रतीयते।<br>iv. पुष्पाणां सुगन्धि: मनांसि ————- हरति।<br>इव, सहसा, सम्प्रति,इतस्तत: | **(4x1=4)** |
| | | |
| 11. | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत-**<br>**(i) विज्ञानमयी <u>एष:</u> कल्पना।**<br>(क) एतत् (ख) एषा | **(3x1=3)** |

| | | |
|---|---|---|
| | (ग) एता (घ) एषी<br>**(ii) भक्तौ देवं नंस्यथ:।**<br>(क) नंस्यन्ति (ख) नंस्यथ<br>(ग) नंस्याव: (घ) नंस्यत:।<br>**(iii) भवती एतत् चित्रं दृक्ष्यति।**<br>(क) द्रक्ष्यसि (ख) द्रक्ष्यति<br>(ख) दर्शिष्यति (घ) दर्ष्यति | |
| | | |
| | **'घ' भागः**<br>**पठितावबोधनम्। (30 अङ्काः)** | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत् 'मम अर्थिन: तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचका: शरीरस्य अंगानि अपि याचन्ते।' एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं जातम्।<br>**1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)।**<br>i. अर्थिन: केन सन्तुष्टा: ?<br>ii. स राजा कुत्र विचरन् अचिन्तयत् ?<br>iii. राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय किं व्याकुलं जातम् ?<br>**II. पूर्णवाक्येन उत्तरत. (केवलं प्रश्नद्वयम्)**<br>i. सौभाग्यशालिन: के भवन्ति?<br>ii. राज्ञ: याचका: कीदृशा: आसन्?<br>**iii.** राज्ञ: निरासक्ति: केषु अभवत्**?**<br>**III. (अ) निर्देशानुसारम् उत्तरत -**<br>i. 'याचका:' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम् ?<br>ii. 'भजन्ते' अस्याः क्रियायाः कर्तृपदं किम् ?<br>**अथवा** | **5**<br>**(1/2x2=1)**<br>**(1x2=2)**<br>**(2×1=2)** |

| | | |
|---|---|---|
| | **(आ) निर्देशानुसारम् उत्तरत -**<br>i. अवश्यमेव – अस्मिन्नर्थे गद्यांशे किम् पदम् आगतम्?<br>ii. राजा- अस्य कर्तृपदस्य क्रियापदं किम् अस्ति? | |
| | | |
| **13.** | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत**<br>आचार्यात् पादम् आदत्ते पादं शिष्यः स्वमेधया।<br>कालेन पादम् आदत्ते पादं सब्रह्मचारिभिः।<br>नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः।<br>नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ॥<br>**1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ।**<br>i. कः स्वमेधया गृह्णाति?<br>ii. शिष्यः शिक्षायाः तृतीयांशं केन लभते?<br>**iii.** सर्वश्रेष्ठं तपः किं कथितम् **?**<br>**पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) ।**<br>i. आचार्यात् कियत् भागं शिष्यः आदत्ते ?<br>ii. केन समं दुःखं नास्ति ?<br>iii. विद्यासमं किं नास्ति ?<br>**III. (अ) निर्देशानुसारम् उत्तरत -**<br>i. समयेन' इत्यर्थे श्लोके किं पदं प्रयुक्तम् ?<br>ii. आदत्ते -इति पदस्य कर्तृपदं किम् ?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>i. 'नेत्रम्' अस्य समानार्थकं पदं श्लोकात् चित्वा लिखत।<br>ii. श्लोके परस्परविपर्ययपदे के स्तः? | **5**<br>**(2x1/2=1)**<br>**(2x1=2)**<br>**(2×1=2)** |
| | | |

| | | |
|---|---|---|
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन उत्तरत-**<br>युधिष्ठिरः- अप्येवम् ! आचार्येण कीदृशः अनर्थः कृतः । किं चपलबालकेभ्यः एतादृश-भीषणानाम् अस्त्राणां प्रदानम् उचितम् ?<br>श्रीकृष्णः- शृणु तावत्, आचार्येण तु प्रियशिष्याय अर्जुनाय प्रीत्या मनसा ब्रह्मास्त्रशिक्षा प्रदत्ता । किन्तु पुत्रप्रेमपराधीनेन तेन अश्वत्थामा अपि तच्छिक्षया वञ्चितः न कृतः ।<br>अर्जुनः- अपरं च, अस्त्रशिक्षाप्रदानात् पूर्वम् आचार्यः पुत्रं सावधानम् अकरोत् । यथा –<br>परमापगतेनापि नैव तात त्वया रणे ।<br>इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥<br>युधिष्ठिरः - सम्प्रति आश्वस्तः अस्मि । मन्ये सः ब्रह्मास्त्रप्रयोगं न करिष्यति ।<br>श्रीकृष्णः - तर्हि न जानासि तस्य मनोवृत्तिम् । पितुः उपदेशेन असन्तुष्टः सः एकदा द्वारकापुरीम् आगच्छत् । ब्रह्मास्त्रं दत्वा सः सुदर्शनचक्रम् अवाञ्छत् । | 5 |
| | **1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ।**<br>i. आचार्येण प्रीत्या ब्रह्मास्त्रशिक्षा कस्मै प्रदत्ता ?<br>ii. कः सुदर्शनचक्रम् अवाञ्छत् ?<br>iii. कस्मात् पूर्वं आचार्यः स्वपुत्रं सावधानम् अकरोत् ? | **(1/2x2=1)** |
| | **II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>i. चपलबालकेभ्यः केषां प्रदानं न उचितम् ?<br>ii. क: पुत्रप्रेमपराधीन: आसीत् स: च किम् अकरोत्?<br>iii. ब्रह्मास्त्रम् केषु कदा च न प्रयोक्तव्यम्? | **(2x1=2)** |
| | **III. (अ) निर्देशानुसारम् उत्तरत -**<br>i. 'अस्त्राणाम्' इति पदस्य विशेषणं किम् ?<br>ii. 'अवाञ्छत्' इति क्रियापदस्य कर्तृपदं किम् ?<br>**अथवा** | **(2x1=2)** |

| | | |
|---|---|---|
| | **(आ) निर्देशानुसारम् उत्तरत -**<br>i. 'युद्धे' अस्य पदस्य किं पर्यायपदम् अत्र आगतम्?<br>ii. 'अपरं च —— ———- ——— सावधानम् अकरोत्' — अस्मिन् वाक्ये 'अकरोत्' इति क्रियापदस्य कर्तृपदं किम्? | |
| | | |
| **15.** | **रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत –**<br>i. पाठकस्य **षट्** गुणाः।<br>ii. सदाचारं **प्राणेभ्योऽपि** विशेषतः रक्षेत्।<br>iii. यः क्रोधस्य वेगं जीवने सहते, सः **सुखी** नरः।<br>iv. **हिमाद्रितुंगशृंगैः** सुशोभिता भूमिरियम्।<br>**v.** वानराणां वह्निदाहसमुद्भवः दोषः **कपिमेदसा** नाशमभ्येति। | **(5x1=5)** |
| | | |
| **16.अ.** | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –**<br>माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।<br>धैर्यं लयसमर्थं च षडेते पाठकाः गुणाः ॥<br>अन्वयः - माधुर्यम् 1) ———- पदच्छेदः तु 2) ——— ,धैर्यं लय -समर्थं च, 3) ——- षट् 4) ———- गुणाः (भवन्ति।)<br>मञ्जूषा——<br>**पाठकाः, अक्षरव्यक्तिः, एते, सुस्वरः**<br>**अथवा** | **(4x1/2=2)** |
| **आ.** | **मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत**<br>प्रार्थितं ते मया चक्रं देवदानवपूजितम्।<br>अजेयः स्यामिति विभो ! सत्यमेतद् ब्रवीमि ते ॥<br>भावार्थः - हे 1) ————-! अहम् अजेयः भवितुम् 2) ———-। इति विचार्य मया **3)** ——————इदं चक्रं याचितम्। अहम् एतत् 4) -------- वदामि। | |

| | | |
|---|---|---|
| | **मञ्जूषा—**<br>देवदानवपूजितम्, इच्छामि,<br>सर्वव्यापक, सत्यं | |
| | | |
| **17.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानाम् प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br>**i. समा: द्वादश <u>पर्जन्य:</u> तद् राष्ट्रं नाभिवर्षति।**<br>(क) समुद्र: (ख) जलम्<br>(ग) मेघा: (घ) पर्यावरणम्<br>**ii. मयूर: स्वपक्षान् <u>अवधूय</u> वदति।**<br>(क) नर्तित्वा (ख) दर्शयित्वा<br>(ग) क्षिप्त्वा (घ) कम्पयित्वा<br>**iii. <u>परुषां</u> वाचं न अभ्युदीरयेत्।**<br>(क) मधुराम् (ख) पौरुषेयाम्<br>(ग) कठोराम् (घ) कोमलाम्<br>**iv. स: <u>सव्येन</u> पाणिना चक्रं गृहीतवान्।**<br>(क) विशालेन (ख) वामेन<br>(ग) दक्षिणेन (घ) कम्पमानेन | **(4x1=4)** |
| **18.** | **मञ्जूषाया: पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत।**<br>एकदा बोधिसत्वः बहुजन्मार्जित 1) ————- शिवीनां राजा बभूव। स नगरस्य समन्ततः धन- धान्य समृद्धाः 2) ———- अकारयत्। राज्ञः दानशीलताम् आकर्ण्य 3) ————- जनाः तं देशम् आयान्ति स्म। तस्य दानशीलतां परीक्षितुं 4) ——- नेत्रहीन याचकस्य रूपं धारयित्वा आगच्छत्। राज्ञः नेत्र- दानार्थं निश्चयं ज्ञात्वा 5) ———— विषण्णाः अभवन्। राजा 6) ———— स्व नेत्रद्वयम् याचकाय समर्पितवान्। देवराजः शक्रः तस्य 7) ———— प्राशंसत्। शक्रस्य प्रभावेण आत्मनः सत्यपुण्य- बलेन च राजा पुनः 8) ———— समर्थः अभवत्।<br>**मञ्जूषा——**<br>देशान्तरेभ्योऽपि,त्यागवृत्तिम्,वैद्योक्तविधिना,<br>शक्र:, मंत्रिण:, दानशाला:, पुण्यफलै:,द्रष्टुम् | **(8x1/2=4)** |

# संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)
# अभ्यास-प्रश्नपत्रम् -8 (हल रहित)
# कक्षा - दशमी

**अवधिः होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

   **'क' भागः अपठितावबोधनम्. 10 अङ्.काः**

   **'ख' भागः रचनात्मककार्यम् 15 अङ्काः**

   **'ग' भाग अनुप्रयुक्तव्याकरणम् 25 अङ्.काः**

   **'घ' भागः पठितावबोधनम् 30 अङ्काः**
3. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
5. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| भाग-'क'<br>अपठित-अवबोधनम् | | |
|---|---|---|
| 1 | **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**<br>महाकवि: कालिदास: न केवलं संस्कृतस्य अपितु विश्वस्य श्रेष्ठ: कवि: मन्यते।अस्य महाकवे: जन्मतिथि: जन्मस्थानं च न निश्चितरूपेण ज्ञातम्। तस्य जीवनस्य विषये एका जनश्रुति: नूनं प्रचलिता यत् स: जीवनस्य आरंभिककाले मूर्ख: आसीत् ,अस्य भार्या राजकुमारी विद्योत्तमा अति विदुषी च आसीत्। स्वपत्नीकृत-अपमानेन स: गृहात् | **10** |

निरगच्छत्। ततश्च देव्याः अनवरतोपासनया स्वप्रयासै: च स: न केवलं विद्वान् अपितु वाग्देव्याः अवतार: इव अभवत्।

अयं कविसम्राट् द्वे महाकाव्ये, त्रीणि नाटकानि, द्वे खण्डकाव्ये च रचितवान्।रघुवंशम्, कुमारसंभवम् च महाकाव्ये स्त:। मालविकाग्निमित्रम्, विक्रमोर्वशीयम् अभिज्ञानशाकुंतलम् च त्रीणि अस्य अनुपम-नाटकानि सन्ति। ऋतुसंहार:, मेघदूतम् च द्वे खण्डकाव्ये अस्य उत्तमे गीतिकाव्ये स्त:। भावनानां कोमलता,संस्कृते:उदात्तता,सूक्ष्मचरित्रचित्रणम्,रमणीयकाव्यकला, ललितपदरचना च अस्य रचनासु सर्वत्र सहृदयजनानां मनांसि आकर्षयन्ति। यश:शरीरेण महाकवि: कालिदास: सर्वदैव संस्कृतसाहित्ये अमर: भविष्यति।

**अ. एकपदेन उत्तरत— (केवलं प्रश्नद्वयम्)** **(2x1=2)**

i. क: विश्वस्य श्रेष्ठ: कवि: मन्यते ?

ii. जीवनस्य आरंभिककाले स: कथम् आसीत् ?

iii. कालिदास: कति रचना: अरचयत् ?

**आ.पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **(2x2=4)**

i. कालिदासस्य नाटकानां नामानि कानि सन्ति ?

ii. स: गृहात् निर्गत्य कथं विद्वान् अभवत् ?

iii. तस्य काव्यस्य का: विशेषता: सन्ति ?

**इ. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **(1)**

**ई. यथानिर्देशम् उत्तरत-** **(3x1=3)**

**(1) 'पत्नी' इति पदस्य एकं पर्यायपदं गद्यांशात् चित्वा लिखत ।**

(अ) राजकुमारी (ब) विदुषी

(स) भार्या (द) विद्योत्तमा

**(2) 'कविसम्राट्'— अस्य कर्तृपदस्य क्रियापदं किम्?**

(अ) खण्डकाव्ये (ब) रचितवान्

(स) स्त: (द) आसीत्

**(3) 'प्रचलिता'अस्य विशेषणपदस्य किं विशेष्यपदम् वाक्ये प्रयुक्तम्?**

(अ) एका (ब) विषये

(स) नूनम् (द) जनश्रुति:

| 'ख' भागः<br>रचनात्मकलेखनम्  (15 अङ्काः) | | |
|---|---|---|
| 2 | **भवान् आशुतोषः अस्ति छात्रावासे च वसति। सामाजिकमाध्यमेषु समयं वृथा न कर्तुम् , स्वानुजं शिवायं बोधनाय लिखितम् इदं पत्रं, मञ्जूषायाः पदानि चित्वा पूरयत-**<br><br>**मञ्जूषा—**<br><br>[अल्पप्रयोगं, शिवाय,सुवर्णकाल:,क्रीडासु, स्वास्थ्यम्,यापयसि, स्नेहाशीष: चिंताजनका,अर्धवार्षिकी,तवाग्रज:]<br><br>छात्रावास:<br><br>दिल्लीनगरम्<br><br>तिथि: —-<br><br>प्रिय अनुज (1) ———-<br><br>2) —————।<br><br>अत्र कुशलं तत्रास्तु।अद्य मम 3) ———- परीक्षा समाप्ता। ह्य: जनकेन सह दूरभाषेण मम वार्तालाप: अभवत् येन ज्ञातम् यत् अद्यत्वे त्वं सामाजिकमाध्यमेषु यथा फेसबुक-इंस्ट्राग्रामादिषु सकलं दिवसं 4) ————-1 इयं वार्ता मम कृते 5) ———- अस्ति।<br><br>प्रिय शिवाय, एतेषां माध्यमानाम् अत्यधिक-उपयोग: न केवलं तव 6) ——- अपितु तव अध्ययनमपि बाधते। चलदूरभाषयंत्रस्य 7) ———— समय-यापनं समयस्य अपव्यय: अस्ति।अयं तव भविष्यनिर्माणस्य 8) ———- अस्ति। गत: समय: पुन: नागच्छति। अत: मम परामर्श: अस्ति यत् एतेषाम् उपकरणानां 9) ———- एव कुरु। आशासे त्वं स्व-विवेकेन कार्यं करिष्यसि।<br><br>पितृभ्यां मम प्रणामा:।<br><br>10) ———-<br><br>आशुतोष: | **(1/2x10=5)** |
| | | |

| | | |
|---|---|---|
| 3.अ | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पंच वाक्यानि संस्कृतेन लिखत-**<br><br>**मञ्जूषा—-**<br>पर्यावरणम्, वृक्षारोपणम्, प्रकृतेः, रोगाः, धूम्रेण, प्रदूषणम्, करणीया,भूमौ, बालकाः, अध्यापिका,जलपात्रम्,खनित्रम्<br><br>**अथवा** | **(5x1-5)** |
| आ. | **मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत - 'परोपकारिणः वृक्षाः'**<br>**मञ्जूषा-**<br>वृक्षाः, परोपकारकाः, वाटिकायां, वृक्षारोपणम्, प्रत्येकं छात्रः, पादपान् सिञ्चेत्, जलेन, फलानि, अन्नानि,शाकान्, वर्धयेत्, संरक्षणम्, उत्तमपादपप्रदर्शनीम्। | |
| | | |
| 4.अ | **अधोलिखितं संवादं मञ्जूषाप्रदत्तपंक्तिसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत—**<br>समुद्रः - (क) ————- ! ——————-?<br>जलदः - अहम् गगने भ्रमितुं गच्छामि। ,<br>समुद्रः — त्वं गगने इयत् कालपर्यन्तं किं करोषि?<br>जलदः ——-ख) ——— ————— ————————————। | **(1x5=5)** |

| | | |
|---|---|---|
| | समुद्र:— ग) ————————————————————-?<br>जलद: - आम्, अहं निदाघतापेन तप्तेषु स्थलेषु वर्षिष्यामि। मम जलेन सर्वे जलाशया: नद्य: च जलपूरिता: भविष्यन्ति।सर्वे प्राणिन: प्रसन्ना: भविष्यन्ति।<br>समुद्र: ——मेघ !घ) ———!——————- ——————————-।<br>जलद: —मित्र ! ——————————————-।त्वमपि परोपकारी असि।<br>समुद्र: - धन्यवाद:।<br><br>1. अहं विशालानां क्षेत्राणाम् उपरि भ्रमामि पर्वतानां च आतिथ्यं स्वीकरोमि ।<br>2. त्वम् तु अतीव परोपकारी असि । अहमपि त्वया सदृश: भवितुम् इच्छामि। ।<br>3. जलधे! किं कथयसि? अहं जलं त्वत्त: एव तु प्राप्नोमि। त्वं स्वजलं वाष्परूपेण मह्यं दत्वा परोपकारं करोषि।<br>4. जलद ! त्वम् कुत्र गच्छसि?<br>5. किं त्वम् किमपि जनहितस्य कार्यमपि करिष्यसि? | |
| आ. | **अथवा**<br>**प्रदत्तशब्दसूचीसाहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तराणि उत्तरपुस्तिकायां लिखत –**<br>**मञ्जूषा—**<br><br>आश्वास्य, मार्गेण, जीविकासाधनम् ,स्वपारिवारिकजनानाम्, महर्षि:, प्राचेतस:, धनेन, प्राणहानि: , दस्यु:, भगवत्कृपया,<br><br>पुरा वाल्मीकिर्नाम 1) ———- बभूव । तस्यैव 2) ———- इत्यपि नाम आसीत्। स्वजीवनस्य आरंभिककाले स: भयंकर: 3) ——— आसीत्। पथिकजनान् हत्वा तेषां धनस्य लुण्ठनमेव तस्य प्रधानं 4) ————- आसीत्। अपहृतेन परधनेनैव सः स्वकुटुम्बिनः पालनं करोति स्म। एकदा कोऽपि महर्षि: तेन 5) ——— गच्छति स्म। तं दृष्ट्वा सः अवदत्— 'यत्किञ्चित् तव समीपे विद्यते, तत्सर्वं समर्पय, यदि एवं न करिष्यसि,तर्हि तव 6) ———- भवेदिति।' मुनि: तम् अपृच्छत् "'किं त्वद्द्वारा लुण्ठितेन 7) ———- पोष्यमाणाः तव कुटुम्बिनः त्वत्कृतपापभागिनो भविष्यन्तीति ?" अस्य प्रश्नस्य उत्तरं प्राप्तुं सः गृहम् अगच्छत् 8) ————- | **(1/2×10=5)** |

| | | |
|---|---|---|
| | नकारात्मकेनोत्तरेण चकितः दुःखितश्च प्रत्यागच्छत् । महर्षिः तम् 9) ———— तदवृत्यनुकूलम् ‘'मरा' इति जप्तुम् आदिशत्। बहुकालपर्यन्तं तपः कृत्वा 10) ———— ज्ञानं प्राप्य सः लोकहिताय "रामायणम्" महाकाव्यं लिखितवान्। सः एव आदि: कविः 'वाल्मीकिः' इति नाम्ना प्रसिद्ध: जात:। | |
| | | |
| | **‘ग’ भाग:**<br>**अनुप्रयुक्तव्याकरणम् (25अङ्.का:)** | |
| | | |
| **5. अ** | **अधोलिखितवाक्येषु रेखांकितपदेषु संधिं संधिविच्छेदं वा कुरुत-**<br>i. **स्मृतिभ्रंशात्+बुद्धिनाशो** भवति।<br>ii. **नम: +ते** श्रीमन्!<br>iii. एष: **गायक:** कदा गास्यति?<br>iv. **विद्वांस एव** लोकेऽस्मिन् चक्षुष्मन्त: प्रकीर्तिता:।<br>**अथवा**<br>**अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>i. **खलसङ्.गेऽपि** पतति मनुष्य:।<br>ii. **बुद्धिमत्युवाच**- अधुना परिश्रमं कुरु।<br>iii. व्ययत: विद्याकोशस्य **वृद्धि:+जायते।**<br>iv. ब्रह्मास्त्रस्य प्रयोगं मनुष्येषु तै: **कथम्+चन** न कृतम्। | **(4x1=4)** |
| | | |
| **6** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: वित्वा लिखत**<br>**i. राजा सर्वत्र दानशाला: अकारयत्।**<br>अ) दानस्य शाला ब) दानेन शाला:<br>स) दानाय शाला: द) दाने शाला:<br>**ii. गगने विहगा: भ्रमन्ति।**<br>अ) विहेन गा: ब) विहं गायन्ति इति<br>स) विहा च गा: च द) विहायसा गच्छन्ति **इति** | **(4x1=4)** |

| | | |
|---|---|---|
| | **iii. भीमः अनुद्रौणि धावति।**<br>अ) द्रौणे: पश्चात्     ब) द्रौणिना सह<br>स) द्रौणे: अनुरूपम्   द) द्रौणिम् अनतिक्रम्य<br>**iv. अहोरात्रं शिशोः मुखकमलम् दृष्ट्वा माता प्रसीदति।**<br>अ)अह: च रात्रि: च     ब) अहं च रात्रि:<br>स ) अहोनाम् रात्रि:     द) अहनि रात्रे च | |
| | | |
| 7. | **अधोलिखितवाक्येषु रेखांकितपदानाम् प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरम् प्रदत्तविकल्पेभ्यः चित्वा लिखत**<br>**i. हर्षस्य माता चिकित्सक+टाप् ————अस्ति।**<br>अ) चिकित्सका     ब) चिकीत्सका<br>स) चिकत्सका     द) चिकित्सिका<br>**ii. तस्मिन् गृहे माङ्.गलिकं ————- कार्यं भवति।**<br>अ) मङ्.लि+क     ब) मांगल+इक<br>स) मंगल+इक     द) मङ्.गल+ठक्<br>**iii. प्रच्छन्नभाग्यस्य पत्नी धैर्यवती ————आसीत्।**<br>(अ) धैर्य+वती     ब) धैर्यवत्+ + ई<br>स) धैर्य+मत्+ई     द) धैर्य+ वतुप्+ ङीप्<br>**iv. वस्त्रैः सा साधु+ ङीप् इव प्रतीयते।**<br>अ) साध्वी     ब) साधुई<br>स) साधी     द) साधवी | **(4x1=4)** |
| | | |
| 8.अ | **अधोलिखितसंवादे, मञ्जूषायाः चित्वा, वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः उत्तरपुस्तिकायां लिखत –**<br>अरविन्दः— नलिनि ! अस्माकं यानं कदा आगच्छति ?<br>नलिनी—- भ्रातः ! अस्माकं यानेन पञ्चवादने (क) ————- ।<br>अरविन्दः—- किं वयम् तत्र उपवेष्टुं स्थानं लभामहे ?<br>नलिनी —-आम् ! वयम् तत्र उपवेष्टुं (ख) ————- प्राप्स्यामः। | **(3x1=3)** |

| | | |
|---|---|---|
| | अरविन्दः - किं जनकः आरक्षणं कारयति ?<br>नलिनी- आम् ! (ग) ———— आरक्षणं कार्यते ।<br>स्थानम्, आगम्यते,तेन<br>**अथवा(आ)**<br>(i) मया आम्ररसः ————**(पा) ।**<br>**(ii)** ——————-तु कदलीफलं खादति।**(अम्बा)**<br>(iii) मम अनुजेन ————- पठ्यन्ते। **(कथा)** | |
| | | |
| 9. | **भवतः विद्यालये बाल-सभा अस्ति । तत्र कः कार्यक्रमः भविष्यति, कतिवादने भविष्यति इति घटिकां दृष्ट्वा रिक्तस्थाने लिखत -**<br>i. प्रातः (7.45) ——————-वादने गायन- प्रतियोगिता भविष्यति ।<br>ii. निर्णायकैः संभाषणम् (10.30) ——————-1<br>iii. (11) -————-वादने प्राचार्यमहोदयेन निर्णयस्य घोषणा । | **(3x1=3)** |
| | | |
| **10.** | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत-**<br>1. दुर्जने दयां ————- कुरु।<br>2. सभायां ——————— न वक्तव्यम्।<br>3. आतपे ————- न गच्छेत्।<br>**4.** त्वं —————— अनृतं वदसि**?**<br>बहिः , मा, वृथा, किमर्थम् | **(4x1=4)** |
| | | |
| **11.** | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत-**<br>**(i) पितरौ पुत्रं पालयन्ति।**<br>(क) पालयति (ख) पालयते<br>(ग) पालयतः (घ) पाल्येते | **(3x1=3)** |

| | | |
|---|---|---|
| | **(ii) भवन्तः किं <u>कुरुथ</u>:?**<br>(क) कुरुत:  (ख) करोति<br>(ग) करोषि  (घ) कुर्वन्ति<br>**(iii) श्व: अहं हरिद्वारनगरं <u>गच्छामि</u>।**<br>(क) गच्छति  ख) गमिष्यामि<br>ग) गच्छेम  (घ) गमिष्येत | |
| | | |
| | **'घ' भागः**<br>**पठितावबोधनम्।  (30 अङ्काः)** | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>हा दग्धा मे घोटकाः कथं रक्षणीयाः ? सपदि उपायः क्रियताम्। तदा राजवैद्यः प्रोवाच-<br>कपीनां मेदसा दोषो वह्निदाहसमुद्भव: ।<br>अश्वानां नाशमभ्येति तमः सूर्योदये यथा ॥<br>'यथोचितं क्रियताम् 'इति राजादेशं श्रुत्वा सर्वे भयत्रस्ता: कपयः अचिन्तयन् - "हा हताः वयम् । अवधीरिताः अस्माभिः गुरुजनोपदेशाः।" उक्तम् हि—<br>मित्ररूपा: हि रिपव: सम्भाष्यन्ते विचक्षणै:।<br>ये हितं वाक्यमुत्सृज्य विपरीतोपसेविन:।।<br>**(1) एकपदेन उत्तरत-  (केवलं प्रश्नद्वयम्) ।**<br>i. कस्य घोटका: दग्धा:?<br>ii. अश्वानां वह्निदाहसमुद्भव: दोष: केन शाम्यते ?<br>iii. राजादेशं श्रुत्वा कपयः कीदृशाः अभवन् ?<br>**(2) . पूर्णवाक्येन उत्तरत-  (केवलं प्रश्नद्वयम्) ।**<br>i. सूर्योदये किं भवति ?<br>ii. कपयः किमर्थं दुखिता: आसन् ?<br>iii. विचक्षणै: के मित्ररूपा: हि रिपव: कथ्यन्ते? | **5**<br><br><br><br><br><br><br><br>**(1/2x2=1)**<br><br><br><br>**(1x2=2)** |

| | | |
|---|---|---|
| | **(3) . अ. निर्देशानुसारम् उत्तरत -**<br>i. अश्वः' अस्य कः पर्यायः अत्र प्रयुक्तः ?<br>ii. 'अचिन्तयत्' अस्य क्रियापदस्य कर्तृपदं लिखत।<br>**अथवा**<br>**आ. निर्देशानुसारम् उत्तरत -**<br>i. 'भयत्रस्ता: कपय:' अनयो: पदयो: विशेषणपदं किम्?<br>ii. मित्राणि- अस्य किं विपर्ययपदं अत्र प्रयुक्तम्? | **(1x2=2)** |
| | | |
| **13.** | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत**<br>न तथा शीतलसलिलम्,न चंदनरसो, न शीतला छाया<br>प्रह्लादयति च पुरुषं, यथा मधुरभाषिणी वाणी।।<br>यः इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।<br>न कुर्यादहितं कर्म सः परेभ्यः कदापि च ॥ | **5** |
| | **1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ।**<br>i. शीतलसलिलं कं तथा न प्रह्लादयति?<br>ii. कीदृशी छाया मनुष्यं प्रसन्नं न करोति ?<br>iii. नरः आत्मनः किमिच्छति ? | **(2x1/2=1)** |
| | **पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) ।**<br>i. नरः केभ्यः अहितं कर्म न कुर्यात् ?<br>ii. जीवने नरः किं किं इच्छति ?<br>iii. मधुरभाषिणी वाणी किं करोति ? | **(2x1=2)** |
| | **III. (अ) निर्देशानुसारम् उत्तरत -**<br>i. 'प्रसन्नं करोति' इति अर्थे श्लोके किं पदं प्रयुक्तम्?<br>ii. कुर्यात्' इति क्रियापदस्य कर्तृपदं किम्?<br>**अथवा** | **(2x1=2)** |

| | | |
|---|---|---|
| | **(आ) निर्देशानुसारम् उत्तरत -**<br>i. 'कल्याणम्' इति पदस्य कः पर्यायः अत्र आगतः ?<br>ii. 'उष्णजलम्' इति पदस्य किं विपरीतपदम् अस्मिन् श्लोके प्रयुक्तम्? | |
| | | |
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन उत्तरत-**<br>हिमांशु: - अहं चिन्तयामि यत् अरुण: तु सूर्यस्य पर्याय:। अस्य प्रकाश: सर्वप्रथमम् इमं प्रदेशं स्पृशति। अत: अरुणस्य प्रदेश: 'अरुणाचल:'।<br>पर्यटनाधिकारी - शोभनम् । उचितम् उक्तम् । हिमाद्रितुङ्गश्रृङ्गै: -सुशोभिता सूर्योदयभूमिः इयम् । अतः अरुणाचलः। अस्मिन् प्रदेशे पञ्चाशदधिकाः नद्य: प्रवहन्ति । वनौषधीनाम् तु अयं स्रोतः एव । पुष्पाणां समृद्धिः सुगन्धिः च मनोहरः। सर्वत्र हरीतिमा । शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं प्रकृतिः एव न विविधा मनोहरा च प्रत्युत संस्कृतिः अपि ।<br>सर्वे- एवम् ।<br>श्यामा- महोदय । अत्रत्य - जनजातीनां कानि प्रमुखानि आजीविका - साधनानि ?<br>पर्यटनाधिकारी – कृषिः, शिल्पकला, वनसम्पद् चैव एतेषां प्रमुखानि आजीविका साधनानि । | **5** |
| | **I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ।**<br>i. सूर्यस्य प्रकाशः सर्वप्रथमं कं प्रदेशं स्पृशति ?<br>ii. अरुणाचले कति नद्य: प्रवहन्ति ?<br>iii. अरुणाचल: केषां स्रोत:? | **(1/2×2=1)** |
| | **II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>i. अरुणाचलप्रदेशस्य जनजातीनां कानि प्रमुखानि जीवन-साधनानि?<br>ii. अरुणाचलस्य का-का विविधा मनोहरा च?<br>iii. अस्य प्रदेशस्य पर्यावरणं कीदृशम् अस्ति? | **(2×1=2)** |
| | **III. (अ) निर्देशानुसारम् उत्तरत -**<br>i. सुगन्धिः मनोहर:" अनयोः पदयो: विशेषणपदं किम् ?<br>ii. स्पृशति- अस्य क्रियापदस्य कर्ता क:?<br><br>**अथवा** | **(2x1=2)** |

| | | |
|---|---|---|
| | **(आ) निर्देशानुसारम् उत्तरत -**<br>i. 'सुन्दर:' अस्मिन्नर्थे अत्र किं पदं प्रयुक्तम्?<br>ii. 'अस्य प्रदेशस्य' अनयो:पदयो: विशेष्यपदम् किम् अस्ति? | **(2x1=2)** |
| | | |
| **15.** | **रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत –**<br>i. **कपय:** भयत्रस्ता: आसन्।<br>ii. **भवता** समीचीनं न कृतम्।<br>iii. बालवचसा मम **चक्षुषी** समुन्मीलिते।<br>iv. आचार्यात् **पादम्** आदत्ते।<br>v. मन: हि **चञ्चलम्** कृष्ण! | **(5x1=5)** |
| | | |
| **16.अ.**<br><br>**आ.** | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –**<br>तस्माद् स्यात् कलहो यत्र गृहे नित्यमकारणः ।<br>तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत् ॥<br>अन्वयः— तस्मात्1) ———- गृहे नित्यम् अकारणः2) ———— स्यात् । जीवितं 3) ——— तत् गृहं 4) ———— परिवर्जयेत् ।<br>वाञ्छन्, यत्र, कलहः, दूरतः<br>**अथवा**<br>**मञ्जूषाया: साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुन: लिखत**<br>परमापदगेतनापि नैव तात! त्वया रणे।<br>इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥<br>भावार्थ:—- संकटग्रस्तः अपि भूत्वा इदम् 1) ———-विशेषरूपेण2) ———— न प्रयोक्तव्यम्, यतः एतानि शस्त्राणि तु जगतः3) ————- न तु 4) ———— 1<br>**मञ्जूषा—**<br>कल्याणाय,अस्त्रम्,विनाशाय , मनुष्येषु | **(4x1/2=2)** |
| | | |

| | | |
|---|---|---|
| **17.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानाम् प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br>**1.चित्ते वाचि च अवक्रता स्यात्।**<br>(अ) कठिनता (ब) पवित्रता<br>(स) ऋजुता (द) कुटिलता<br>**2.शिष्य: विद्याया: पादं सब्रह्मचारिभि: आदत्ते।**<br>(अ) पण्डितै: (ब) सहपाठिभि:<br>(स) ब्रह्मचर्यस्य पालनकर्ता (द) शिष्यै:<br>**3.सा परद्रव्ये अनासक्ता आसीत्।**<br>(अ) तरले (ब) धने<br>(स) गृहे (द) विवादे<br>**4. मनस: निग्रहं दुष्करं भवति।**<br>(अ) कठिनम् (ब) मलिनम्<br>(स) सरलम् (द) श्रमपूर्णम् | **(4x1=4)** |
| **18.** | **मञ्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत।**<br>भूपतेः 1) ——— पुत्राः वानरान् भोज्यपदार्थै: पुष्टिं नयन्ति स्म। राजगृहे 2) ——<br>——— मेषयूथम् आसीत् । सूपकारैः नित्यं ताडितं मेषं दृष्ट्वा 3) ——— वानरान् राजभवनं त्यक्तुम् अकथयत् । रसनास्वादलुब्धाः कपयः 4) ———- त्यक्तुं न स्वीकृतवन्तः। अन्यस्मिन् अहनि स मेषः सूपकारेण 5) —————— ताडितः । 6) ———- स मेषः अश्वशालाया: भूमौ अलुठत् येन तृणेषु ज्वाला: उत्थिता: अनेके अश्वा: च दग्धा: जाता:।राजा 7) ———— आहूय अश्वरक्षायै न्यवेदयत्। 'कपिमेदसा अग्निदोष: शाम्यते' इति ज्ञात्वा भयत्रस्ताः कपयः 8) ———- कृतवन्तः ।<br>**मञ्जूषा——**<br>चंद्रस्य,राजभवनम्, ज्वलन्, पश्चात्तापम्,वैद्यान्, बालवाहनयोग्यम्, वानरयूथप: , अर्धज्वलितकाष्ठेन , | **(8x1/2=4)** |

# संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)
# अभ्यास-प्रश्नपत्रम् -9 (हल रहित)
# कक्षा - दशमी

**अवधिः होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

   **'क' भागः अपठितावबोधनम्. 10 अङ्.का:**

   **'ख' भागः रचनात्मककार्यम् 15 अङ्काः**

   **'ग' भाग अनुप्रयुक्तव्याकरणम् 25 अङ्.का:**

   **'घ' भागः पठितावबोधनम् 30 अङ्काः**
3. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
5. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| **भाग-'क'<br>अपठित-अवबोधनम्** | | |
|---|---|---|
| **1** | **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**<br>'संस्कृतम्' विश्वस्य प्राचीनतमा भाषा मन्यते या अनेकासां भाषाणां जननी अस्ति।भारतीया संस्कृति: संस्कृतम् आधारिता एव। अस्माकं ज्ञानविज्ञानयो: अमूल्य: निधि: वेदपुराणेषु संगृहीत: अस्ति।संस्कृते विद्यन्ते खगोलविज्ञानम्, अर्थशास्त्रम्, आयुर्वेद:, रसायनशास्त्रम् , ज्योतिषशास्त्रम् विमानविज्ञानादीनि च। आधुनिककाले संस्कृतभाषायां नूतनविषयाणां समावेशः अत्यावश्यकः आसीत्।अत: अधुना | **10** |

विज्ञानम्, प्रौद्योगिकी, संगणकः, कृत्रिमबुद्धिमत्ता, पर्यावरणसंरक्षणम्, स्वास्थ्यचिन्ता इत्यादयः विषयाः अपि संस्कृतपुस्तकेषु समाविष्टाः कृता:। एतेन सिध्यते यत् संस्कृतभाषा केवलं प्राचीनभाषा इति एव नास्ति, अपितु सा आधुनिकजीवनस्य आवश्यकतानुसारं विकसन्ती नित्यं गतिशीला भाषा अस्ति। नवशब्दनिर्माणेन भाषा समृद्धा भवति  युवावर्गाय चापि रोचते। विद्यालयेषु विश्वविद्यालयेषु च आधुनिकविषयाणां संस्कृते पठन-पाठनम्  संस्कृतस्य भविष्यं दृढं करोति तस्याः उपयोगिताम् च सर्वत्र प्रतिष्ठापयति।

**अ. एकपदेन उत्तरत— (केवलं प्रश्नद्वयम्)** **(2x1=2)**

i. अस्माकं ज्ञान-विज्ञानयो: निधि: कुत्र संगृहीत: ?

ii. आधुनिकसंस्कृते केषां समावेश: आवश्यक:?

iii. संस्कृतभाषा नित्यं कीदृशी ?

**आ.** पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **(2x2=4)**

i. प्राचीनेषु संस्कृतग्रंथेषु कानि शास्त्राणि सन्ति ?

ii. आधुनिकसंस्कृतपुस्तकेषु केषां विषयाणां समावेश: कृत: ?

iii. नवशब्दनिर्माणेन किं भवति?

**इ. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **(1)**

**ई. यथानिर्देशम् उत्तरत-** **(3x1=3)**

**(1) 'प्रतिष्ठापयति' इति क्रियापदस्य कर्ता क:?**

(अ) संस्कृतम्  (ब) उपयोगिता

(स) भविष्यम्  (द) पठन-पाठनम्

**(2) 'प्राचीनतमा' इति पदस्य विशेषणम् किम् ?**

(अ) अनेकासाम्  (ब) जननी

(स) भाषाणाम्  (द) भाषा

**(3) 'कोश:' अस्य पदस्य स्थाने किं पदमत्र प्रयुक्तम् ?**

(अ) निधि:  (ब) अमूल्य:

(स) समावेश:  (द) संगृहीत:

| 'ख' भागः<br>रचनात्मकलेखनम्  (15 अङ्काः) | | |
|---|---|---|
| 2 | **भवत: नाम समीर: अस्ति। भवत: अग्रज: पुनीत: विदेशे स्थित्वा कार्यं कर्तुम् इच्छति।देशप्रेम्णः महत्त्वं वर्णयन्, भ्रातरं प्रति लिखितम् इदं पत्रं, मञ्जूषायाः पदानि चित्वा पूरयत-**<br>**मञ्जूषा—**<br>भ्रात:, भवत:, योगदानम्, वृत्तिं,प्रगते:, ऋणं, ज्ञातम्, प्रतिभाशालिन:, कर्तुम्, बाल्यकालस्मृतय:<br>वाराणसीत:<br>तिथि:<br>प्रिय 1) ——————-<br>सादरं नमामि।<br>भवतः पत्रं ह्य: प्राप्तम् (2) —————— च यत् भवान् अमेरिकादेशे स्थित्वा एकस्मिन् व्यापारिकसंस्थाने कार्यं 3) ————— इच्छति। अहम् आनन्दाभिभूतः अस्मि यत् त्वम् श्रेष्ठां 4) ——- प्राप्तवान् किंतु भ्रात:! अत्र अस्माकं (5) ————-, मित्राणां साहचर्यम्, परिवारस्य स्नेह: च निहित: अस्ति। मातृभूमे: 6) ———— अस्माभि: कदापि न विस्मर्तव्यम् । निश्चयेन विदेशेषु उत्तमजीवनस्य सुविधा: सन्ति किंतु यदि सर्वे 7) ————- युवका: विदेशं गमिष्यन्ति,तर्हि भारतस्य 8) ————- चिंतां क: करिष्यति?अत: शक्यते चेत्,भवान् स्वदेशे एव स्व-प्रतिभां निवेशयेत्, देशोन्नतये 9) —————च कुर्यात्।<br>स्वमित्रेभ्यः मम अभिवादनं कथयतु ।<br>10) ————- प्रिय: अनुज:<br>समीर: | (1/2x10=5) |
| | | |

| | | |
|---|---|---|
| 3.अ | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पंच वाक्यानि संस्कृतेन लिखत-**<br><br>**मञ्जूषा—-**<br>चटका, शाखा, नीडम्, शावकाः, गजः उन्मत्तः, शाखां, आकर्षति, विलपन्ती, निवारयितुम्, यतते, वने पत्राणि, वर्षाकाल:<br>**अथवा** | (5x1-5) |
| आ. | **मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत - 'स्वच्छताया: महत्त्वम्'**<br>**मञ्जूषा-**<br>स्वच्छताया:, महत्ता, स्वास्थ्यरक्षा, पर्यावरणम्, रोगा:, प्रसन्ना:, वातावरणम् , दरिद्रता , शिक्षा, उन्नति: | |
| | | |
| 4.अ | **अधोलिखितं संवादं मञ्जूषाप्रदत्तपंक्तिसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत—**<br>निखिल: (एकस्मिन् भोजनालये) —- भो! बालक! अत्र आगच्छ। अहं त्वां पूर्वं तु अत्र न दृष्टवान् ?<br>गगनः 1) ————————————————————। | (1x5=5) |

| | | |
|---|---|---|
| | निखिलः ——- एवम्? इदं सत्यं यत: गतसप्ताहे यदा अहम् अत्र आगत:, तदा त्वं नासी:।त्वं तु अति अल्पवयस्क: प्रतीयते।<br>गगनः 2) ————————————————————————————।<br>निखिलः – द्वादशवर्षीय:? अस्मिन् अल्पवयसि त्वं कार्यं किमर्थं करोषि? त्वया तु विद्यालयं गन्तव्यम्।<br>गगन: - कथं पठेयम्?3) ——————————————————————————।<br>निखिलः – किमर्थं तव जनक: स्वपरिवारस्य उत्तरदायित्वं न वहति?<br>गगनः 4) ———————————————————————————।<br>निखिल: —- - धिक् तम् ! त्वं मया सह आगच्छ। 5) ————————-।<br>गगन: - धन्यवाद: श्रीमन्!<br><br>क) स: मदिरापानं करोति अस्मान् ताडयति च।<br>ख) श्रीमन्! एकसप्ताह: पूर्वमेव अत्र आगतोऽस्मि।<br>ग) मम पिता किमपि कार्यं न करोति। मम माता श्रमिका अस्ति। गृहे पर्याप्तं भोजनमपि नास्ति।<br>घ) अहं तव पित्रा भोजनालयस्य स्वामिना च सह वार्ता: करिष्यामि।'बालश्रम:' तु अपराध:। तौ त्वया सह एतत् अनुचितं कर्तुं न शक्नुत:।<br>ङ) अहं द्वादशवर्षीय: अस्मि।<br><br>**अथवा** | |
| **आ.** | **मञ्जूषायाः सहायतया अधोलिखितां कथां पूरयित्वा पुनः लिखत-**<br>**मञ्जूषा—**<br>प्रार्थयति,खड्ग:, सुवर्णपंचशतम्, स्त्रिया: राजपुत्र:,सेवाकार्यं,योग्यताया:,समर्पयितुम्, स्वामिभक्त:,स्थातुम्, | **(1/2×10=5)** |

| | | |
|---|---|---|
| | एक: शूद्रक: नाम राजा आसीत्। एकदा तस्य राजप्रासादस्य द्वारे वीरवरनामक: कोऽपि वर्तनार्थी 1) ———आगच्छति। स: राज्ञ: 2) ———- कर्तुम् इच्छति स्म। राजा तस्य 3) ———- विषये पृच्छति। वीरवर: कथयति यत् तस्य द्वौ बाहू तृतीयश्च 4) ———— एव तस्य योग्यताया: आधारा: सन्ति। स: वर्तनरूपेण 5) ———- याचते।नृप: तं स्व- सुरक्षाकार्ये नियुक्तं करोति। एकस्यां अर्धरात्रौ वीरवर: कस्याश्चित् 6) —————- रोदनं श्रृणोति।<br><br>सा नृपस्य राजलक्ष्मी आसीत् या तत: गन्तुम् उद्यता आसीत् । वीरवर: राज्यरक्षणाय तां तत्रैव वस्तुं 7) ——————,किंतु सा न स्वीकृतवती। तदा वीरवर: तां प्रसादयितुं स्वजीवनमपि 8) ———- उद्यत: भवति। यदा तथापि सा प्रसन्ना न भवति तदा 9) ——— वीरवर: स्व-पुत्रमपि देव्यै समर्पितं कृत्वा स्व-प्राणान् अपि त्यक्तुं तत्पर: भवति। तदा राज्यलक्ष्मी तस्य राज्यभक्त्या प्रसन्ना भूत्वा तत्रैव 10) ———- निश्चयं करोति तस्य पुत्राय चापि जीवनदानं यच्छति।धन्या: एतादृशा: देशभक्ता: वीरा:। | |
| | | |
| | **'ग' भाग:**<br>**अनुप्रयुक्तव्याकरणम् (25अङ्.का:)** | |
| | | |
| **5. अ** | **अधोलिखितवाक्येषु रेखांकितपदेषु संधिं संधिविच्छेदं वा कुरुत-**<br>i. काकात् अन्यत् **को भवितुमर्हति।**<br>ii. नूनं ते **दानवीरा:+ सौभाग्यशालिन**: सन्ति येषां याचका: शरीरस्य अंगानि अपि याचन्ति।<br>iii. अहं गुरो: **उपदेशस्य+एव** पालनं करोमि।<br>iv. कार्यक्रम: शीघ्रं **सं+पन्न**: अभवत्।<br><br>**अथवा**<br><br>**अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>i. **नि:+उपाया:** सेवका: तूष्णीम् आसन्।<br>ii. **गणपतये** नम:।<br>iii. **ध्यायत:+विषयान्** पुंस: संगस्तेषूपजायते।<br>iv. **भवन्मनोरथं** पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। | **(4x1=4)** |
| | | |

| | | |
|---|---|---|
| **6** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत-**<br>**1. अस्माकम् ऐक्यम् जगति प्रसिद्धम्।**<br>अ) जगत्यप्रसिद्धम् ब) जगत्प्रसिद्धम्<br>स) अधिजगतम् द) अनुजगतम्<br>**2. रे परभृत् ! अहम् एव तव सन्ततिं पालयामि।**<br>अ) परस्य भृत: ब) परेषां भृत:<br>(स) परै: भ्रियते इति द) परं भरति इति<br>**3. यथोचितं कार्यं कुरु।**<br>अ) उचितम् अनतिक्रम्य ब) उचितानुसारम्<br>स) उचितेन सह द) उचितस्य पश्चात्<br>**4. खग: शिरोग्रीवं प्रसारयति।**<br>अ) शिरं च ग्रीवं च ब) शिर: च ग्रीवा च तेषां समाहार:<br>स) शिरे च ग्रीवे च द) शिर: च ग्रीवा च | **(4x1=4)** |
| | | |
| 7. | **अधोलिखितवाक्येषु रेखांकितपदानाम् प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरम् प्रदत्तविकल्पेभ्य: चित्वा लिखत**<br>**1. मम मातामही मंदिरम् अगच्छत्।**<br>अ) मातामह्+ई ब) माताम+ही<br>स) मातामह+ ङीप् द) मातमह+ईप्<br>**2. गुण+मतुप् एव लोके प्रशंसां प्राप्नुवन्ति।**<br>अ) गुणवान् ब) गुणमान्<br>स) गुणवन्त: द) गुणवत:<br>**3. अरुणाचलस्य प्राकृतिकं सौंदर्यम् अपूर्वम् अस्ति।**<br>(अ) प्रकृति+इक ब) प्राकृति+ठक्<br>स) प्रकृत+इक द) प्रकृति+ठक् | **(4x1=4)** |

| | | |
|---|---|---|
| | **4. अरुणाचले अनेकानि दृश्+अनीयर् स्थलानि सन्ति।**<br>अ) दृशनीयानि ब) दर्शनीयानि<br>स) द्रष्टव्यानि द) दर्शनीया: | |
| | | |
| 8.अ | **वाच्यानुसारम् उचितपदै: रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत-**<br>रूचिः- ग्रामीणा: जलम् आनयन्ति ।<br>शुचिः -तै: कुतः जलम् (क) .........।<br>रूचिः - (ख) —————— कूपात् जलम् आनयन्ति।<br>शुचि: - जनै: कूपस्य शीतलं (ग) ........पीयते।<br>जलम्, ते, आनीयते<br>**अथवा**<br>i. मया स्वजन्मदिवसे प्रतिवर्षम् ——————- आरोप्यते।(वृक्ष)<br>ii. वृक्षै: जनेभ्य: छाया फलानि च —————-(दा)<br>iii. —————— अस्मभ्यम् उपकारं कुर्वन्ति।(तत्) | **(3x1=3)** |
| | | |
| **9**. | **कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत-**<br>i. इदानीम्——————(2.00)<br>ii. (2.30) ———- वादने नव्या विद्यालयात् आगमिष्यति।<br>iii. सा(2.45) ——— वादने भोजनं करिष्यति। । | **(3x1=3)** |
| | | |
| **10.** | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत-**<br>i. सिंहः——————— गर्जति।<br>ii. कच्छपः.—————— चलति ।<br>iii. राधा————ग्रामं गमिष्यति।<br>iv. कक्षायाः...........मा गच्छ।<br>बहिः, शनैः- शनैः, उच्चैः, श्वः | **(4x1=4)** |
| | | |

| | | |
|---|---|---|
| **11.** | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत-**<br>**(i) यूयम् किं पठति?**<br>(क) पठसि (ख) पठानि<br>(ग) पठथ (घ) पठन्ति<br>**(ii) मम मित्र: प्रतिदिनं व्यायामं करोति।**<br>(क) मित्रा: (ख) मित्रम्<br>(ग) मित्राणि (घ) मित्रे<br>**(iii) स: अम्बा फलं यच्छति।**<br>(क) अम्बायै (ख) अम्बाम्<br>(ग) अम्बया (घ) अम्बाया: | **(3x1=3)** |
| | | |
| | **'घ' भागः**<br>**पठितावबोधनम्। (30 अङ्काः)** | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>अत्र अनेके प्रमुखोत्सवाः। 'वाड्.चो' जनजातीनां प्रमुखं पर्व 'ओरिया' इति अस्ति। एतत् तु फरवरी मासे मान्यते। अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माण च सामाजिकं कार्यं क्रियते।'मोपीन' इति अपि कृषिपर्व अस्ति। देवानामपि देवः 'मोपीन' इति कथ्यते। होली सदृशम् एव पर्व इदम्। जनाः परस्परं मुखे कपोले च शालिचूर्ण लिम्पन्ति। इदम 'अप्रैल' मासे मान्यते।<br>**(1) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)।**<br>i. देवानां देवः कः कथ्यते?<br>ii. 'ओरिया पर्व' कस्मिन् मासे मान्यते?<br>iii. जनाः परस्परं मुखे कपोले च किम् लिम्पन्ति?<br>**(2) . पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)।**<br>i. 'ओरिया' पर्वणि किं किं कार्यं क्रियते?<br>ii. मोपीन' इति पर्व केन सदृशम्?<br>iii. 'मोपीन' पर्व कदा मान्यते अस्मिन् अवसरे च किं क्रियते? | **5**<br><br><br><br><br>**(1/2x2=1)**<br><br><br><br>**(1x2=2)** |

| | | |
|---|---|---|
| | **(3) . अ. निर्देशानुसारम् उत्तरत -**<br>i. 'प्रमुखम्' इति कस्य पदस्य विशेषणम्?<br>ii. 'इदम् अप्रैलमासे मान्यते' इत्यत्र "इदं" इति सर्वनामपदं कस्मै प्रयुक्तम्?<br>**अथवा**<br>**आ. निर्देशानुसारम् उत्तरत -**<br>i. 'लिम्पन्ति' इति क्रियापदस्य किं कर्तृपदम्?<br>ii. "समम्" इत्यर्थे अत्र किम् पदम् प्रयुक्तम्? | **(1x2=2)** |
| | | |
| **13.** | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत**<br>पापिनाञ्च सदा दुःखं, सुखं वै पुण्यकर्मणाम् ।<br>एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत् ॥<br>अधुना रमणीया हि सृष्टिरेषा जगत्पतेः ।<br>जीवाः सर्वेऽत्र मोदन्ताम्, भावयन्तः परस्परम्॥<br>**I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ।**<br>i. केषाम् सदा दुःखम् ?<br>ii. सृष्टि: कीदृशी अस्ति?<br>iii. किं समाचरेत्?<br>**II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) ।**<br>i. जगति जीवा: किम् कुर्यु: ?<br>ii. नरः किं ज्ञात्वा साधुवृत्तिम् समाचरेत् ?<br>iii. एषा सृष्टि: कस्य अस्ति ?<br>**III. (अ) निर्देशानुसारम् उत्तरत -**<br>i. 'विज्ञाय' अस्मिन्नर्थे अत्र किं पदं प्रयुक्तम्?<br>ii. सृष्टिरेषा- अनयो: पदयो: विशेषणपदं किम्?<br>**अथवा** | **5**<br>**(2x1/2=1)**<br>**(2x1=2)**<br>**(2x1=2)** |

| | | |
|---|---|---|
| | **(आ) निर्देशानुसारम् उत्तरत -**<br>i. 'पुण्यकर्मणाम्' अस्य किं विपर्ययपदं श्लोके प्रयुक्तम्?<br>ii. मोदन्ताम्- अस्य क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम्? | |
| | | |
| **14.(अ)** | **अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन उत्तरत-**<br>मयूरः— श्रूयतां, श्रूयताम्। मम नृत्यं तु प्रकृतेः आराधना। पश्य चारुवर्तुलचन्द्रिकाशोभितानां मम पिच्छानाम् अपूर्वं सौन्दर्यम्। मम केकारवं श्रुत्वा कोकिलोऽपि लज्जते। मम शिरसि राजमुकुटम् इव शिखां स्थापयता विधात्रा एव अहं पक्षिराजः कृतः ।<br>कोकिल: — (प्रविश्य) रे मयूर! अलम् अतिविकत्थनेन। मधुमासे आम्रवृक्षे स्थित्वा यदा अहम् पंचमस्वरेण गायामि तदा श्रोतार: कथयन्ति-<br>काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।<br>वसन्तसमये प्राप्ते काकः काकः, पिकः पिकः ॥ | **5** |
| | **1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ।**<br>i. किम् श्रुत्वा कोकिलोऽपि लज्जते ?<br>ii. 'सर्पभक्षक'! इति सम्बोधनम् कस्मै प्रयुक्तः ?<br>iii. काकपिकयो: वर्ण: कीदृश:? | **(1/2x2=1)** |
| | **II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>i. किम् प्रकृतेः आराधना ?<br>ii. विधात्रा मयूर: पक्षिराज: कथं कृत:?<br>iii. काकपिकयो: भेद: कदा कथं च ज्ञायते? | **(2x1=2)** |
| | **III. निर्देशानुसारम् उत्तरत -**<br>i. पक्षाणाम्- अस्मिन्नर्थे अत्र किं पदं प्रयुक्तम्?<br>ii. 'लज्जते' अस्या: क्रियाया: कर्ता क:?<br>**अथवा**<br>**निर्देशानुसारम् उत्तरत -**<br>i. 'अपूर्व सौंदर्यम्' अनयोः पदयोः विशेषणपदं किम् ?<br>ii. 'श्वेत:' अस्य किं विलोमपदम् अत्र आगतम्? | **(2x1=2)** |

| | | |
|---|---|---|
| | | |
| **15.** | **रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत –**<br>i. जीवानां जननी प्रकृतिः।<br>ii. द्रौपद्याः पुत्राः द्रौणिना हताः।<br>iii. 'ओरिया' इति पर्व फरवरी मासे मान्यते।<br>iv. नमः भगवते।<br>v. अरुणाचलस्य जनजातीनां प्रमुख-आजीविकासाधनानि वदतु। | **(5x1=5)** |
| | | |
| **16.अ.**<br><br><br><br><br><br><br><br><br><br>**आ.** | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –**<br>क्रन्दनं वर्धते तस्य नान्तं समधिगच्छति।<br>व्यसनं प्राप्य यो मोहात् केवलं परिदेवयेत्॥<br>अन्वयः — यः व्यसनं प्राप्य1) ———केवलं परिदेवयेत्, तस्य2) ——— वर्धते एव, 3) ———- (च) न 4) ————।<br>[ क्रंदनम्, मोहात्,समधिगच्छति, अन्तम् ]<br>**अथवा**<br>**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत**<br>दास्यामीति प्रतिज्ञाय योऽन्यथा कुरूते मनः।<br>कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः॥<br>भावार्थः—- कस्मै अपि इदं वस्तु अहं (i) …......... इति प्रतिज्ञां कृत्वा यः (ii) ......अन्यथा करोति, कार्पण्येन (iii) —————तस्मात् (i) …———- कः स्यात्।<br>**मञ्जूषा—**<br>[ मनः, दास्यामि ,<br>अनिश्चितमतेः , पापतरः ] | **(4x1/2=2)** |
| | | |

<table>
<tr><td>17.</td><td>अधोलिखितवाक्येषु रेखाङ्कितपदानाम् प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-<br>(i) <u>शुश्रूषा</u> श्रवणम् चैव ग्रहणं धारणं तथा।<br>(क) सेवा (ख) श्रोतुम् इच्छा<br>(ग) श्वश्रू: (घ) श्रुति:<br>(ii) तस्य भार्या <u>सपदि</u> समागतं पतिम् दृष्ट्वा आश्चर्यचकिता अभवत्।<br>(क) शीघ्रम् (ख) मार्गात्<br>(ग) पदेन सहितम् (घ) सहसा<br>(iii) <u>अश्वत्थतरो:</u> मूले सुवर्णकलश: आसीत्।<br>(क) अश्वस्य अध: (ख) अशोकवृक्ष:<br>(ग) पिप्पलवृक्षस्य ( घ) आम्रस्य<br>(iv) <u>सूपकारा:</u> मेषं काष्ठेन ताडितवन्त:।<br>(क) अनल: (ख) कपय:<br>(ग) सेवका: (घ) औदनिका:</td><td>(4x1=4)</td></tr>
<tr><td>18.</td><td>मञ्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत।<br>द्रौणिना 1)——— पुत्राः भ्रातरः च हताः।भीमसेनः 2)————- द्रोणपुत्रस्य वधं कर्तुम् गच्छति। कृष्ण: युधिष्ठिरं 3)———— चञ्चलप्रकृतिविषये बोधयति ।कृष्णं दृष्ट्वा द्रोणपुत्रः 4)——— अभवत् l द्रोणपुत्र: 5)———- नाम अस्त्रं चालयति। अर्जुनः द्रौणे: अस्त्रं 6)———- स्व-अस्त्रं मोचयति। नारदव्यासौ आगत्य 7)—— ——- अस्त्रसंहर्तुं कथयतः । यतः तौ पाण्डवान्, द्रोणपुत्रं राष्ट्रं च 8)———- इच्छतः ।<br>मञ्जूषा——<br>उभौ, शमयितुम्, एकाकी, व्यग्र:, द्रोणपुत्रस्य,ब्रह्मशिरो<br>रक्षितुम् , द्रौपद्या:</td><td>(8x1/2=4)</td></tr>
</table>

# संस्कृतम् (सम्प्रेषणात्मकम्, कोड-सङ्ख्या - 119)
# अभ्यास-प्रश्नपत्रम् -10 (हल रहित)
# कक्षा - दशमी

**अवधिः होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
2. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

   **'क' भागः अपठितावबोधनम्. 10 अङ्.काः**

   **'ख' भागः रचनात्मककार्यम् 15 अङ्काः**

   **'ग' भाग अनुप्रयुक्तव्याकरणम् 25 अङ्.काः**

   **'घ' भागः पठितावबोधनम् 30 अङ्काः**
3. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
4. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
5. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
6. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
7. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| भाग-'क'<br>अपठित-अवबोधनम् | | |
|---|---|---|
| 1 | **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**<br>मनुष्यस्य आचरणमेव तस्य संस्काराणां परिचायक: भवति। व्यवहारकुशलता मानवजीवनस्य महत्त्वपूर्णा विशेषता अस्ति। व्यक्तेः वाक्-कौशलः, मनोवृत्तिः, चिन्तनं च सद्व्यवहारेणैव प्रकट्यते। कटुवचनै: हृदयेषु यत् व्रणं क्रियते, तस्य विरोपणं कदापि न भवति। किंतु मधुरभाषी स्वमधुरवाण्या अन्येभ्य: सुखं यच्छति, सर्वै: सह विनयपूर्वकम् आचरति, धैर्येण च समस्याया: समाधानं करोति। क्रोधं अहंकारं च | 10 |

त्यक्त्वा सौहार्द्रभावेन जनै: सह सम्भाषणं करोति। अस्य गुणस्य कारणात् तस्य मित्राणि वर्धन्ते, वैरभावः क्षीयते, समाजे समभाव: शांति: च जायते। व्यवहारकुशलता न केवलं शिक्षया अपि तु सतताभ्यासेन साध्या भवति। माता-पितरौ, गुरुजनाः च बालकान् सद्व्यवहारं शिक्षयन्ति। यः सद्व्यवहारे निपुणः भवति, सः सर्वत्र सफलतां ,सम्मानम् आत्मसंतुष्टिं च प्राप्नोति। अत: कथ्यते यत् – सद्व्यवहार: एव सामाजिककुशलताया: आधार: भवति।

**अ. एकपदेन उत्तरत— (केवलं प्रश्नद्वयम्)** **(2x1=2)**

i. मनुष्यस्य संस्काराणां परिचायक: किं भवति ?

ii. कटुवचना: हृदयेषु किं कुर्वन्ति?

iii. व्यवहारकुशलता केन साध्या ?

**आ.पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **(2x2=4)**

i. मधुरभाषी किं करोति ?

ii. कस्य गुणस्य कारणात् जनानां मित्राणि वर्धन्ते ?

iii. बालकान् सद्व्यवहारं के शिक्षयन्ति ?

**इ. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **(1)**

**ई. यथानिर्देशम् उत्तरत-** **(3x1=3)**

**(1) 'शत्रुता' इत्यस्य किं समानार्थकं पदम् अत्र प्रयुक्तम् ?**

(अ) सौहार्द्रम् (ब) मित्राणि

(स) वैरभाव: (द) समभाव:

**(2) 'यच्छति' इति क्रियाया: किं कर्तृपदं गद्यांशे प्रयुक्तम् ?**

(अ) मधुरभाषी (ब) मधुवाण्या

(स) अन्येभ्य: (द) सुखम्

**(3) 'निपुण:' अस्य विशेषणस्य विशेष्यपदं किम् अस्ति ?**

(अ) स: (ब) सद्व्यवहारे

(स) य: (द) सफलता

| 'ख' भागः<br>रचनात्मकलेखनम्  (15 अङ्काः) | | |
|---|---|---|
| **2** | **भवान् अव्यक्तः इति नाम्नः छात्रः अस्ति। विद्यालयस्य पुस्तकालये संस्कृतपुस्तकानाम् संख्याम् वर्धयितुम् प्रार्थयन्, प्रधानाचार्यं प्रति लिखितम् इदं पत्रं, मञ्जूषायाः पदानि चित्वा पूरयत-**<br>**मञ्जूषा—**<br>राशि:, प्रधानाचार्य:, विस्तार:, महोदय, सधन्यवादम् ,उत्साहेन, गौरवशालिनी, क्रेतुं,शब्दकोशान्, अत्यल्पा<br>परीक्षाभवनात्<br>तिथि:<br>सेवायाम्,<br>श्रीमान् (1) ——————महोदयः,<br>राजकीय विद्यालय:<br>नवदिल्ली<br>(2) ——————<br>सेवायाम् निवेदनम् अस्ति यत् अस्माकं विद्यालयस्य ग्रंथालये संस्कृतविषयकपुस्तकानां संख्या (3) ———अस्ति। छात्रा: संस्कृतस्य अध्ययनम् 4) ——— कुर्वन्ति किंतु आवश्यकग्रंथानाम् अभावात् तेषां ज्ञानस्य 5) ———-सम्यक् न भवति। संस्कृतभाषा अस्माकं राष्ट्रस्य 6) ———— भाषा अस्ति यस्याम् भारतीयसंस्कृते: महती 7) ——— सन्निहिता।<br>महोदय! अत: एष: मम विनम्र: अनुरोध: अस्ति यत् भवान् संस्कृतकथापुस्तकानि, व्याकरणग्रंथान्,8) ———— नाटकानि आधुनिकविषयसंबद्धानि नवपुस्तकानि च 9) ——— कृपया आदेशं ददातु।<br>(10) —————<br>भवत: आज्ञाकारी छात्र:<br>अव्यक्त: | **(1/2x10=5)** |
| | | |

| | | |
|---|---|---|
| 3.अ | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पंच वाक्यानि संस्कृतेन लिखत-**<br><br>**मञ्जूषा—-**<br>बसयानम्, जन-सम्मर्दः, छदिषि, पश्चात्, धावन्ति, नोचितम्, अनुशासनस्य, दुर्घटना, यातायातम्, पतेयुः, | **(5x1-5)** |
| | **अथवा** | |
| आ. | **मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत - 'अनुशासनस्य महत्त्वम्'**<br>**मञ्जूषा-**<br>जीवने, सर्वेषु क्षेत्रेषु, नियमानाम्, संकटे, कठिनम्<br>सेना, विद्यालये , समयस्य, आवश्यकम् | |
| | | |
| 4.अ | **अधोलिखितं संवादं मञ्जूषाप्रदत्तपंक्तिसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत—**<br>एकः ग्रामीणः —— रामानुज ! इत्थं तीव्रगत्या त्वं कुत्र गच्छसि ?<br>रामानुजः : (1)———————— ———————- —————— ।<br>ग्रामीणः —- किमर्थम् ?त्वं किमर्थं मतदानं करोषि? कोऽपि राजा भवेत्, वयं तु कर्मकाराः एव स्थास्यामः। अहं तु मतदानं न करोमि। | **(1x5=5)** |

रामानुज: —-  इदं नोचितम्। (2) ———————————————-।

ग्रामीणः —- कीदृशः अधिकारः ? अहं तु सर्वकारस्य विषये, विभिन्नदलानां विषये, मन्त्रीणां वा निर्वाचनस्य विषये किमपि न जानामि।

रामानुज:—- (3) ———————————————————-।

ग्रामीण: —- कदाचित् त्वम् उचितं कथयसि। किंतु मम समीपे तु परिचयपत्रम् अपि नास्ति। तत् कथं मतदानं करवाणि?

रामानुज:  –(4) ———————————————————-।

ग्रामीण: —- धन्यवाद:।  अधुना आवां चलाव।। (5) ——————-।

| |
|---|
| 1- त्वं इदं सर्वम् अवश्यम् जानीया:। मतदानम् अस्माकं कर्तव्यमपि भवति। |
| 2- अलं चिंतया।मया सह आगच्छ । अस्मिन् कार्ये अहं तव सहायतां करिष्यामि। |
| 3- देशस्य सर्वकारस्य निर्वाचने अस्माकमपि अधिकारः अस्ति। |
| 4- अद्य मम नगरे मतदानमस्ति। अहमपि मतदानाय गच्छामि। |
| 5- अद्यत: अहमपि देशस्य  एक: जागरूक: नागरिक: भूत्वा अवश्यमेव मतदानं करिष्यामि! |

**अथवा**

आ. **मञ्जूषायाः सहायतया अधोलिखितां कथां पूरयित्वा पुनः लिखत-** **(1/2×10=5)**

**मञ्जूषा—**

| |
|---|
| प्रज्ञां, काका:, न्यूना:, अन्यनगरात्, कति,<br>अहसन् ,  मानं,  स्व-मंत्रिभि: , तूष्णीं, प्रशंसाम्, |

एकदा सम्राट् अकबर: सभायां 1) ——— सह उपविष्टः आसीत्। सः स्वमंत्रिण: बीरबलस्य 2) ——— परीक्षितुम् इच्छन् प्रश्नम्  अपृच्छत् — “अस्माकं नगरे 3) —— काकाः सन्ति?” सर्वे मन्त्रिणः 4) ——— स्थितवन्तः। बीरबलः क्षणं चिन्तयित्वा अवदत् — “महाराज! अस्माकं नगरे पञ्चसहस्रं त्रिशतं पञ्च 5) ——- सन्ति।” अकबरः अपृच्छत् — “यदि अधिकाः वा 6) ——- स्युः तर्हि?” बीरबलः प्रत्युवाच — “अधिकाः चेत् 7) ———- आगताः, न्यूनाः चेत् अन्यत्र गताः।” एतत् श्रुत्वा सर्वे 8) ——। अकबरः प्रसन्नः अभवत्। सः बीरबलस्य बुद्धेः 9) —
——— अकरोत्।सत्यमेव कथ्यते — बुद्धिमत्ता सर्वत्र 10) ——— जनयति।

| | | |
|---|---|---|
| | **'ग' भाग:**<br>**अनुप्रयुक्तव्याकरणम् (25अङ्.का:)** | |
| | | |
| **5. अ** | **अधोलिखितवाक्येषु रेखांकितपदेषु संधिं संधिविच्छेदं वा कुरुत-**<br>i. कक्षे शिशु: **शयनं** करोति।<br>ii. **त्यागे+अपि** सुखं भवति।<br>iii. कामक्रोधोद्भवं वेगं **य:+सोढुं** शक्नोति, स: योगी भवति।<br>iv. **सु+अस्ति** आचार्यपुत्राय।<br>**अथवा**<br>**अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-**<br>i. **ऋक्+वेद:** तु अस्माकं प्राचीनतम: ग्रंथ: अस्ति।<br>**ii.** मनो **दुर्निग्रहं** चलम्।<br>iii. वयं सर्वे **मिलित्वा+एव** मोदध्वम्।<br>iv. **कश्चित्** प्रच्छन्नभाग्यनामधेय: युवक: आसीत्। | **(4x1=4)** |
| | | |
| **6** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत**<br>**1. जगत: मातापितरौ वन्दे अहम्।**<br>(अ) मात: च पित: च (ब) माता पिता<br>(स) मातृ पितृ (द) माता च पिता च<br>**2. आशान्वित: अहं भवत्समीपे आगतोऽस्मि।**<br>(अ) भवत: समीपे (ब) भवतस्य समीपे<br>(स) भवतु: समीपे (द) भवति समीपे<br>**3. निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा !**<br>(अ) विघ्नै: हीन: ( ब) विघ्नस्य समीपम्<br>(स) विघ्नानाम् अभाव: (द) विघ्नस्य पश्चात् | **(4x1=4)** |

| | | |
|---|---|---|
| | **4. गगने जलदः दृश्यते।**<br>(अ) जलं ददाति इति (ब) जलस्य दायकः<br>(स) जलेन दीयते (द) जलेन दहति इति | |
| | | |
| 7. | **अधोलिखितवाक्येषु रेखांकितपदानाम् प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरम् प्रदत्तविकल्पेभ्यः चित्वा लिखत-**<br>**1. गुरुः सदैव पूजनीयः भवति।**<br>(अ) पूज+अनीय (ब) पूजा+अनीयर<br>(स) पूजन+ईय (द) पूज्+अनीयर्<br>**2. प्राज्ञाः नराः बुद्धि+मतुप् नार्यः च विचार्य एव कार्यं कुर्वन्ति।**<br>(अ) बुद्धिमन्तः (ब) बुद्धिमत्यः<br>(स) बुद्धिमानी (द) बुद्धिमन्ती<br>**3. भगवान् कृष्णः गीतायाः उपदेशम् अयच्छत्।**<br>(अ) भगवत+आन् (ब) भग+वान<br>(स) भग+मतुप् (द) भग+मान्<br>**4. लक्ष्मीबाई वीर+तल् मूर्तिरासीत्।**<br>(अ) वीरता (ब) वीरतस्य<br>(स) वीरत्व (द) वीरतायाः | **(4x1=4)** |
| | | |
| 8.अ | **वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत-**<br>रम्या - त्वम् अत्र किमर्थम् 1.———-?<br>राधिका - अहम् बसयानार्थं तिष्ठामि।<br>रम्या - त्वया कुत्र 2.———-?<br>राधिका - अहं मम मातुलगृहं गच्छामि।<br>रम्या - तव मातुलः किं करोति ?<br>राधिका - तेन 3———विक्रीयन्ते।<br>वस्त्राणि , गम्यते, तिष्ठसि | **(3x1=3)** |

| | | |
|---|---|---|
| | **अथवा**<br>i. ———— माला:आनीयन्ते।(अस्मद्)<br>ii. अहं मालाभि: देवस्य पूजां ———(कृ)<br>iii. तदनन्तरम् अहं ——— पठिष्यामि।(पाठ) | |
| | | |
| 9. | **कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत-**<br>क) मनोहर: (3.00) ———- वादने मित्रस्य गृहम् अगच्छत् ।<br>ख) तत्र (3.30) ---------वादने स: मित्रेण सह अक्रीडत्।<br>ग) तदुपरान्तं (4.45) ———- तौ जलपानं अकुरुताम् । | **(3x1=3)** |
| | | |
| 10. | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत-**<br>धर्मग्रन्थेषु सर्वत्र लिखितम्- "असत्यं 1.——— वद परोपकारं च कुरु 2.———। ये जनाः 3.———-परोपकारं न कुर्वन्ति, ते मानवजीवनं 4.———-कुर्वन्ति ।<br>इति, वृथा , मा , कदापि | **(4x1=4)** |
| | | |
| 11. | **अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत-**<br>**(i) सर्वे जना: व्यायामस्य महत्त्वं <u>जानाति</u>।**<br>(क) जानामि (ख) जानान्ति<br>(ग) जानन्ति (घ) ज्ञानन्ति<br>**(ii) <u>त्रय:</u> बालिका: क्रीडन्ति।**<br>(क) तिस्र: (ख) त्रीणि<br>(ग) त्रीन् (घ) तिसृ<br>**(iii) अद्य अवकाश: <u>आसीत्</u>।**<br>(क) भवति (ख) अस्ति<br>(ग) भविष्यति (घ) आसन् | **(3x1=3)** |
| | | |

| | | |
|---|---|---|
| | **'घ' भाग:**<br>**पठितावबोधनम्।          (30 अङ्का:)** | |
| **12.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>अथ एकदा भगवान् बोधिसत्वः बहुजन्मार्जित-पुण्यफलैः शिवीनां राजा बभूव। स बाल्यादेव वृद्धोपसेवी, विनयशीलः शास्त्रपारङ्गतश्च आसीत्। जनकल्याणकर्मसु रतोऽसौ पुत्रवत् प्रजाः पालयति स्म । कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत् । तत्र अर्थिनां समूहः अन्न-पान-वसन-रजत सुवर्णादिकम् अभीष्टं वस्तुजातं प्राप्य सन्तुष्टः अभवत् । राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशं आयान्ति स्म। | **5** |
| | **(1) एकपदेन उत्तरत-          (केवलं प्रश्नद्वयम्) ।**<br>i. राजा कथम् प्रजाः पालयति स्म ?<br>ii. कस्य समन्तात् राजा दानशालाः अकारयत् ?<br>iii. राजा केषु रत: आसीत्? | **(1/2x2=1)** |
| | **(2) . पूर्णवाक्येन उत्तरत-          (केवलं प्रश्नद्वयम्) ।**<br>**i.** राजा बाल्यादेव कीदृशः आसीत् **?**<br>ii. राज्ञ: याचका: किं लब्ध्वा सन्तुष्टाः अभवन् ?<br>iii. जना: देशेभ्यो किमर्थम् आयान्ति स्म? | **(1x2=2)** |
| | **(3) . अ. निर्देशानुसारम् उत्तरत -**<br>i. जना: - अस्य कर्तृपदस्य क्रियापदं किम् अस्ति?<br>ii. धनधान्यसमृद्धाः दानशालाः - अनयोः पदयोः किं विशेषणपदम् ?<br>**अथवा**<br>**आ. निर्देशानुसारम् उत्तरत -**<br>i. 'याचकानाम्' अस्य किं समानार्थकं पदम् श्लोके प्रयुक्तम्?<br>ii. अभवत् – अस्य क्रियापदस्य कर्तृपदं किम्? | **(1x2=2)** |
| | | |

| | | |
|---|---|---|
| 13. | **अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**<br>ध्यायतः विषयान् पुंसः संगस्तेषूपजायते ।<br>सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते।<br>असंशयं महाबाहो! मनो दुर्निग्रहं चलम् ।<br>अभ्यासेन तु कौन्तेय, वैराग्येण च गृह्यते ।।<br>**I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ।**<br>i. नरस्य सङ्गः केषु जायते ?<br>ii. मन: कीदृशम् अस्ति ?<br>iii. श्लोके 'महाबाहो' इति सम्बोधनपदं कस्मै प्रयुक्तम्?<br>**II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) ।**<br>i. मनः केन गृह्यते?<br>ii. कामस्य उत्पत्तिः कस्मात् भवति ?<br>iii. क्रोधस्य कारणं किम् **?**<br>**III. (अ) निर्देशानुसारम् उत्तरत -**<br>i. 'कुन्त्याः पुत्रः' इति अर्थे अत्र किं पदं प्रयुक्तम् ?<br>ii. प्रथमश्लोके 'उपजायते' अस्य क्रियापदस्य किं कर्तृपदं प्रयुक्तम्?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>i. 'मनः' इत्यस्य एकं विशेषणपदं लिखत ।<br>ii. 'निस्सन्देहम्' इत्यस्य कः पर्याय:? | 5<br><br><br><br><br>**(2x1/2=1)**<br><br><br><br>**(2x1=2)**<br><br><br><br>**(2x1=2)** |
| | | |
| 14. | **अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन उत्तरत-**<br>युधिष्ठिर- शुभे! धैर्यं धारय। नूनं तव पुत्राः वीर-गतिम् एव प्राप्ताः। वीरजननी त्वं शोचितुं न अर्हसि।<br>द्रोपदी- कथं मन्दभाग्या अहं धैर्यं धारयमि। यावत असौ क्रूरकर्मा न दण्ड्यते, तावत् अहम् इत: न गमिष्यामि। | 5 |

| | | |
|---|---|---|
| | युधिष्ठिर- प्रिये! मा एवं ब्रूयाः । स पापकर्मा कुत्र गतः इति न जानीमः । अतिदूरं किंचिद् दुर्गमवनं प्रविष्टः भवेत्।<br>द्रोपदी:- (भीमं प्रति) आर्यपुत्र। क्षत्रधर्मम् अनुस्मरन् मां शोसागरात् रक्ष।<br>भीमः- (युधिष्ठिरं प्रति) भ्रातः! द्रौणिम् अनुगन्तुम् मह्यम् अनुमतिं ददातु भवान्। | |
| | **1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ।**<br>i. द्रौपद्याः पुत्राः केन हताः?<br>ii. द्रौपद्याः पुत्राः किं प्राप्ताः?<br>iii. पापकर्मा क: आसीत्? | **(1/2x2=1)** |
| | **II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)**<br>i. अश्वत्थामा कुत्र प्रविष्टोऽभवत्?<br>ii. भीमः युधिष्ठिरं प्रति किम् अवदत्?<br>iii. द्रौपदी भीमं किं कर्तुं कथयति? | **(2x1=2)** |
| | **III. (अ) निर्देशानुसारम् उत्तरत -**<br>i. 'सुताः' इति पदस्य स्थाने अत्र किं पर्यायपदं प्रयुक्तम्?<br>ii. 'अर्हसि' इति क्रियापदस्य कर्तृ पदं अत्र किं प्रयुक्तम्?<br>**अथवा**<br>**(आ) निर्देशानुसारम् उत्तरत -**<br>i. 'पापकर्मणा द्रौणिना' अनयोः पदयो: विशेषणपदं किम्?<br>ii. 'पुण्यकर्मा' इति पदस्य विलोमपदं अत्र किं प्रयुक्तम्? | **(2x1=2)** |
| | | |
| **15.** | **रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत –**<br>i. राजपुत्राः प्रासादे **वानरैः** सह क्रीडन्ति स्म ।<br>ii. प्रच्छन्नभाग्यस्य गृहम् **आभया** भासमानम् अभवत् ।<br>iii. अरुणाचलस्य राजधानी **ईटानगरम्** ।<br>iv. **गुरूणाम्** आज्ञा अविचारणीया।<br>v. मम **लोकयात्रा** निर्बाधा भवेत्। | **(5x1=5)** |
| | | |

| | | |
|---|---|---|
| 16.अ. | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत –**<br>नि:सारलघो: 1) ——— स सारो यद् 2) —————दीयते।<br>दीयमानम्(धनम्) 3.——— हि याति । अदीयमानं(धनम्) 4) ————(भवति) ।<br>[ निधनैकनिष्ठम्, धनस्य, निधानताम्, लोकहितोन्मुखेन ] | **(4x1/2=2)** |
| आ. | **अथवा**<br>**मञ्जूषाया: साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत**<br>काकस्य गात्रं यदि काञ्चनस्य, माणिक्य- रत्नं यदि चञ्चुदेशे।<br>एकैक पक्षे ग्रथितं मणीनां, तथापि काको न तु राजहंसः ।<br>**भावार्थः** यदि1) ....... चञ्चुदेशे मणिक्यरत्नम् अपि भवेत् तथापि सः2) ——— न मन्यते, अपितु काक: एव भवति। एवमेव, यदि तस्य 3) ——- मणिभिः ग्रथिताः भवेयुः, तथापि स4) ——-.......एव, न राजहंस:।<br>**मञ्जूषा—**<br>[ पक्षा:, राजहंस:, काक:, काकस्य ] | |
| | | |
| 17. | **अधोलिखितवाक्येषु रेखाङ्कितपदानाम् प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-**<br>**(i) अलम् <u>अतिविकत्थनेन।</u>**<br>(क) कथाया: (ख) अतिअसत्यभाषणेन<br>(ग) अतिरोदनेन (घ) आत्मश्लाघया<br>**(ii) अपूर्व: कोशोऽयं <u>भारति!</u>**<br>(क) भारतमाता (ख) लक्ष्मी<br>(ग) सरस्वति (घ) नदि<br>s | **(4x1=4)** |

| | | |
|---|---|---|
| | **(iii) अभ्यासेन तु <u>कौन्तेय</u>! वैराग्येण च गृह्यते।**<br>(क) कुंतीपति: (ख) कुंतीभ्राता<br>(ग) कुंतीपिता (घ) कुंतीपुत्र<br>**(iv) तस्य <u>क्षितौ</u> प्रलुठत: तृणेषु वह्निज्वाला: समुत्थिता:।**<br>(अ) भूमौ ख) आकाशे<br>(ग) क्षितिजे घ) वृक्षेषु | |
| **18.** | **मञ्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत।**<br>एकदा सरस्तीरे काकस्य कर्णकटु शब्दं श्रुत्वा 1) ———— तं निन्दति। तदैव काक: प्रविश्य आत्मन: 2) ——वर्णनं करोति। तत: बक: आगच्छति स: च स्व-दुग्धधवलपक्षाणां 3) ————— करोति।<br>4) ———— प्रविश्य बकस्य छलस्य भर्त्सनां कृत्वा आत्मानं '5) ———-' इति कथयति।पिक:, बक:, मयूरः 6) ———— च सर्वे आत्मानं 'पक्षिणां राजा' इति घोषयन्ति।अन्ते 7) ———- आगत्य सर्वान् प्रेम्णा वस्तुं जीवनं च 8) ———— कर्तुं शिक्षयति।<br>**मञ्जूषा——**<br>मयूरः, राजहंसी, प्रकृतिमाता, गुणानाम्, राष्ट्रपक्षी, राजहंसः , रसमयम्, प्रशंसाम्, | **(8x1/2=4)** |